# NATAKA AND CHAMPU

Study material

BA SANSKRIT

CORE COURSE

THIRD SEMESTER

(2011 Admission)

UNIVERSITY OF CALICUT

SCHOOL OF DISTANCE EDUCATION

CALICUT UNIVERSITY P.O. MALAPPURAM, KERALA, INDIA - 673 635

UNIVERSITY OF CALICUT
SCHOOL OF DISTACE EDUCATION

STUDY MATERIAL:

BA SANSKRIT
III SEMESTER
CORE COURSE

NATAKA AND CHAMPU

Prepared By:

Dr. M Sathian,
Assistant Professor,
Department of Sanskrit,
S.N.G.S. College,
Pattambi, Palakkad

Edited & Scrutinised by :

Sri.K.Jayanarayanan,
Associate Professor,
Department of Sanskrit,
Sree Kerala Varma College,
Thrissur.

(c)
Reserved

# Module I

## Sanskrit Dramatic Literature

रूपकाणि ।

दृश्यकाव्यानि अभिनेयानि भवन्ति, रूपकाणि चाऽभिधीयन्ते । रूप्यते प्रत्यक्षीक्रियते योऽर्थः तद्वाचकत्वात् काव्यानि रूपकाणि । रूपकाणि द्विविधानि भवन्ति । १. दशविधरूपकाणि २. अष्टादश उपरूपकाणि ।

दशविधरूपकाणि ।

नाटकं सप्रकरणं भाणः प्रहसनं डिमः ।
व्यायोगसमवकारौ वीथ्यङ्केहामृग इति ।।

नाटकं, प्रकरणं, भाणः, प्रहसनं, डिमः, व्यायोगः, समवकारः, वीथी, अङ्कः, ईहामृगः इत्याख्यानि दशविधानि रूपकाणि भवन्ति ।

नाटकम् ।

विश्वनाथस्य साहित्यदर्पणे नाटकलक्षणं एवं भवति ।

नाटकं ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वितम् ।
विलासद्ध्यादिगुणवद्युक्तं नानाविभूतिभिः ।।

सुखदुःखसमुद्भूति नानारसनिरन्तरम् ।
पञ्चादिकाः दशपरास्तत्राङ्काः परिकीर्तिताः ।।

प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान् ।
दिव्योऽथ दित्यादिव्यो वा गुणवन्नायको मतः ।।

एक एव भवेदङ्की शृङ्गारो वीर एव वा ।
अङ्कमन्ये रसाः सर्वे कार्यो निर्वहणेऽद्भुतः ।।

चत्वारः पञ्च वा मुख्याः कार्यव्यापृतपुरुषाः ।
गोपुच्छाग्रसमाग्रं तु बन्धनं तस्य कीर्तितम् ।।

नाटकं ख्यातवृत्तम् - इतिहासपुराणादि प्रसिद्धं इतिवृत्तम् भवेत् । पञ्चसन्धिसमन्वितम् - मुखप्रतिमुखादिभिः पञ्चभिः सन्धिभिः समन्वितम् । विलासद्ध्यादिगुणवत्युक्तम् । नानाविभूतिभिः युक्तम् - बहुविधैश्वर्यैः उपेतम् । सुखदुःखसमुद्भूतिः - सुखदुःखसमुद्भवः, रामयुधिष्ठिरादिचरित्रेषु अभिव्यक्तः । नानारसनिरन्तरम् - शृङ्गारादिभिः नानारसैः अव्यवहितम् । पञ्चादिकादशपरास्तत्राङ्काः - पञ्चादिकाः दशपराः अङ्काः ।

नाटके नायकसामान्यलक्षणम् - प्रख्यातवंशः, राजर्षिः, प्रतापवान्, गुणवान्, कश्चित् नायकः दिव्यः यथा श्रीकृष्णादि, कश्चित् अदिव्यः यथा मनुष्यः कश्चिच्च दिव्याऽदिव्यः यथा श्रीरामः।

नाटके अङ्की रस एक एव स च शृङ्गारो वीर एव वा। अपरे हास्यादयः रसाः अप्रधानम्। निर्वहणसन्धौ अद्भुतरसः कर्तव्यः। चत्वारः पञ्च वा जनाः मुख्याः कर्मतत्परजनाः भवेयुः। नाटकस्य गोपुच्छाग्रसमाग्रं (गोपुच्छाऽग्रतुल्यपूर्वभागं) बन्धनं कथितम्।

प्रकरणम्।

प्रकरणं रूपकस्य द्वितीयो भेदः। अस्य लक्षणं वर्तते दशरूपके -

अथ प्रकरणे वृत्तमुत्पाद्यं लोकसंश्रयम्।
अमात्यविप्रवणिजामेकं कुर्याच्च नायकम्।।

धीरप्रशान्तं सापायं धर्मकामार्थतात्परम्।
शेषं नाटकवत्सन्धिप्रवेशकरासिदकम्।।

आत्रायमाशयः यत् प्रकरणस्य कथावस्तु इति हासप्रसिध्दे न भवति अपितु कल्पितं लौकिकञ्चैव भवति। नायकः अमात्यब्राह्मणवणिजेषु कोऽपि एकः भवितुमर्हति। लोकसंश्रयम् अनुदात्तम्। अमात्याद्यन्यतमधीरप्रशान्तनायकं विपदन्तरितार्थसिध्दिं कुर्यात्। प्रकरणे मन्त्री अमात्य एव। सार्थवाहो वणिग्विशेष एवेति। नायकः यः खलु धीरप्रशान्तः भवति, यश्च धर्मकामार्थतत्परः भवति तस्य कार्यसिध्दिः विघ्नबाधादिनिवारणपूर्वकं दृश्यते। अन्यत् सर्वं नाटकमिव प्रतिपाद्यते। अर्थात् श्रृङ्गारोऽङ्गिरसो भवति। नायिका कीदृशी-त्याकांक्षायामाह -

नायिका तु द्विधा नेतुः कुलस्त्री गणिका तथा।
क्वचिदेकैव कुलजा वेश्या क्वापि द्वयं क्वचित्।।

कुलजान्यन्तरा, बाह्या वेश्या, नातिक्रमोऽनयोः।
आभिप्रकरणं त्रेधा, सङ्कीर्णधूर्तसंकुलम्।।

अनेन प्रकारेण प्रकरणस्य त्रयो भेदाः नायिकानुसारेण भवन्ति। १. कुलजानिष्ठम् २. गणिकानिष्ठम् ३. उभयनिष्ठञ्चेति। कुलजानिष्ठं प्रकरणंयथा - पुष्पदूषितकम्, गणिकानिष्ठं यथा तरङ्गदत्तम्, उभयनिष्ठं यथा मृच्छकटिकम्।

परं यत् कथितं धूर्तविटशकारादीनां समावेशेन प्रकरणं सङ्कीर्णप्रकरणमित्युच्यते। तत् मृच्छकटिकमपरो चतुर्थो सङ्कीर्णनामभेदः।

भाणः।

भाणोऽपि एको भेदः रूपकस्य। अस्य स्वरूपमित्थं वर्णितम् दशरूपके -

भाणस्तु धूर्तचरितं स्वानुभूतं परेण वा।
यत्रोपवर्णभेदैको निपुणः पण्डितो विटः।।

सम्बोधनोक्तिप्रत्युक्तीकुर्यादाकाशभाषितैः।
सूचयेद्वीरश्रृङ्गारौ शौर्यसौभाग्यसंस्तवैः।।

भूयसा भारती वृत्तिरेकाङ्के वस्तु कल्पितम्।
मुखनिर्वहणे साङ्गे लास्याङ्गानि दशापि च।।

अत्र धूर्त इत्यनेन चौरद्यूताकारादयः ग्राह्याः, तेषां चरितमत्रैक एव विटः स्वकृतं परकृत वोपवर्णयति स रूपकभेदः भारतीवृत्तिप्रधानत्वाद् भाणः कथ्यते। एकस्य चोक्तिप्रत्युक्तियुक्तस्य आकाशभाषितैराशङ्कितोत्तरत्वेन भवन्ति। रसस्य अस्याष्टत्वाच्च वीररसः श्रृङ्गाररसो वा शौर्यस्य श्रृङ्गाररसस्य च वर्णनेन अङ्गीरूपेण गृह्यते। कथावस्तु काल्पनिकं भवति, एकमेवाङ्कञ्च भवति। मुखनिर्वहणसन्धी द्वयोः लास्याङ्गानि प्रयोज्यानि च सन्ति।

लास्याङ्गानि -

नेयं पदं स्थितं बाह्यमासीनं पुष्पगण्डिका।
प्रच्छेदकस्त्रिगूढं च सैन्धवाख्यं द्विगूढकम्।।

उत्तमोत्तमकं चान्यदुक्त प्रत्युक्तमेव च।
लास्ये दशविधं ह्येतदङ्गानिर्देशकल्पनम्।।

इमानि दशाङ्गानि लास्याङ्गानि कथ्यन्ते।

प्रहसनम्।

प्रहसनं प्रतिपादयता धनञ्जयेन निगदितम् यत् भाणवत् प्रहसनमपि धूर्तचरित्रात्मकम्, आकाशभाषितेनोक्तिप्रत्युक्तियुक्तम्, भारतीवृत्तिसहितं भवति। तद्वत् प्रहसनं त्रेधा शुद्धवैकृतसङ्करैः।

धनिकस्तु - तद्वदिति-भाणवद्वस्तुसन्धिसन्ध्यङ्गलास्यादीनामतिदेशः। प्रहसनस्य त्रैविध्यमेवं वर्तते - शुद्धम्, विकृतम्, सङ्करञ्चेति।

शुद्धप्रहसनम् - यस्मिन् प्रहसने विप्रलिङ्गीनां, चेटचेटिविटानाञ्च सम्मेलनम् एतेषां वेशभाषाचरितादिभिर्मण्डितं हास्यवचोभिश्च युक्तं भवेत् तत् तु शुद्धमुच्यते। लक्षणं -

पाखण्डिविप्रप्रभृतिचेटचेटीविटाकुलम्।
चेष्टितं वेषभाषाभिः शुद्धं हास्यवचोन्वितम्।।

अत्र पाखण्डिनः शाक्यनिर्ग्रन्थप्रभृतयः ज्ञेयाः। विप्राश्च अत्यमृजवः, जातिमात्रोपजीविनो बोध्याः।

विकृतं प्रहसनम् - लक्षणं यथा -

कामुकादिव चो वेषैः षण्ढकाञ्चुकितापसैः।
विकृतं...............................................।। इति।

अत्र कामुकादयः भुजङ्गचारभटाद्याः ज्ञेयाः। एतेषां वेषधारकैः नपुंसककञ्चुकि-तपस्विवृद्धैः यत् प्रहसनं विकृतं जायते। स्वस्वरूपरित्यागपूर्वकं विकृतरूपधारणात् प्रच्युतविभावत्वात् विकृतमिति संज्ञासमीचीनम्।

सङ्करं प्रहसनम् - यत् वीथ्यङ्गैः मिश्रितं धूर्तसमुदायैर्व्याप्तं स्यात् तत् सङ्कीर्णं सङ्करं वेति कथ्यते। यथा -

सङ्कराद्वीथ्या सङ्कीर्णं धूर्तसङ्कुलम्। इति।

प्रहसनेषु षड्विधो हास्यरसः नूनमेव प्रदर्शनीयः। उक्तं यथा -

रसस्तु भूयसा कार्यः षड्विधो हास्य एव तु।

डिमः।

डिमः नाट्यस्यान्यतमभेदो परिगण्यते। अस्य स्वरूपं धनञ्जय एवं प्रतिपादितवान्-

डिमे वस्तु प्रसिद्धं स्यात् वृत्तयः कैशिकीं विना।
नेतारो देवगन्धर्वयक्षरक्षोमहोरगाः।।

भूतप्रेतपिशाचाद्याः षोडशात्यन्तमुद्धताः।
रसैरहास्यश्रृङ्गारैः षड्भिर्दीप्तैः समन्वितः।।

मायेन्द्रजालसंग्रामक्रोधोद्भ्रान्तादिचेष्टितैः।
चन्द्रसूर्योपरागैश्च न्याय्ये रौद्ररसेऽङ्गिनि।।
चतुरङ्कः चतुस्सन्धिर्निर्विमर्शो डिमः स्मृतः।।

'डिम'पदस्यार्थः समूहः वर्तते। डिम संघाते इति नायकसंघातव्यापारात्मकत्वाड्डिमः। डिमस्य कथावस्तु इतिहासप्रसिद्धं भवति। कैशिकीं विहाय सर्वाः वृत्तयः प्रयुक्ताः सन्ति। षोडशनायकाः, हास्यश्रृङ्गाररहिताः षड्रसाश्च भवन्ति। अङ्गी रौद्रो भवति न्यायप्रधानः। विमर्शरहितामुखप्रतिमुखगर्भनिर्वहणाख्याश्चत्वारः सन्धयः साङ्गाः सम्भवन्ति। अन्यत् नाटकादिवत् ज्ञेयाः। एतच्च -

इदं त्रिपुरदाहे तु लक्षणं ब्रह्मणोदितम्।
ततस्त्रिपुरदाहश्च डिमसंज्ञः प्रयोजितः।।

इति भरतमुनिना स्वयमेव त्रिपुरदाहेति वृत्तस्य तुल्यत्वं दर्शितम्।

व्यायोगः।

व्यायोगस्य स्वरूपमेवं वर्तते -

ख्यातेतिवृत्तो व्यायोगः ख्यातोद्धतनराश्रयः।
हीनो गर्भविमर्शाभ्यां दीप्ताः स्युर्डिमवद्रसाः।।

अस्त्रीनिमित्तसंग्रामो जामदग्न्यजये यथा।
एकाहाचरितैकाङ्को व्यायोगो बहुभिर्नरैः।।

व्यायोगशब्दव्युत्पत्तिरिति वर्तते - व्यायुज्यन्तेऽस्मिन् बहवः पुरुषा इति व्यायोगः। इतिवृत्तं प्रसिद्धं स्यात्, यथा परशुरामेण पितृवधकोपात् सहस्रार्जुनवधः कृतः।

समवकारम्।

समवकीर्यन्तेऽस्मिन्नर्था इति समवकारः। स्वरूपं यथा -

कार्यं समवकारेऽपि आमुखं नाटकादिवत्।
ख्यातं देवासुरं वस्तु निर्विमर्शास्तु सन्धयः।।

वृत्तयो मन्दकैशिक्यो नेतारो देवदानवाः।
द्वादशोदात्तविख्याताः फलं तेषां पृथक् पृथक्।।

बहुवीररसाः सर्वे यद्वदम्भोधिमन्थने।
अङ्कैस्त्रिभिस्त्रिकपटस्त्रिश्रृङ्गारस्त्रिविद्रवः।।

द्विसन्धिरङ्कः प्रथमः कार्यो द्वादशनाडिकः।
चतुर्द्विनाडिकावन्त्यौ नाडिका घटिकाद्वयम्।।

वस्तुस्वभावदैवारिकृताः स्युः कपटास्त्रयः।
नगरोपरोधयुद्धे वाताग्न्यादिकविद्रवाः।।

धर्मार्थकामैः श्रृङ्गारो नात्र बिन्दुप्रदेशकौ।
विथ्यङ्गानि यथालाभं कुर्यात् प्रहसने यथा।।

अत्रेदं बोध्यं यत् समवकारः नाट्यस्यापूर्व एषः प्रकारः वर्तते। अस्येतिवृत्तं प्रसिद्धैः सुरासुरैः सह सम्बद्धं भवति। द्वादशनायकाः भवन्ति। प्रधानरसः वीरः स्यात्। नायकानां फलानि च पृथक् पृथक् भवन्ति। यथा समुद्रमन्थने वासुदेवादीनां लक्ष्म्यादिलाभाः, त्रयोऽङ्काः स्युः। तेषां प्रथमोऽङ्कः चतुर्विंशतिघटिका निवृत्तेतिवृत्तप्रमाणः। प्रत्यङ्कं च यथासंख्यं कपटाः। तथा नगरोपरोधयुद्धवाताग्न्यादिविद्रवाणां मध्ये एकैको विद्रवः कार्यः। धर्मार्थकामश्रृङ्गाराणामेकैकः श्रृङ्गारः प्रत्यङ्कमेव विधातग्यः। वीथ्यङ्गानि यथावसरं यथालाभं कार्याणि। बिन्दुप्रवेशकौ नाटकोक्तावपि न विधातव्यौ। इत्यनेन समवकारः बोध्यते। उदाहरणं यथा समुद्रमन्थनम्।

वीथिः।

रूपकस्य दशभेदेषु वीथी अपि एको भेदः। वीथीशब्दस्य अर्थः मार्ग इति भवति। वीथीवद्वीधी मार्ग इति। लक्षणं यथा दशरूपके -

वीथी तु कैशिकीवृत्तौ सन्ध्यङ्गाङ्कैस्तु भाणवत्।
रसः सूच्यस्तु श्रृङ्गारः स्पृशेदपि रसान्तरम्।।

युक्ता प्रस्तावनाख्यातैरङ्गैरुद्घात्यकादिभिः।
एवं वीथी विधातव्या द्व्येकपात्रयोजिता।।

यद्यपि अङ्गादीनामुपपत्तिः भाणवत् भवति किन्तु तत्रायमेव भेदः यत् श्रृङ्गाररसस्यापरिपूर्णत्वाद् भूयसा सूच्य एव भवति। तथापि अन्यानां रसानां ईषदपेक्षा भवत्येव। श्रृङ्गाररसौचित्यादेव कैशिकीवृत्त्यत्र प्रयुज्यते।

अङ्कः।

अङ्कोऽपि रूपकभेदः। अस्य स्वरूपमेवं लिखितं दशरूपककारेण -

उत्सृष्टिकाङ्के प्रख्यातं वृत्तं बुद्ध्या प्रपञ्चयेत्।
रसस्तु करुणः स्थायी नेतारः प्राकृता नराः।।

भाणवत् सन्धिवृत्त्यङ्गैर्युक्तः स्त्रीपरिदेवितैः।
वाचा युद्धं विधातव्यं तथा जयपराजयौ।।

अत्रायमाशयः यत् अङ्के प्रसिद्धम् इति वृत्तं कविना स्वप्रतिभया स्फीतं क्रियते। प्रधानो रसः करुणः। सामान्यपुरुषा एव नायका भवन्ति। उदाहरणं यथा - शर्मिष्ठा ययातिः।

ईहामृगः।

दशरूपके कथितेषु नाट्यभेदेषु ईहामृगोऽन्तिमः भेद वर्तते। मृगवद् अलभ्यां नायिकां नायकोऽस्मिन्नीहते इतीहामृगः। अस्येतिवृत्तं किञ्चित् प्रसिद्धं किञ्चिच्च काल्पनिकं भवन्ति। अङ्काः चत्त्वारः भवन्ति, सन्धयश्च मुखप्रतिमुखगर्भाः। नियमराहित्यात् नरो देवो वा कोऽपि नायकः भवितुं शक्नोति। प्रतिनायकः विपर्यासाद् विपर्ययज्ञानादयुक्तकारी विधेयः। लक्षणं यथा -

मिश्रमीहामृगे वृत्तं चतुरङ्कं त्रिसन्धिमत्।
नरदिव्यावनियमान्नायकप्रतिनायकौ।।

ख्यातौ धीरोद्धतावन्त्यो विपर्यासादयुक्तकृत्।
दिव्यस्त्रियमनिच्छन्तीमपहारादिनेच्छतः।।

श्रृङ्गाराभासमप्यस्य किञ्चित् किञ्चित्प्रदर्शयेत् ।।

संरम्भं परमानीय युद्धं व्याजान्निवारयेत् ।
वधप्राप्तस्य कुर्वीत वधं नैव महात्मनः ।।

इत्थं रूपेण ईहामृगः ज्ञायते ।

उपरूपकाणि ।

नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम् ।
प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा ।।

संलापकं श्रीगदितं शिल्पकं च विलासिका ।
दुर्मल्लिका प्रकरणी हल्लीशो भाणिकेति च ।।

अष्टादश प्राहुरुपरूपकाणि मनीषिणः ।
विना विशेषं सर्वेषां लक्ष्म नाटकवन्मतम् ।।

नाटिका - दशरूपके प्रकरणनाटकयोर्मिलितं रूपं नाटिकेत्युक्तम् । नायके प्रख्यातिवंशे सत्यपि वृत्तं तस्य कल्पितमुपादीयते । संस्कृते महाराजहर्षस्य रत्नावली प्रियदर्शिका चेति नाटिकाद्वयं प्रसिद्धम् । (अनयोः परिचयः प्राद् दत्तः) । मदनपालसरस्वतीकृता पारिजातमञ्जरीसमाख्यानाटिकाः, यस्याः केवलमङ्कद्वयं धारानगर्यां शिलासूट्ठङ्कितं प्राप्यते । मथुरादासकृता वृषभानुजा नाटिका । अयं मथुरादासः गङ्गातीरस्थसुवर्णशेखराभि-धनगरवासी कायस्थकुलजश्च ।

त्रोटकम् - दिव्यमानुषसंश्रयं, पञ्चाङ्कतोऽन्यूनं, प्रत्यङ्कं सविदूषकञ्च भवति । यथा - कालिदासस्य विक्रमोर्वशीयम्, अज्ञातकर्तृकं लम्भितरम्भञ्च ।

गोष्ठी - पञ्चषड्योषिदन्विता, नवभिर्दशभिर्वा प्राकृतपात्रैर्युक्ता, एकाङ्कं विनिर्मिता च भवति, यथा - रेवतमदनिका ।

सट्टकम् - प्राकृताशेषपाट्या नाटिका सट्टकं नाम । यथा - राजशेखरस्य कर्पूरमञ्जरी प्रसिद्धा ।

नाट्यरासकम् - हास्यरसं बहुयोगञ्च भवति । यथा - नर्मवती ।

प्रस्थानकम् - हीनो नायकः, दासी नायिका, सुरापानं विषयः, सर्वमिदं प्रस्थानके भवति । यथा - श्रृङ्गारतिलकम् ।

उल्लाप्यम् - उदात्तनायकम्, एकाङ्कम्, संग्रामरोदनगीतादिबहुलञ्च भवति । यथा - देवीमहादेवम् ।

काव्यम् - एकाङ्कं, स्त्रीनायकम्, आरभटीहीनश्च काव्यं नामोरूपकम् । यथा - यादवोदयम् ।

प्रेङ्खणम् - हीननायकमसूत्रधारञ्च। यता वालिवधम्।

रासकम् - पञ्चपात्रयुतम्, भाषाविभाषाबहुलम्, ख्यातनायिकं मूर्खनायकञ्च। यथा - मेनकाहितम्।

संलापकम् - चतुरङ्कं, पाखण्डनायकं, पुरसंरोधसंग्रामवर्णनपरं भवति। यथा - मायाकापालिकम्।

श्रीगदितम् - वृत्तनायकौ प्रख्यातौ, नायिकाऽपि प्रसिद्धा, श्रीशब्दयुतं च पद्यं भवत्यत्र। यथा - क्रीडारसातलम्।

शिल्पकम् - चतुरङ्कं, ब्राह्मणनायकं, श्मशानवर्णनयुतम्। यथा - कनकावतीमाधवम्।

विलासिका - एकाङ्का श्रृङ्गारबहुला च भवति। उदाहरणग्रन्थो न प्रसिद्धः।

दुर्मल्लिका - चतुरङ्का, कैशिकीवृत्तिशालिनी। यथा - बिन्दुमती।

प्रकरणिका - नाटिकेव प्रकरणीसार्थवाहादिनायका, समानवंशजा यत्र नेतुर्नायिका। उदाहरणग्रन्थो नोपलभ्यते।

हल्लीशः - एकं एवाङ्कः, सप्त वा दश वा स्त्रियः। यथा - केलिरैवतकम्।

भाणिका - भाणसमा। यथा कामदत्ता।

एवं परिचितानि रूपकाणि उपरूपकाणि च। सम्प्रति कतीनाञ्चन रूपकहासयुगे निर्मितानां रूपकाणां सामान्यपरिचयः प्रदीयते -

| | ग्रन्थनाम | कर्त्तुर्नाम | कालनिर्देशः |
|---|---|---|---|
| १. | पारिजातमञ्जरी | मदनः | त्रयोदशं शतकम्। |
| २. | उन्मत्तराघवम् | भास्करः | चतुर्दशशतकम्। |
| ३. | मौर्यविजयम् | जीवरामयाज्ञिकः | पञ्चदशशतकम्। |

चतुर्विधाभिनयः।

भवेदभिनयोऽवस्थानुकारः स चतुर्विधः। आङ्गिको वाचिकश्चैवमाहार्यः सात्विकस्तथा। अवस्थाऽनुकरणं अभिनयः। अभिनयः चतुर्विधो भवति।

१. आङ्गिकाभिनयः - अङ्गेन निर्वृतः अभिनयः आङ्गिकाभिनयः।
२. वाचिकाभिनयः - वचसा निर्वृतः अभिनयः वाचिकाभिनयः।
३. आहार्याभिनयः - वेषरचनादिनिष्पाद्यः अभिनयः आहार्याभिनयः।
४. सात्विकाभिनयः - स्तम्भस्वेदादिनिष्पाद्यः अभिनयः सात्विकाभिनयः।

रसस्वरूपम्।

रससिद्धान्तस्य प्रवर्तकेन आचार्यभरतमुनिना 'नहि रसादृते कश्चिदर्शः प्रवर्तते' इत्युक्त्वा स्फुटीकृतं यत् काव्ये वर्णितमेतादृशं किमपि वस्तु नास्ति यद्रसवर्जितं स्यात्। यथा हि आत्मतत्त्वज्ञः परमात्मनो दर्शनं कृत्वा अपूर्वानन्दसन्दोहनिमग्नो जायते तथैव काव्यमर्मज्ञाः सहृदयाः ब्रह्मानन्दसहोदरानन्दप्रदं रसमास्वाद्य आनन्दसागरे निमग्ना जायन्ते।

भारतीयसंस्कृतवाङ्मयस्यातीव प्राचीनेषु शब्देषु रसशब्दोऽप्यन्यतमः पुरा रसशब्दस्य जले, स्वादे, वीर्ये, शृङ्गाराद, विषे द्रवादौ च प्रयोगो दृष्टिपथमवतरति।

यथोक्तं हेमकोशे -

रसः स्वादे जले वीर्ये शृङ्गारादौ विषे द्रवे।
बले रागे गृहे धातौ तिक्तादौ पारदेऽपि च।।

वेदवेदाङ्गादिषु शतशः प्रयुक्तं रसशब्दमवलोक्य निःसन्दिग्धतयेदं वक्तुं शक्यते यद् आयुर्वेदीय लौककिरसाः काव्यशास्त्रीया अलौकिकरसाश्च वेदरत्नाकरादेव आविर्भूता इति। वैदिक वाङ्मये विशेषतयोपनिषत्सु रसशब्दः परमात्मनः कृते प्रयुक्तो वर्तते। तैत्तिरीयोपनिषदि परमात्मा ब्रह्मानन्दवल्ल्यां रसतया वर्णितोऽस्ति यतस्तमुपेत्य जीवात्मा परमानन्दमनुभवति। तथा हि - रसोवै सः। रसं ह्येवायं लब्ध्वाऽनन्दी भवति।

वैदिकसाहित्ये काव्यशास्त्रीयरसानां शृङ्गारादीनां कृतेऽपि रसपदस्य प्रयोगो दृष्टिपथमवतरति। तत्र शृङ्गारहास्यादिपदान्यपि प्राप्यन्ते, तैश्च साहित्यिकमनोभावानां सङ्केत उपलभ्यते। आचार्यभरतेनाप्युल्लेखोऽकारि यत् नाट्यशास्त्रस्य रचनाकाले ब्रह्मणा अथर्ववेदाद् रसो गृहीतः। यथोक्तं तेनैव -

जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च।
यजुर्वेदादभिनयान् रसानाथर्वणादपि।।

यद्यपि राजशेखरेण काव्यमीमांसायुक्तं यत् ब्रह्मणा सर्वप्रथमं रसस्योपदेशो नन्दिकेश्वराय प्रदत्तः। अतो हेतो रसस्य प्रथमं निरूपणं नन्दिकेश्वरेणाकारि न तु भरतमुनिना, किन्तु संयोगात् तन्निर्मितो रससिद्धान्तविषयको ग्रन्थो नाद्यावधि समुपलब्धोऽस्माभिः। यद्यपि वैदिकसाहित्ये रसादिशब्दानामुल्लेखो मिलति परमालङ्कारिकपरम्परायां रसादिस्वरूपनिर्णये नाट्यशास्त्रकर्ता भरतमुनिरेव प्राथम्येन गण्यते। भरतमुनेः पूर्वमपि रसपरम्परा आसीदिति सत्यं, किन्तु तदानीन्तनस्य कस्यचिदपि ग्रन्थस्य तद्ग्रन्थकर्तुश्च प्राप्त्यभावात् आचार्य भरतादेव रस सम्प्रदायस्यारम्भः स्वीक्रियते।

कालिदासस्य रघुवंशमहाकाव्ये 'निषादविद्धाण्डजदर्शनोत्थः श्लोकत्वमापद्यत यस्य शोकः' इति। आनन्दवर्धनस्य ध्वन्यालोके च -

काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।
क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः।।

क्रौञ्चवधस्योल्लेखात् वाल्मीकिरामायणस्य 'शोकः श्लोकत्वमागतः' इति कथनं सम्यगेव वर्तते। आनन्दवर्धनेन अयमेव प्रतीयमानोऽर्थः काव्यात्मत्वेन प्रतिपादितः। अस्मा-द्रसादेव लौकिककाव्यसृष्टेः समारम्भो जातः। अत एव वाल्मीकरचितं रामायणं लौकिक-संस्कृतसाहित्यस्य आदि महाकाव्यत्वेन सादरं स्मर्यते। करुणप्रधानेऽपि तत्र श्रृङ्गारवीरहास्या-दीनामपि यथोचितं सन्निवेशो वरीवर्ति।

रस सम्प्रदायस्य प्रतिष्ठापक आचार्य भरतमुनिः सर्वप्रथममलङ्कारशास्त्रीयपद्धत्या नाट्यशास्त्रे रसभावादीनां प्रामाणिकं साङ्गोपाङ्गं विवेचनमकार्षीत्। तेन विभावानुभावसञ्चारिस्थायिभावादीनां विस्तरेण यत् प्रामाणिकं विवेचनमकारि तदेवोपजीव्यत्वेन स्वीकृत्य परवर्तिभिराचार्यैरपि विभावादिविषये विचारितम्। भरतमुनिप्रणीतं यद् रससूत्रमादाय अलङ्कारशास्त्रे नैके सिद्धान्ताः प्रचलितास्तदस्ति 'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः' इति। यद्यपि नाट्यशास्त्रे मुख्यतया नाट्यदृष्ट्यैवरसादयो विवेचिता मुनिना परं श्रव्यकाव्येऽपि रसस्य तथैव महत्त्वमङ्गीकृतमाचार्यैः।

नाट्यशास्त्रे यद्यपि नृत्तनृत्यवृत्तिप्रवृत्तिसिद्धिस्वरवाद्यभावाभिनयप्रभृतीनामेकविषयाणां विवेचने सत्यपि मुनिना तेषु रसस्यैव प्राधान्यं सर्वाधिकं महत्त्वं च सहर्षं प्रतिपादितमुक्तञ्च 'नहि रसादृते कश्चिदर्थः प्रवर्तते'।

सत्यमेतत् रसं विना नाट्यस्य किं वा श्रव्यकाव्यस्यापि नहि किमपि प्रयोजनं सिद्ध्यति। रसस्य स्वरूपं प्रकाशयता मुनिना स्वयमुक्तम् 'यथा हि नान व्यज्जनसंस्कृतमन्नं भुञ्जाना रसानास्वादयन्ति सुमनसः पुरुषा हर्षादींश्चाधिगच्छन्ति तथा नानाभावाभिनय-व्यञ्जितान् वागङ्गसत्त्वोपेतान् स्थायिभावानास्वादयन्ति सुमनसः प्रेक्षका हर्षादींश्चाधि-गच्छन्ति।'

यथा हि बीजाद्वृक्षः वृक्षाच्च पुष्पाणि तथा फलानि समुद्भवन्ति तथैव प्रकृतस्थले बीजस्थानीयः कविगतो रसः मूलम्, ततो वृक्षस्थस्थानीयं काव्यं नाट्यं च। तत्र पुष्पादिस्थानीयोऽभिनयादिव्यापारः फलस्थानीयश्च सामाजिकरसास्वादः। तेन सकलमपिविश्वं रसमयं जायते। यथोक्तं मुनिना भरतेन -

यथा बीजाद् भवेद्वृक्षो वृक्षात्पुष्पं फलं यथा।
तथा मूलं रसाः सर्वे तेभ्यो भावा व्यवस्थिताः।।

आचार्याभिनवगुप्तेन अभिनवभारत्यामप्येवमेव व्याख्यातम्।

नाट्यशास्त्रानन्तरं दशरूपकाच्च पूर्वं रसादीनां विस्तरेण विवेचनमग्निपुराणस्य ३३९ तमेऽध्याये समुपलभ्यते। अग्निपुराणकारमते वेदान्तादिषु यदक्षरं सनातनमजं विभु चैतन्यरूपं परमं ब्रह्म मन्यते तदेव आनन्दमयमप्यस्ति। तस्य ब्रह्मानन्दस्याभिव्यक्तिं कश्चित् मुक्तात्मैव कर्तुं पारयति। आनन्दस्य सैवाभिव्यक्तिः ज्ञानस्वरूपश्चमत्कारपूर्णो रस इत्युच्यते। यथा हि त्यागंविना लक्ष्मीर्न शोभते तथैव रसंविना वाण्यपि न विभाति। अस्मिन् काव्यसंसारे कविरेवाद्वितीयः प्रजापतिर्यः स्वरुच्यनुसारेण विश्वं

निर्माति। यद्यसौ श्रृङ्गारी भवेत् तदा निखिलं जगद् रसमयं जायते। यदि कदाचिदसौ वितरागः स्यात् तदा तु सर्वमपि नीरसमेव सम्पद्यते। उक्तञ्च तत्रैव -

अपारे काव्यसंसारे कविरेव प्रजापतिः।
यथाऽस्मै रोचते विश्वं तथेदं परिवर्तते।।

श्रृङ्गारी चेत् कविः काव्ये सर्वं रसमयं जगत्।
स एव वीतरागश्चेद् नीरसं व्यक्तमेव तत्।।

नाट्यशास्त्रमिव अग्निपुराणमपि प्रतिपादयति यत् भावाद्विहीनो रसो न भवति भावोऽपि च रसवर्जितः न स्थातुमर्हति। भावा रसान् भावयन्ति रसाश्च तैर्भावैर्भाव्यन्ते। अतो भावानां रसैः सह साक्षात् सम्बन्धो वर्तते। अग्निपुराणे तु सुस्पष्टमुक्तमिदं यत् - वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्। वचनविन्यासे चमत्कारपूर्णे सत्यपि काव्यस्यात्मा तु रस एव। स चानन्दमयः।

आनन्दो हि त्रिविधः - लौकिकानन्दः, काव्यानन्दः, ब्रह्मानन्दश्चेति। तत्र लौकिका-नन्दस्तु लोके मनोऽभिलाषपूर्त्यादिना सरलतया अनुभवितुं शक्यते। एष चानन्दः क्षणिकः। ब्रह्मानन्दस्तु महतः सौभाग्येन तपः पूतात्मभिर्महात्मभिर्यमनियमासनादिभिर्नितान्तं शुद्धान्तः करणैर्योगिभिरेव परब्रह्मणा सह तदाकाराकारितचित्तवृत्तिभिरवाप्यते। आभ्यामुभाभ्या-मपि विलक्षणः आनन्दः काव्यादवाप्यते। स च काव्यानन्दः ब्रह्मानन्दसहोदरोऽपि निगद्यते। सहृदयहृदयाह्लादि शब्दार्थ शरीरस्य काव्यस्य तावत्परमं चरमं च प्रयोजनम् आनन्दप्राप्तिरेव। स चानन्दो रसमयः काव्यादेवावाप्यते। अत एवोक्तमाचार्यमम्मटेन काव्यप्रयोजनविचारणावसरे 'सकलप्रयोजनमौलिभूतं समनन्तरमेव रसास्वादनसमुद्भूतं विगलितवेद्यान्तरमानन्दम्' इत्यादि। एष आनन्दः रजस्तमोगुणावभिभूय सत्त्वगुणस्योद्रेकादखण्डात् स्वप्रकाशमयाद्रसाच्चा-वाप्यते। रस्यते आस्वाद्यत इति रसः। आचार्याभिनवगुप्तेनाप्युक्तम् 'सर्वथा रसनात्मक-वृत्तिविघ्नप्रतीतिग्राह्यो भाव एव रसः' इति। रत्यादयः स्थायिभावा एव काव्ये विभावा-नुभावसञ्चारिभावसंयोगाद् रसे परिणमन्तीत्येतदेव मुनिना रससूत्रे प्रतिपादितम्। यद्यपि रससूत्रमापाततोऽतीव सरलमिव प्रतीयते किन्तु वस्तुतस्तथा नास्ति। तद्व्याख्याकाराणां विविधा व्याख्या विलोक्य सहृदयजिज्ञासूनां मनसि सन्देहसन्दोहः समुत्पद्यते। तत्र रस-सूत्रे संयोगादिति निष्पत्तिरिति च पदयोर्व्याख्यायाम् आचार्येषु विवादो नयनमार्गमधिरोहति।

यद्यपि पण्डितराजजगन्नाथेन रससूत्रस्य व्याख्याविवेचनावसरे एकादशमतानामुल्लेखो विहितः परं तेषु चत्वार्येव मतानि नितान्तं प्रथितानि। तत्र भट्टलोल्लटप्रभृतीनां मतम् आरोपवादोऽथवा रसोत्पत्तिवादो निगद्यते। तन्मते विभावानुभावसञ्चारिभावानां संयोगात् - उत्पाद्योत्पादकभावसम्बन्धाद् रसस्य निष्पत्तिः - उत्पत्तिर्भवति।

लोके हि यानि कारणकार्यसहकारि कारणान्युच्यन्ते तान्येव यदा काव्ये वर्ण्यन्ते तदा विभावनादिव्यापारयोगात् क्रमेण विभावानुभावसञ्चारिभावनाम्ना व्यपदिश्यन्ते।

वासनारूपतया अतीव सूक्ष्मरूपेण सहृदयहृदये विद्यमानान् रत्यादिस्थायिनो विभाव-यन्ति आस्वादाङ्कुरयोग्यतां नयन्तीति विभावाः। ते चालम्बनोद्दीपनभेदाद् द्विविधाः। ये रत्यादिस्थायिभावान् अनुभावयन्ति - अनुभवविषयीकुर्वन्ति तेऽनुभावाः कथ्यन्ते। ये च विशेषेणाभिः सर्वाङ्गव्यापितया रत्यादिस्थायिभावान् काये संचारयन्ति ते व्यभिचारिणः सञ्चारिणो वा भावा उच्यन्ते। उक्तं च -

विशेषादाभिमुख्येन चरणाद् व्यभिचारिणः।
स्थायिन्युमग्ननिर्मग्नाः कल्लोला इव वारिधौ।।

अत एव अनियतत्वादपि हर्षवेगादयो व्यभिचारिभावा उच्यन्ते। सञ्चारिभावास्त्रय-स्त्रिंशत् -

निर्वेदावेगदैन्य श्रममदजडता औग्र्यमोहौ विबोधः,
स्वप्नापस्मारगर्वा मरणमलसतागर्वनिद्रावहित्थाः।
औत्सुक्योन्मादशङ्काः स्मृतिमतिसहिता व्याधिसन्त्रासलज्जा
हर्षासूर्याविषादाः सधृतिचपलता ग्लानिचिन्तावितर्काः।।

स्थायिभावविषये भरतमुनिनोक्तम् -

यथा नराणां नृपतिः शिष्याणां च यथा गुरुः।
एवं हि सर्वभावानां भावः स्थायी महानिह।।

दशरूपककारेण धनञ्जयेन स्थायिभावस्य स्वरूपमेवं निरूपितम् -

विरुद्धैरविरुद्धैर्वा भावैर्विच्छिद्यते न यः।
आत्मभावं नयत्यन्यान् स स्थायी लवणाकरः।।

विभावा अनुभावाः सञ्चारिभावाश्च यं तिरोधातुं समर्था न भवन्ति प्रत्युत रसाविर्भावे यस्यानुकूल्येन साहाय्यमाचरन्ति स स्थायिभाव उच्यते। इमे स्थायिभावाः नवसंख्यकाः सन्ति रतिः, हासः, शोकः, क्रोधः, उत्साहः, भयं, जुगुप्सा, विस्मयः, निर्वेदश्चेति। अथेदानीं भट्टलोल्लटादीनां मतानुसारेण क्रमेण रससूत्रं व्याख्यायते।

भट्टलोल्लटस्योत्पत्तिवादः।

आचार्याभिनवगुप्तेन अभिनवभारत्यां सर्व प्रथमं भट्टलोल्लटमतस्योल्लेखो विहितः। अनेन प्रतीयते यत् नाट्यशास्त्रमाश्रित्य भट्टलोल्लटेनापि काचिद् व्याख्या कृता परं साम्प्रतं सा नोपलभ्यत इति। तन्मते एष रसोत्पत्तिक्रमः - प्रथमं विभावैरालम्बनोद्दीपनकारणै रत्यादिः स्थायिभाव उत्पद्यते। कटाक्षभुजाक्षेपादिभिरनुभावैरसौ प्रतीतियोग्यः क्रियते, निर्वेदावेगादिभिः सञ्चारिभावैश्चोपचीयते। उपचित एव स्थायिभावो रसः। एतन्मते रसोरामादावनुकार्ये तिष्ठति परं तत्र स्थितोऽपि तद्रूपतानुसन्धानात् नटे (पात्रे) आरोप्यते। रसोऽनुकार्यगत इति स्वीकारे सीतादिदर्शनाद्युत्पन्नो रामादिरत्याद्युद्बोधः परिमितः (अल्प-व्यक्तिनियतत्वादल्पपरिमाणः), लौकिकः, नाट्यकाव्यदर्शनादेः सान्तरायः (प्रतिबन्धयुक्तः) च स्यात्। रसो हि पूर्वोक्तधर्मत्रितयविलक्षणः। अत एव अपरिमितोऽलौकिकः निरन्तरायश्चेति नानुकार्यगत इति भावः। उक्तं च आचार्य विश्वनाथेन -

पारिमित्याल्लौकिकत्वात् सान्तरायतया तथा।
अनुकार्यस्य रत्यादेरुद्बोधो न रसो भवेत्।।

एवमेव तेन अनुकर्तरि नटेऽपि रसारोपः भ्रान्तिमूलक एवेति निरगादि। भट्टलोल्लटेन सामाजिकः कथं रसमास्वादत इति न विचारितम्। मीमांसकेन अभिधाप्रियेण चानेन रसस्य विभावादिभिः सह कार्यकारणभावः संबन्ध स्वीकृतः। परमेतन्न समीचीनम् यतः कारणस्य सत्ता कार्यात् पृथगपि सम्भवति परं विभावादीनां तु रसात् पृथक् स्थितिरेव न संभवति। इत्थं रसो नाभिधेया बोध्यः न वाऽनुकार्यगतः, न च उत्पद्यत एव। अतो लोल्लटमतं नितरां हेयमनुपादेयञ्च।

शङ्कुकस्यानुमितिवादः।

नैयायिकमूर्धन्येन शङ्कुकेन भट्टलोल्लटमते न्यूनतामवलोक्य तद्भिन्ना व्याख्या रससूत्रस्योपस्थापिता। तत्कथनस्यायमाशयः विभावादीनां संयोगात् - अनुमाप्यानुमापकभाव सम्बन्धात् रसस्य निष्पत्तिः - अनुमितिर्भवति। अत्र चित्रतुरगादिन्यायेन नटे रामादीनां प्रतीतिर्जायते। एषा प्रतीतिः दर्शनशास्त्रोक्तसम्यङ्मिथ्यासादृश्यं संशय प्रतीतिभ्यो विलक्षणा भवति। अयमभिप्रायः - यथा बालानां चित्रतुरगे वस्तुपरिच्छेदशून्या तुरगोऽयमिति बुद्धिर्भवति तथैव रामोऽयम् इति सम्यङ्मिथ्यादिविलक्षणेन ज्ञानेन ग्राह्ये नटे तेनैव प्रकाशितैस्तत्र असद्भिरपि विभावादिभिः, तन्नियता रतिरनुमीयमानाऽपि निजसौन्दर्यबलात् सामाजिकानाम् आस्वाद्यमानतया चमत्कारमुत्पादयन्ती रसत्वमुपैताति रतेरनुमितिरेव रसनिष्पत्तिः। यथा तुषारावृतप्रदेशे धूमभ्रान्त्या वह्नेरनुमितिस्तथैव नटेन स्वकौशलबलेन ममैवेतेविभावादवः इतित्थं प्रकटितः वस्तुतोऽविद्यमानोऽपि स्थायी सहृदयैरनुमीयते। अनुमीयमानश्चासौ स्वसौन्दर्यबलादास्वाद्यते। एतन्मते रसोऽनुकर्तृगतोऽनुमेयश्च। परमत्रविचारणीयम् - यो हि नटः शिक्षाभ्यासादिभिरनुकार्यस्य रामादेः सरूपताप्रदर्शन एव दत्तावधानः स कथं रसस्यास्वादको भवितुमर्हति? अतएव विश्वनाथेन सजलदजलदगिरा खण्डयतोक्तम् -

शिक्षाभ्यासादिमात्रेण राघवादेः सरूपताम्।
दर्शयन् नर्तको नैव रसस्यास्वादको भवेत्।।

शङ्कुकेन एतदपि विस्मृतं यत् प्रत्यक्षज्ञानमेव चमत्कारं जनयति नानुमितिजन्यम्। किञ्च आलम्बनेनासम्बद्धः सहृदयः कथं रसस्यास्वादने समर्थः स्यात्। अनुभूतिस्तु हृदयेन सम्बद्धा भवति, अनुमितिश्च बुद्धेः प्रक्रिया। तर्हि कथमनुमानेन रसानुभूतिः सम्भवेति सकलमपि नैयायिकप्रवरेण विस्मृतम्। नहि भाण्डस्थितं मोदकसत्तानुमानं कदापि सरसयति रसनारङ्गस्थलम्।

भट्टनायकस्य भुक्तिवादः।

शङ्कुकेन कृतायां रससूत्रस्य उपर्युक्तव्याख्यायामपि काञ्चन न्यूनतामवलोक्य भट्टनायकेन रससूत्रस्य पृथग्व्याख्योपस्थापिता। तन्मते विभावादीनां संयोगात् - भोज्यभोजकभावसम्बन्धात् रसस्य निष्पत्तिः - भुक्तिरिति सूत्रार्थः। एतन्मते रसो नटगतत्वेन, नायकरामादिगतत्वेन, सामाजिकसम्बन्धित्वेन वा नानुमीयते नाप्युत्पद्यते न वा व्यञ्जनया व्यज्यते। ननु कथं तर्हि रसस्य प्रतीतिः स्यादिति चेदुच्यते

- अभिधातिरिक्तेन भावकत्वव्यापारेण विभावादयः शकुन्तलादयः साधारणीक्रियन्ते। भावकत्वं हि वस्तुतो विभावादीनां साधारणीकरणमेव। अथ भोजकत्वव्यापारेण रजस्तमसी अभिभूय सत्त्वगुणस्योद्रेकात् संवित्तिरानन्दमये प्रकाशे विश्राम्यति। संवित्तेः प्रकाशानन्दे विश्राम एव भोगः। तेन विषयीकृतः प्रकाशानन्द एव रसः। इत्थं रसानुभूतौ त्रयो व्यापाराः भवन्ति अभिधया शब्दार्थज्ञानम्, भावकत्वव्यापारेण साधारणीकरणम् अर्थात् विभावादिरूपसीतादयः रामसम्बद्धा सीतात्वरामत्वसम्बन्धांशमपहाय सामान्यतया कामिनीत्वरतित्वादिनैवोपस्थाप्यन्ते। ततः साधारणीकृतविभावादिसहकृतेन भोजकत्वव्यापारेण सा रतिः सहृदयैर्भुज्यते - आस्वाद्यते (असत्या अपि रतेरास्वादोऽलौकिकत्वादुपपद्यते)। एवं भट्टनायकेनैव प्रथमं सहृदयगतो रस इति प्रतिपादितम्। परमस्मिन् व्याख्यानेऽपि भावकत्वभोजकत्वाख्यव्यापारद्वयस्य कल्पना नास्त्यनुभवसिद्धा, अनावश्यकी च प्रमाणाभावात्। न च व्यञ्जनास्थाने तथाविध-भोगाख्य एव कश्चिद् व्यापारः कल्पनीय इति वाच्यम् तथापि भावकत्वरूपाधिक-व्यापारान्तरकल्पनस्यैव दोषत्वात्, इत्यरुचिं मनसि निधाय आचार्याभिनवगुप्तेन तद्भिन्ना तुरीया व्याख्याऽवंतारिता।

अभिनवगुप्तस्याभिव्यक्तिवादः।

अभिनवगुप्तमते विभावानुभावसञ्चारिभावानां व्यङ्ग्यव्यञ्जकभावसम्बन्धाद् रसस्य अभिव्यक्तिर्भवतीति सूत्रार्थः। एतदनुसारेण सहृदयहृदये रत्यादिः स्थायीभावो वासना-रूपेण निरन्तरं सन्निहितो भवति। काव्ये नाट्ये च कारणत्वादिपरिहारेण विभावनादि-व्यापारवत्वादलौकिकविभावादिशब्दव्यवहार्यैः प्रमदादिविभावैः कटाक्षनिःक्षेपाद्यनुभावैः नि-र्वेदादि सञ्चारिभावैश्च यत्किञ्चित्सम्बन्धानवच्छिन्नतया सम्बन्ध विशेष स्वीकारपरिहार-नियमस्यानध्यवसायात् साधारण्येन प्रतीतैरभिव्यक्तः स्थायी रत्यादिः नियतप्रमातृगतोऽपि साधारणीकरणव्यापारेण सहृदयेन स्वाकार इवाभिन्नोऽपि गोचरीक्रियते। विभावादि-जीवितावधिरयं रसः। यथा हि एलामरिचशर्कराकर्पूराम्लिकादि विलक्षणवस्तुसम्पादितोऽपि पानकरसः एला मरीचादि रस वैलक्षण्येन तत्समुदायसंवलनसम्पादितेन अनिर्वचनी-यास्वादेनास्वाद्यते तथैव रसो विभावादिवैलक्षण्येन अलौकिकास्वादेनास्वाद्यत इति भावः।

इत्थं भग्नावरणाचिद्विशिष्टो रत्यादिः स्थायीभावो रसः। अथवा रसो वै सः 'रसं ह्येवायं लब्ध्वाऽऽनन्दीभवति' इत्यादि श्रुतिस्वारस्येन रत्याद्यवच्छिन्ना भग्नावरणा चिदेव रसः।

सोऽयं रसो विभावादिजीवितावधित्वात् कारणे नष्टेऽपि कार्यस्यास्तित्वाच्च न कार्यः। न चायं ज्ञाप्यः विभावादीनां प्राक् तस्य स्थितेरसम्भवात्। इत्थं रसो ज्ञाप्यकार्यविलक्षणः। रसे विभावादीनां स्फुटदर्शनात् अत्र निर्विकल्पकं ज्ञानमपि न प्रवर्तते। सविकल्पकज्ञानं नामजात्यादिसहितं ज्ञेयपदार्थस्य स्फुटप्रतीतिकारकम्। अलौकिकानन्दमयस्य रसस्य स्वसंवेदनसिद्धत्वात् सविकल्पकज्ञानस्याप्यत्र नास्त्यवसरः।

ननु रसो यदि कार्यज्ञाप्यादिविलक्षणस्तर्हि किं स्वरूपोऽसाविति विचिकित्सायां स्वयमुक्तमाचार्य विश्वनाथेन -

सत्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः,
वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः।
लोकोत्तरचमत्कारप्राणः, कैश्चित् प्रमातृभिः।
स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः।।

विभावादिपरामर्शविषयत्वात् सचेतसाम्।
परानन्दमयत्वेन संवेद्यत्वादपि स्फुटम्।।

न निर्विकल्पकं ज्ञानं तस्य ग्राहकमिष्यते।
तथाऽभिलापसंसर्ग योग्यत्वविरहान्न सः।।

सविकल्पक संवेद्यः साक्षात्कारतया न च।
परोक्षस्तत्प्रकाशो नापरोक्षः शब्दसम्भवात्।।

तस्मादलौकिकः सत्यं वेद्यः सहृदयैरयम्।
लोके हि वस्तुविषये जनानां त्रिधा दृष्टिः।।

कानिचिद्वस्तूनि स्वस्यैव, कानिचित् शत्रोरेव कानिचिच्च शत्रुमित्रविलक्षणस्य तटस्थस्य। तत्र यदि स्वकीयत्वेन विभावादयः प्रतीयेरन् तदा इतरसामाजिकसन्निधौ स्वरतिप्रकाशा-ऽनुचित इति लज्जोत्पद्येत। शत्रुसम्बन्धित्वेन प्रतीतौ विद्वेषाविर्भावतया रसास्वादोऽसम्भवः। उदासीनसम्बन्धप्रतीतावपि स्वस्मिन् तदसद्भावाभिसन्धानप्रसङ्गेन नितरामेव रसास्वादो-ऽनुपपन्नः स्यात्। अतएव साधारणीकरणं रसानुभूत्यर्थं परमावश्यकम्। साधारणीकरणे इदं मम, इदं परस्य, इदमुदासीनस्येति सम्बन्धविशेषस्वीकारपरिहारनियमानध्यवसायाद् रस आस्वाद्यते। विभावादयोऽपि प्रथमतः साधारण्येन प्रतीयन्ते। यथोक्तं साहित्यदर्पण-कारेण -

परस्य न परस्येति ममेति न ममेति च।
तदास्वादे विभावादेः परिच्छेदो न विद्यते।।

रसास्वादे हि साधारणीकरणस्य तन्मयी भवनस्य वा अत्यधिकं महत्त्वं वर्तते। काव्ये नाट्ये वा वर्णितेषु विभावानुभावसञ्चारिभावेषु विभावनादिव्यापारः साधारणी-करणं वा एतादृशी काचित् लोकोत्तरा शक्तिर्यत्प्रभावात् सहृदयाः स्वकीय परकीयादि-वैयक्तिकसीमामुल्लङ्घ्य आत्मानं रामहनुमदादिभ्योऽभिन्नं मन्यन्ते, तन्मनसि च रावणवध सागरसन्तरणसदृशा असाधारण व्यापारा अपि साधारणीकृताः सन्तोऽनुभूयन्ते। अत एवोच्यते -

व्यापारोऽस्ति विभावादेर्नाम्ना साधारणीकृतिः।
तत्प्रभावेण यस्यासन् पाथोधिप्लवनादयः।।
प्रमाता तदभेदेन स्वात्मानं प्रतिपद्यते। इति।
साधारण्येन रत्यादिरपि तद्वत्प्रतीयते। इति च।

रसस्य व्यक्तिः साक्षिभास्यत्वं च

मम्मटादिभिराचार्यै विभावादिभिरभिव्यक्तः रत्यादि स्थायी भाव एव रसत्वेन स्वीकृतः। 'व्यक्तः स तैर्विभावाद्यैः स्थायीभावो रसः स्मृतः' इति। अत्र व्यक्तपदेन व्यक्तिविषयीकृत इत्यर्थो गृह्यते। रसनाजन्यास्वादाभिन्न चैतन्यगोचरी कृत इत्यर्थः। यद्यपि व्यक्तिरन्यत्र व्यञ्जना वृत्त्यर्थे प्रसिद्धा परमत्र तु व्यक्तिपदेन भग्नावरणा चिद् गृह्यते। भग्नमावरणम् अज्ञानं यस्यास्तादृशी शुद्धा चिच्चैतन्यम् आस्वाद इह व्यक्तिर्न तु तदास्वादकारणीभूता रसनावृत्तिः। यथा शरावादिना मृत्पात्रविशेषेणाच्छादितो दीपस्तस्यावरणस्य निवृत्तौ स्वयं प्रकाशते स्वसन्निहितान् घटपटादिपदार्थान् च प्रकाशयति तथैव आत्मज्ञानरूपत्वाच्चैतन्यम् अज्ञानरूपावरणस्य विनाशे सन्निहितान् (अन्तः करणवृत्तितया सन्निकृष्टान्) विभावादिभिः सम्बद्धान् रत्यादि स्थायिभावान् प्रकाशयति (चर्वणागोचरीकरोति), स्वयं च 'रसो वै सः' इत्यादिश्रवणात्तदभेदेन प्रकाशते (आस्वादविषयी भवति)।

रत्यादयः स्थायिभावा अप्यन्तः करणधर्मा एव येषामात्मचैतन्यात् प्रकाशनात् साक्षिभास्यत्वं सिद्धयति। साक्षिभास्यत्वं नाम साक्षादात्मना भास्यत्वम्।

ननु मनोबुद्धिरहङ्कारश्चित्तं करणमान्तरम् इति परिभाषितस्यान्तःकरणस्य ये रत्यादयो वासनारूपा धर्मास्ते साक्षादात्मना भासिता भवन्तु नाम परं ये तु घटपटादय इव विभावादयोऽन्तःकरणधर्माद् भिन्ना बाह्यपदार्था अन्तःकरणसंयोगेन परम्परया आत्मना भासनीयास्तेषां कथं साक्षादात्मभास्यत्वमिति विचिकित्सायामुच्यते, विभावादीनामपि स्वप्नतुरगादीनामिव, रङ्गरजतादीनामिव साक्षिभास्यत्वमविरुद्धम्। अयमाशयः - यथा स्वप्नावस्थायां प्रत्यक्षीक्रियमाणा अश्वादयो बाह्यपदार्थाः काल्पनिका इन्द्रियव्यापारोपरमात् साक्षादात्मनैव भास्या भवन्ति। यथा वा जाग्रदवस्थायां चाकचिक्यदोषात् रङ्गे रजतस्य भ्रान्तौ जायमानायां रजतं बाह्यं प्रातिभासिकमितीन्द्रियसंयोगशून्यं साक्षाद् आत्मभास्यम्, तथैव नायिकादयोऽपि बाह्या अपि भावनावलम्बिताः साक्षादात्मभास्या भवन्तीति न कोऽपि विरोधः।

नन्वेवमात्मचैतन्याभिन्नत्वाङ्गीकारे रसस्य नित्यत्वे, उत्पन्नो रसः, विनष्टो रसः इति सर्वानुभवगोचरौ तदुत्पत्तिविनाशौ कथमुपपादनीयाविति शङ्कायामुच्यते - यथा हि वैयाकरणादिमते उत्पन्नो गकारः, विनष्टो गकार इत्यादि प्रतीतिगोचरयोरुत्पत्तिविनाशयोः नित्यवर्णेषु वस्तुतोऽसम्भवात् तद्व्यञ्जककण्ठताल्वादि व्यापारेषु च सम्भवादारोपस्तथैव रसादिषु नित्येषु 'उत्पन्नो रसः' 'विनष्टो रसः' इत्यादि प्रतीतिगोचरयोरुत्पत्तिविनाशयो रसादिव्यञ्जिकायां विभावादिचर्वणायां विद्यमानयोश्चर्वणाविषयीभूतेषु रसादिष्वारोपो विज्ञेयः। यद्यपि रसानन्यतया चर्वणस्यापि न कार्यत्वम् तथापि तस्य कादाचित्कतयोपचरितेन कार्यत्वेन कार्यत्वमुपचर्यते।

नन्वावरणभङ्गे जाते विभावादिचर्वणोपरतावपि रत्यादिस्थायिभावानां कथं न तथा प्रतीतिरिति चेदुच्यते - आवरणभङ्गस्य विभावादिचर्वणावधित्वात्, तस्यां निवृत्तायां प्रकाशस्याऽऽवृतत्वाद् विद्यमानोऽपि स्थायी न प्रकाशते।

इत्थमभिनवगुप्तमम्मटाद्यनुसारेण भग्नावरणा चिद्विशिष्टा रत्यादिः - स्थायीभावो रसः। नन्वेवं रसस्य रत्यादिस्थायिरूपतया चैतन्यभिन्नत्वे चैतन्याभेदप्रतिपादिकाः रसो वै सः, इत्यादि वेदवाक्यानि विरुध्यन्तीति चेदाकर्ण्यताम् 'रसो वै सः' इत्यादि श्रुतिस्वारस्येन रत्याद्यवच्छिन्ना भग्नावरणा चिदेव रसः इत्येवं रससूत्रव्याख्यायां पण्डितराजेन किञ्चित् परिवर्तनमकारि। इत्थं सर्वथैव अस्य विशिष्टात्मनो विशेषमं विशेष्यं वा चिदंशमादाय रसस्य नित्यत्वं स्वप्रकाशत्वं च सिद्धम्।

ननु यथा 'नित्यो रसः, स्वप्रकाशो रसः' इत्यादि व्यवहारा रसविषयका भवन्ति तथैव उत्पन्नो रसः, विनष्टो रसः, इतरभास्यो रस इत्यादयो ये व्यवहारा अपि भवन्ति तेषां कथं सङ्गतिरिति चेदुच्यते - तत्र रसस्य रत्याद्यंशमादाय अनित्यत्वमितरभास्यत्वं च सिद्ध्यति।

न च रसस्य सुखांशभाने किं प्रमाणमिति शङ्कायां वक्तव्यं यत् यथा समाधौ सुखांशभाने सुखमात्यन्तिकं यद् तद् बुद्धिग्राह्यमतीन्द्रियम् इति वाक्यं प्रमाणं तथैव 'रसो वै सः' 'रसं ह्येवायं लब्ध्वाऽऽनन्दीभवति' इत्यादि श्रुतिवाक्यानि प्रमाणानि। किञ्चात्र सकलसहृदयप्रत्यक्षं चेति प्रमाणद्वयमुपलभ्यते।

पण्डितराजजगन्नाथेन अभिनवगुप्तस्य भट्टनायकस्य, प्रथमनव्यमतस्य द्वितीय-नव्यमतस्य च विस्तरेण विवेचनमकारि। तत्र प्रथमनव्यमते रव्यातिशब्दस्योल्लेखाभावेऽपि भावना विशेषरूपस्य दोषस्य महिम्नेति 'शुक्तिकाशकलरजतखण्ड' इति चविलिख्य ख्यातिवादसरणिरेव स्वीकृता। द्वितीयनव्यमते तु व्यञ्जनाव्यापारस्य अनिर्वचनीय-ख्यातेश्चानभ्युपगमेऽपि इत्यादि रूपेण ख्यातिशब्दस्य प्रयोगो विहितः।

भारतीयदर्शनेषु शुक्तौ रजतम्, मरीचिकायां जलम्, स्थाणौ पुरुषः इत्यादि रूपं भ्रमज्ञानं ख्यातिशब्देन व्यवह्रियते। काव्ये साहित्यशास्त्रे चानेकत्र लोकोत्तरत्वप्रतिपादकै-र्वचनैरलौकिकार्थख्यातिवादः प्रतिष्ठित इव प्रतीयते।

पण्डितराजेन द्वयोरपि नव्यमतयो रसो भ्रमात्मकज्ञानतया प्रतिपादितः। प्रथमनव्यमते अनिर्वचनीय ख्यातिवादस्य द्वितीये च नव्यमते निर्वचनीयख्यातिवादस्य दृष्ट्या रसनिष्पत्तिः प्रतिपादिता। तत्र सामान्यदृष्ट्या प्रथमं मतं वेदान्तानुकूलं द्वितीयं च न्यायानुकूलं विद्यते। द्वयोरपि मतयोः प्रथममते पण्डितराजोऽतिशयेन प्रभावितो दृश्यते। यद्यपि प्रायो रसगङ्गाधरो न्यायशास्त्रमनुकरोति तथापि व्यञ्जनया तस्यात्मीयता प्रथममते विलोक्यते। प्रथमनव्यमतानुसारेण सदसच्छब्दैरनिर्वचनीयेयं रतिः भावनारूपदोषाज्जातत्वात् तद्दोषावसानेन सह विनश्यति। यथा रजतस्य भ्रमः शुक्तिविषयकेऽज्ञाने समाप्ते सति समाप्तिमेति। पण्डितराजेनाप्युक्तम् -

'अयं च कार्यो दोषविशेषस्य, नाश्यश्च तन्नाशस्य।' इति। परमत्र जागर्ति प्रश्नो यत् भ्रमरूपाऽनिर्वचनीया रतिरेव रसस्तर्हि रसः कथमानन्दरूपः? इति चेदुच्यते अस्या अनिर्वचनीयाया रतेर्ख्यावहितानन्तरं लोकोत्तराह्लादोऽभूयते। रतिरियं परवर्तिन आनन्दात् पृथक्कृत्य न द्रष्टव्या।

अस्मादियं रतिरेव आनन्द इत्युच्यते। उक्तं च पण्डितराजेन 'स्वोत्तरभाविना लोकोत्तराह्लादेन भेदाग्रहात् सुखपदव्यपदेश्यो भवति। स्वपूर्वोपस्थितेन रत्यादिना तदग्रहात्, तद्रतित्वेन एकत्वाध्यवसानाद् वा व्यङ्ग्यो वर्णनीयश्चोच्यते।'

अत्र द्वौ पदार्थावनिर्वचनीयौ प्रोक्तौ - एकः कल्पितदुष्यन्तत्वं येन प्रमातृचेतनावच्छिन्ना भवति। द्वितीयश्च सा रतिर्याविभावविषयिणी प्रमातृचेतनायामुत्पन्ना। उभावपि शुक्ति सदृशावनिर्वचनीयौ परमार्थतोऽसन्तावपि साक्षिभास्यौ।

एवमत्र पण्डितराजोऽनिर्वचनीयताख्याति माध्यमेन रसस्य निष्पत्तिं साधयति। द्वितीये नव्यमतेऽपि रसो भ्रमरूप एव परमत्र स नह्यनिर्वचनीयः व्यङ्ग्यो वा प्रत्युतानुमेयः। अत्रापि भावनादोषः स्वीकृतः। अस्मिन् मते रसो मानसो बोधः। अत्र शकुन्तलादिविषयकरतेर्भ्रमः प्रमातरि भवति।

पण्डितराजेन अनयोर्मतयोः निरूपणे कस्यचिदपि साहित्यशास्त्रीयाचार्यस्य नामनिर्देशो न कृतः। अनेन प्रतीयते यत् पण्डितराजेन रसनिष्पत्तिसमस्यायाः समाधानार्थं स्वयं शुद्धा दार्शनिकी सरणिः समाश्रिता। दार्शनिकदृष्ट्या रसो हि ज्ञानविशेषः स चायथार्थज्ञानकोटावेव समायति। रसः कल्पनाश्रितो भवति। तन्मूला सामग्री विभावादयः, ते च कल्पनानिर्मिताः। अतः शुद्धदार्शनिकदृष्ट्या रसो भ्रमात्मकज्ञानकोटौ समायातीति नव्यनामाशयः। अस्माकं मते तु आचार्याभिनवगुप्तादिसम्मतं मतमेव प्रशस्यतरमित्यलं पल्लवितेन।

*****

# Module II

## Bhāsa, His Life and Works

महाकवि भासः।

प्रायः संस्कृतकवीनाम् इदं वैशिष्ट्यं यत् तैः स्वजीवनवृतत्त्विषये स्वकृतौ किमपि न लिखितम्। अत एव तेषां जीवनवृत्तविषये निश्चितरूपेण किमपि कथितुमशक्यम्। प्रथमसंस्कृतरूपककारः भासः अस्यापवादः नास्ति, तेन अपि स्वेषु रूपकेषु स्वविषये किमपि न लिखितम्। अत एव अस्य जीवनवृत्तिविषये निश्चितरूपेण किमपि कथितुं न शक्यते।

लेखनाभावेन भासस्य रचनाकालनिर्णये ऐतिहासिकानां भूयान् मतभेदः दृश्यते। अस्मिन्विषये तेषां प्रमुखानि त्रीणि मतानि सन्ति।

प्रथममतम् - भासीयनाटकचक्रस्य आविष्करणख्याता गणपतिशास्त्रिणः पाणिनिचाणक्ययोः अपि पूर्वकाले भासस्य रचनाकालं सिद्ध्यन्ति। यतो हि चाणक्यस्य अर्थशास्त्रे प्रावीण्यवर्णनं च भासस्य चाणक्यात् पूर्ववर्तित्वे प्रमाणत्वेन निर्दिशन्ति। भासेन पाणिनिप्रवर्त्तितनियमानाम् अनुरोधः न आचरितः तेन तस्य पाणिन्यपेक्षया प्राचीनत्वं सिद्धम्। अनेन प्रमाणेन खिस्ताब्दात् पूर्वं पञ्चके शतके भासस्य स्थितकालः कल्प्यते। किन्तु एतत् मतं प्रायः विद्वज्जनानां न सम्मतमस्ति। ते विद्वज्जनाः चाणक्यभासोभयकर्त्तृकतया प्रसिद्धं पद्यम् अन्यस्मादेव ग्रन्थादुद्धृतं मन्यन्ते।

द्वितीयमतम् - डॉ. बार्नेटमहाभागस्तु नाटकचक्रस्य कर्त्तारं 'कल्पितभासं' सप्तमखीस्ताब्दसम्भवं केरलीयं कविं कथयति। यतः तस्यामेव शताब्ध्यां महेन्द्रवीरविक्रम-विरचिते 'मत्तविलास' एतन्नामकेन प्रहसनेन सह भासनाटकचक्रस्य भाषाविषये पारि-भाषिकशब्दविषये च महत्साम्यम् अवलोक्यते। एतदपि मतं विद्वज्जनेभ्यः न रोचते। यतो हि भामहेन बाणभट्टेन च प्रशंस्यमानः भासः भामहबाणभट्टयोः षष्ठखीस्ताब्दात् पुरातनः एव भवितुमर्हति।

तृतीयमतम् - कालिदासेन स्वविरचिते 'मालविकाग्निमित्र' एतन्नामके नाटके 'प्रथितयशसां भाससौमिल्लकविपुत्रादीनाम्' इत्यादरातिशयेन भासस्य प्रचुरा प्रसिद्धिरुक्ता। अतः एव भासः कालिदासात् प्राचीनतरः अस्ति। अश्वघोषेन स्वकृतौ भासः न स्मृतः। अत एव सः अश्वघोषात् उत्तरवर्ती अस्ति। कालिदासस्य रचनाकालः खीस्ताब्दस्य चतुर्थे शतके अश्वघोषस्य स्थितिकालः च खीस्ताब्दस्य प्रथमे शतके अस्ति। अत एव कालिदासास् पूर्ववर्ती अश्वघोषात् परवर्ती भासस्य रचनाकालस्य पूर्वसीमा खीस्ताब्दस्य प्रथमशतकम् अपरसीमा खीस्ताब्दस्य चतुर्थशतकमस्ति।

भासः कालिदासात् पूर्ववर्ती अस्ति। कालिदासस्य रचनाकालः खीस्ताब्दपूर्वं प्रथमशतकमस्ति। अत एव भासस्य रचनाकालस्य अपरसीमा खीस्ताब्दपूर्वं प्रथमशतकमस्ति। यदि भासः पाणिनेः

पूर्ववर्ती न तु तस्य समकालीनः अवश्यमेव अस्ति। पाणिनिकालः खीस्ताब्दपूर्वं पञ्चमशतकम् अस्ति। अत एव भासस्य पूर्वसीमा खीस्ताब्दपूर्वं पञ्चमशतकमस्ति।

भासनाटकचक्रम्।

प्रतिज्ञायौगन्धरायणम्, स्वप्नवासवदत्तम्, अविमारकम्, चारुदत्तम्, प्रतिमानाटकम्, अभिषेकनाटकम्, बालचरितम्, ऊरुभङ्गम्, दूतवाक्यम्, पञ्चरात्रम्, दूतघटोत्कचम्, कर्णभारम्, मध्यमव्यायोगः इत्येतानि त्रयोदश रूपकाणि भासप्रणीतानीति पण्डितानां मतम्। एतानि भासनाटकचक्रमिति व्यवह्रियते। पण्डितेन डॉ. गणपतिशास्त्रिणा समाहृतानि एतानि त्रयोदशरूपकाणि। तेषु हि कानिचिन्महाभारताश्रितानि कतिचित्तु रामायणाश्रितानि अथान्यानितु उदयनचरिताश्रितानि ततोऽन्यानि लोककथाश्रितानि च सन्ति। तथैव सन्ति च कानिचित्स्वकल्पितवृत्ताश्रितानि च। तेषु हि -

रामायणमूलकेषु प्रतिमानाटकमभिषेकश्च। महाभारतमूलेषु मध्यमव्यायोग-दूतघटोत्कच-कर्णभार-ऊरुभङ्ग-दूतवाक्यादीनि। भागवताश्रितं बालचरितम्। कल्पितेतिवृत्तं हि दरिद्रचारुदत्तमविमारकञ्च। प्रतिज्ञायौगन्धरायण-स्वप्नवासवदत्त-अविमारकाणि बृहत्कथामूलकानि मन्यन्ते तत्कपोलकल्पनैव। तद्विपरीतमेतत्सम्भवति यद्बृहत्कथायामेतेभ्य एव कथा सङ्गृहीता स्यात्। अथैतेषां संक्षेपेण परिचयोऽत्रोपस्थाप्यते।

प्रतिज्ञायौगन्धरायणम् - प्रतिज्ञायौगन्धरायणं हि भासस्य प्रथमा कृति स्वप्नवासवदत्तस्य पूर्वपीठिका च। अत्र हि वत्सराजस्योदयनस्य वासवदत्ताहरणवृत्तान्तं वर्णितमस्ति। इदं हि चतुर्ष्वङ्केषु विभक्तम्। नायकोऽस्य यौगन्धरायणो वृत्तफलस्वाम्युदयनः। शत्रुवशीभूतस्योदयनस्य मोक्षाय यौगन्धरायणः प्रतिज्ञानीते करोति च स्वप्रतिज्ञां पूर्णामिति ग्रन्थोऽयमन्वर्थनामा। ग्रन्थमेवामुमनुकरोति विशाखदत्तो मुद्राराक्षसे।

स्वप्नवासवदत्तम् - षष्ठेष्वङ्केषु विभक्तमिदं रूपकं भासस्य सर्वोत्कृष्टा कृतिः। आरुणिनाऽपहृतां वत्सभूमिमुद्दिधीर्षुर्यौगन्धरायणो हि उदयनमन्त्री मगधेशानुकूलनाय तेन सह सम्बन्धाकाङ्क्षया वासवदत्ता दग्धेति मिथ्या प्रचारेण सर्वान् वञ्चयित्वा उदयनस्य मगधराजपुत्र्या पद्मावत्या सह परिणयमारचयति। ततश्च मगधेशसाहाय्येन रूमण्वान् आरुणिं निपात्य उदयनस्य राज्यं पुनः प्रत्यावर्तयति। काले वासवदत्ता च पुनरात्मानं प्रकटीकरोति। दग्धेति मतां वासवदत्तामुदयनः स्वप्ने पश्यतीत्यस्य ग्रन्थस्य स्वप्नवासव-दत्तमिति नामान्वर्थम्। कृतावस्यां भासः सर्वात्मना स्वमवतारयति। अत्र हि तस्य वर्णना-नैपुण्यं स्वाभाविकचित्रणं प्रसङ्गानुकूलभाषाप्रयोगः सरसता सरलता चोदाहरणीयाः सर्वत्र। ग्रन्थमेवामुमनुजीवति रत्नावल्यां श्रीहर्षः। तत्र पद्मावतीस्थाने रत्नावली सागरिकारूपे-णोपस्थापिता।

अविमारकम् - अविमारकं हि षटस्वङ्केषु विभक्तं रूपकम्। अत्र हि काशीयुवराजस्य सौवीरराजधर्मपुत्रस्याविमारकस्य कुन्तीभोजराजकुमार्या कुरङ्ग्या सह प्रमेलीलोप-वर्णिताऽस्ति। अत्र हि न तथा रचनाचमत्कारः प्रतिभाति। सम्भवति भासो हि स्वीयामेव व्यथामत्र प्रकटीकरोति। कुतेरस्या भासप्रणीतत्वापत्तिरपि न तथा युक्तिहीना।

चारुदत्तम् - चारुदत्तं हि नाटकं चतुर्षु अङ्केषु विस्तारितम्। अत्र हि उज्जयिन्याश्चारुदत्तस्य वसन्तसेनाख्यया वेश्यया सह प्रेमविनिमयो वर्णितोऽस्ति। कृति-रियं स्वजातौ प्रथमा यतो हि राजेतरः कश्चिद्विप्रोऽत्र नायकत्वेनोपस्थापितः। अपूर्णमिदं नाटकं भासस्य चरमा कृतिः। अत्र हि चारुदत्तेन सह वसन्तसेनाया अभिसारनिमित्तक-व्यवस्थापर्यन्तैव कथाऽस्ति। तदनुवर्तिना विशालेशेन शूद्रकेन मृच्छकटिकप्रणीय कथैषा पूरितास्ति।

प्रतिमानाटकम् - सप्ताङ्के नाटकेऽस्मिन् रामवनगमनपर्यन्ता कथा संक्षेपे-णोपवर्णिताऽस्ति।

अभिषेकनाटकम् - षडङ्कात्मकं हि नाटकमिदं प्रतिमानाटकस्योत्तरार्द्धम्। अत्र हि रामायणे किष्किन्धा-सुन्दर-युद्धकाण्डगता कथा संक्षिप्योपवर्णिताऽस्ति। इदमेव बालिवधसंज्ञयाऽपि व्यपदिश्यते।

बालचरितम् - बालचरितं हि भागवताश्रितं नाटकम्। इदमेव कंसवधसंज्ञयाऽपि व्यपदिश्यते। अत्र हि कृष्णस्य जन्मत आरभ्य कंसवधपर्यन्ता कथोपवर्णिताऽस्ति।

ऊरुभङ्गम् - रूपकमिदमेकाङ्कि। अत्र हि दुर्योधनस्योरुभङ्गपर्यन्ता कथोप-वर्णिताऽस्ति। सम्भवत इदमेव हि संस्कृतसाहित्ये प्रथमं दुःखान्तनाटकम्।

दूतवाक्यम् - एकाङ्किनाटकमिदं श्रीकृष्णस्य पाण्डवदौत्यकथासम्बद्धम्।

पञ्चरात्रम् - अत्र हि त्रयोऽङ्काः। अत्र हि यज्ञावसाने द्रोणो दक्षिणारूपेण पाण्डवेभ्योऽर्द्धराज्यप्रदानं वृणुते। दुर्योधनोऽपि यजमानः पञ्चरात्राभ्यन्तरे पाण्डवागमने तथाकरणाय प्रतिजानीते। द्रोणस्य प्रयासेन पाण्डवास्तत्रोपतिष्ठति यथा प्रतिश्रुतं हि राज्यार्ध्यं दुर्योधनस्तेभ्यः प्रयच्छति। कथैषा महाभारतकथया सह विवदते।

दूतघटोत्कचम् - एकाङ्केऽस्मिन् रूपकेऽभिमन्युवधानन्तरं श्रीकृष्णः सन्धिप्रस्तावाय घटोत्कचं दूत्ये नियुनक्ति। सोऽपि धृतराष्ट्रसकाशं गत्वा सर्वं निवेद्य कृतानादरो दुर्योधनेन पुनः प्रत्यागच्छति।

कर्णभारम् - एकाङ्के रूपकेऽस्मिन् कर्णस्य ब्राह्मणरूपधारिणे शक्राय कवच-कुण्डलदानेन सह सम्बद्धा कथा वर्णिताऽस्ति।

मध्यमव्यायोगः - व्यायोगेऽस्मिन् भीमेन घटोत्कचाद् ब्राह्मणपुत्ररक्षणं भीमस्य हिडिम्बया सह पुनर्मिलनञ्च वर्णितमस्ति। व्यायोगेऽस्मिन्नस्ति लोकमणिदाहालस्य कलाख्या टीका।

भासस्य रचनावैशिष्ट्यम्।

सम्प्रति संस्कृतवाङ्मये उपलब्धानां रूपकाणां सम्यगनुशीलनेन ज्ञायते यत् भासः रूपककृतानाम् अग्रणी वर्तते। नाटकानां बाहुल्येन विषयवैविध्येन अभिनेयोपयोगित्वेन च तस्य नाट्यनैपुण्यं नाटकनिर्मितौ वैशारद्यं चावधार्यते। भाषायां सरलता, अकृत्रिमा शैली, वर्णनेषु यथार्थता, चरित्रचित्रणे वैयक्तिकत्वम्, घटनसंयोजने सौष्ठवम्, कथाप्रसङ्ग-स्याविच्छिन्नश्च प्रवाहः इत्यादयः तस्य नाटकेषु प्रमुखाः विशेषताः

सन्ति। सर्वाणि नाटकानि अभिनयोपयोग्यानि वर्तन्ते। तस्य नाटकेषु मौलिकता स्वाभाविकता कल्पनावैचित्र्यं च विशेषेणोपलभ्यन्ते। भासः एव एकाङ्किनाटकानां जन्मदाता आसीत्। ऊरुभङ्गम्, दूत-वाक्यम्, दूतघटोत्कचम्, कर्णभारम्, मध्यमव्यायोगः एतानि नाटकानि एकाङ्कानि सन्ति। अस्य अनेकेषु नाटकेषु प्रारम्भे प्रथमे श्लोके मुद्रणालङ्कारेण प्रमुखनाटकीयपात्राणां नामोल्लेखः दृश्यते। यथा स्वप्नवासवदत्ते-

उदयनवेन्दुसवर्णावासवदत्ताबलौ बलस्य त्वाम्।
पद्मावतीर्णपूर्णौ वसन्तकम्रौ भुजौ पाताम्।। (१, १)

क्वचित् पात्राणां संवादोऽपि श्लोकबन्धेन भवति। श्लोकस्य एकः चरणः एकेन प्रयुज्यते। अपरश्चरणः अपरेण पात्रेण प्रयुज्यते। भासः चरित्रचित्रणेऽपि अतिपटः वर्तते। तस्य पात्रेषु स्वयं वैशिष्ट्यं वर्तते। पात्राणां संवादाः संक्षिप्ता अतिसरलाः प्रभावोत्पादकाः सन्ति। भासस्य नाटके अनावश्यकं विस्तारं क्वचिदपि न दृश्यते।

भासस्य भाषा सरला सुबोधा स्वाभाविकी प्रवाहयुक्ता च वर्तते। तस्य भाषायां कृत्रिमतायाः क्लिष्टतायाः समासाधिक्यस्य अभावः परिलक्ष्यते। तस्य शैल्यां माधु-र्यौजप्रसादानां त्रयाणामपि गुणानां समाहारः दृश्यते। तस्य शैली रामायणमहाभारतादि-प्रभाविता अस्ति। तस्य नाटके पितृभक्तिः पातिव्रतम् भ्रातृस्नेहः क्षमाशीलता त्यागादिकं च उपलभ्यते।

सरसता सरलता रम्यता च तस्य नाटकानां लोकप्रियतायाः कारणं वर्तते। तस्य नाटकेषु रसानुकुलैव भाषा अस्ति। रसानुकूलशैल्यां परिवर्तनं च उपलभ्यते। व्यङ्ग्यप्रयोगे भासः असाधारणं वर्तते। यथावसरं व्याकरणादिवैदग्ध्यमपि प्रदर्शयति। विविधरसवर्णने छन्दःप्रयोगे च तस्य नैपुण्यमुपलभ्यते। एवं नाटककविषु भासः सर्वाग्रणीः वर्तते।

## स्वप्नवासवदत्तनाटकस्य कथासंक्षेपः।

### प्रथमाङ्ककथा

उदयनवेन्दुसवर्णावासवदत्ताबलौ... इत्यादि बलरामस्तोत्ररूपेण नान्दीश्लोकेन महाकविभासप्रणीतं स्वप्नवासवदत्तं नाम नाटकमारभ्यते। सूत्रधारस्य विज्ञापनसमये नेपथ्ये भटयोरुत्सारणवाक्यानि श्रूयन्ते। अनन्तरं ब्राह्मणवेषधारी यौगन्धरायणः आवन्तिकावेष-धारिण्या वासवदत्तया सह प्रविशति। तयोः संभाषणेन प्रथमाङ्कः समारब्धः।

वत्सभूमीश्वर उदयनो मृगयाकुतुकी कदाचिल्लावाणकनाम्नो ग्रामाद्विनिर्गतः। तदवसरे यौगन्धरायणप्रभृतयो अमात्याः राज्या वासवदत्तया सह सम्मन्त्र्य ग्रामदाहे 'वासवदत्ता तद्रक्षणपरो यौगन्धरायणश्च भस्मीभूता'विति वार्ता प्रचारयन् परिव्राजकवेषधारी यौगन्धरायणः आवन्तिका वेषधारिण्या वासवदत्तया साकं रंगं प्रविशति।

तदा आश्रमस्थां मातरमभिगम्यानुज्ञातुं तत्रायाति पद्मावती। अयमेवावसर इति मत्वा यौगन्धरायणः, 'मम स्वसारं इमां भवत्या कञ्चित्कालं परिपाल्यमानामिच्छामी'ति पद्मावतीं प्रार्थयते। सा तां स्वीकरोति। अथ भारमर्थमवसितम् मत्वा यौगन्धरायणः विश्राम्यति।

तदा कश्चित् ब्रह्मचारी तत्रागत्य तस्य मार्गखेदमपनीय स्वस्य कथां अग्निना दग्धस्य लावाणकग्रामस्य च वार्ता सविस्तरं वर्णयति।

रङ्गान्ते ब्रह्मचारी ततो यौगन्धरायणश्च रंगान्निर्गतौ। काञ्चुकीयः तापस्या साकं सन्ध्यावन्दनादिनित्यकर्मानुष्ठानाय आश्रमं प्रविशति। एवं प्रथमाङ्कस्य कथा।

द्वितीयाङ्ककथा

अस्याङ्कस्यादौ कन्दुकेन क्रीडन्त्यौ वासवदत्तापद्मावत्यौ परिजनैः सह प्रविशतः। कन्दुकेन क्रीडित्वा अधिकसंजातरागौ पद्मावत्याः हस्तौ परकीयौ संवृत्ताविति वदति वासवदत्ता। पद्मावत्याः मुखकमलं प्रेक्ष्य वासवदत्ता तां उज्जयिनीश्वरस्य प्रद्योतस्य भाविवधूरियमिति परिहसति। गुणधाम इति वत्सराज उदयनः तस्याः भर्ता भवेदिति सा अभिलषतीति चेटी वदति। स राजा विरूपो भवेद्वा इति प्रश्ने, नहि नहि दर्शनीय एव इति वासवदत्ता प्रत्युत्तरयति। उदयनपक्षपातेन समुदाचारमतिक्रान्ता सा 'एवमुज्जयिनीयो जनो मन्त्रयते' इति वदति।

अनन्तरं धात्री प्रविश्य 'पद्मावती वत्सराज उदयनाय दत्तेति वदति। तच्छ्रुत्वा वासवदत्ता अतीव दुःखिता अभवत्। स्वप्रेयस्या विरहेण कातरो राजा तत्सर्वं क्षणेन विस्मृतवानिति भर्त्सयमानां वासवदत्तां प्रति, 'महापुरुषाणां विकृतमपि चित्तं तेषां शास्त्राभ्यासादिजनितसंस्कारेण अचिरादेव पर्यवस्थाप्यत' इति धात्री वदति।

पद्मावती राज्ञा उदयनेन स्वयमेव न वृत्ता, किन्तु कार्यान्तरेण तत्रागतस्य उदयनस्य अभिजनं विज्ञानं वयः रूपं च समीक्ष्य महाराजेन दर्शकेन सा तस्मै दत्ता इति मत्वा वासवदत्ता समाश्वसिति। अथ अपरा चेटी प्रविश्य 'त्वरतां त्वरतां अद्यैव कौतुकमङ्गलं कर्तव्यम्' इति वदति। एतत् श्रुत्वा वासवदत्ता अतीव दुःखिता अभूत्। इयमेव द्वितीयाङ्कगता कथा।

तृतीयाङ्ककथा

विवाहमोदसङ्कुले अन्तःपुरचतुश्शाले पद्मावतीं परित्यज्य स्वात्मानं किञ्चिद्विनोदयितुं वासवदत्ता प्रमदवनं प्राप्ता। अनन्तरं काचिच्चेटी प्रविश्य 'पद्मावतीकौतुकमाला च महाकुलप्रसूतया स्निग्धया निपुणया चावन्तिकयैव वासवदत्तयैव गुम्फनीयेति दर्शकपत्न्याऽऽदिष्टा' इति वासवदत्तां निवेदयति। तमभिप्रायं विज्ञाय 'एतदपि मया कर्तव्यमासीत्, अहो अकरुणा खल्वीश्वराः' इति सा स्वयं निन्दति।

कीदृशो जामाता इति प्रश्ने 'शरचापहीनः कामदेव' इति चेटी प्रत्युत्तरयति। तस्य गुणान् वर्णयितुमारब्धां चेटीं 'अयुक्तं परपुरुषसङ्कीर्तनं श्रोतुं' इत्युक्त्वा सा वारयति। 'तेन हि गुम्फत्वार्या शीघ्रम्, एष जामाता सुमंगलिभिः अन्तः पुरचतुश्शालं प्रवेश्यते' इति वदति चेटी। वासवदत्ता तु पद्मावतीस्नेहपरवशतया यथोचितकार्यव्याकुलतया च केवलं तत्कार्यमङ्गीकृत्य मालां गुम्फयित्वार्पयति।

अनन्तरं, 'अहो अत्याहितम्। आर्यपुत्रोऽपि नाम परकीयः संवृत्तः' इति क्रोशन्ती तत्रापि विनोदमलभमानाऽसौ निद्रयापि तावदंशेनापि स लभ्येत वेति कृत्वा शय्यास्थानमुद्दिश्य गच्छति। एवं तृतीयाङ्कगता कथा।

चतुर्थाङ्ककथा।

उदयनस्य नर्मसचिवस्य वसन्तकनाम्नः विदूषकस्य प्रथमप्रदर्शनं अस्मिन्नङ्के संपद्यते। तस्य प्रवेशनेन चतुर्थोऽङ्कः प्रारभ्यते। राज्ञः उदयनस्य पद्मावतीपरिणयं, स्वस्य भोजनप्रियत्वं च नर्मभाषणेनोक्त्वा विदूषकः उदयनस्य सकाशं गच्छति।

अथ पद्मावती सपरिवारा वासवदत्तया सह शेफालिकागुल्मकाः कुसुमिता नवेति अन्वेष्टुं प्रमदवनं प्रविशति। ताः राजानं वर्णयन्ति। तदा चेटी पद्मावतीनिदेशात् प्रमदवनमागतौ उदयनविदूषकौ मधुकरपरिनिलीनावलम्बतां चालयित्वा वारयति। अनन्तरं विदूषकस्य प्रेरणया सः वासवदत्तायाः गुणान् स्मरति। आत्मनि उदयनस्य स्नेहाधिक्यं तस्य मुखाच्छ्रुत्वा सा वासवदत्ता, 'अज्ञातवासोऽप्यत्र बहुगुणः सम्पद्यते' इति समाश्वसिति। 'उपरता वासवदत्ता' इति विदूषकस्य वचनं श्रुत्वा उदयनः अश्रुपूर्णनेत्रोऽभूत्। तस्य मुखप्रक्षालनस्य नलिनीपत्रेण जलं गृहीत्वा आगतो विदूषकः पद्मावतीं पश्यति। स तु काशपुष्परेणुनाश्रुपूर्णमुदयनस्य मुखमितितां समाश्वासयन् 'स्वीकरोतु इदं मुखोदकम्' इति तां राजान्तिकं नयति।

तत्र पद्मावतीं दृष्ट्वा राजा संभ्रमेण 'नवोद्वाहा इयं बाला सत्यं वेत्थ चेत् दुःखिता भवेदि'ति मत्वा, काशपुष्परेणुपातेनैवाश्रुपातात् इति वदति।

अनन्तरं 'मगधराजस्यापराह्णकाले भवन्तमग्रतः कृत्वा सुहृज्जनसन्दर्शनमुचितं, तस्मादुत्तिष्ठतु भवानि'ति विदूषकः राजानं यथोचितमुपदिशति। विदूषकस्य एतदौचित्यपूर्वां प्रवृत्तिं प्रशंसति राजा। एवं चतुर्थाङ्कस्य कथा।

पञ्चमाङ्ककथा।

स्वप्नवासवदत्ताख्यस्य नाटकस्य अङ्केषु अतीवहृदयावर्जको मुख्यश्च भवति पञ्चमाङ्कः। स्वप्नाङ्कः इति पञ्चमाङ्कस्य अपरं नाम।

पञ्चमाङ्के राजा उदयनः स्वप्ने वासवदत्तां पश्यति। स्वप्नान्ते तां साक्षात्पश्यति च। तदेवास्याङ्कस्य वैशिष्ट्यम्। मृतेति चिन्तितां स्वप्राणेश्वरीं जीवन्तीं दृष्ट्वा स्वप्नो वा विभ्रमो वेति धृतद्वैधीभावो भवति उदयनो राजा।

अङ्कारम्भे पद्मिनिका नाम चेटी प्रविश्य 'पद्मावती शीर्षवेदनया दुःखिता। समुद्रगृहे किल शय्याऽऽस्तीर्णा' इत्यपरां चेटीं कथयति। अनन्तरं राजा उदयनो विदूषकेण सह पद्मावत्यां वृत्तान्तमन्वेष्टुं समुद्रगृहं प्रविशति। तत्र सः शय्यायां पद्मावतीमदृष्ट्वा तत्रैव शेते। विदूषकस्तु प्रावारकं ग्रहीतुं

गच्छति। तदा चेट्या सह तत्रागता वासवदत्ता अन्धकारवृत्ते समुद्रगृहे शय्यायाम् उपविशति। सुप्तो राजा स्वप्ने वासवदत्तां स्मृत्वा विलपति। विलापं श्रुत्वा स राजा उदयन इति ज्ञात्वा यौगन्धरायणस्य प्रतिज्ञा निष्फला संवृत्ता इत्याशङ्क्यमाना सा झटित्युत्थाय गन्तुमभिलषति। शय्याप्रलम्बि तमार्यपुत्रस्य हस्तं शयनीये आरोपयित्वा सा निष्क्रान्ता। तस्याः करस्पर्शेन प्रबुद्धो राजा सहसोत्थाय वासवदत्तां साक्षाद्दृष्ट्वा वासवदत्ते! तिष्ठ! तिष्ठ! इति प्रलापं कृत्वा तामनुसरति। ....किन्तु द्वारपक्षेण ताडितः असौ तामनुसर्तुं न शशाक।

इमां वार्ताम् अतीवदुःखेन सा विदूषकं वदति। 'अस्मिन् राजकुले अवन्तिसुन्दरी नाम यक्षिणी प्रतिवसति, सा त्वया दृष्टा भवेदि'ति प्रतिवदति विदूषकः। वासवदत्तां स्मृत्वा दुःखितस्य तस्य मनोऽन्यतोव्यावर्तयितुं विदूषकः तं श्शालां नयति। तदा दर्शकप्रेषितः पुरुषः आरुणि नाम्नः शत्रोराक्रमणवृत्तान्तेन राजानम् उत्तेजयति।

अस्मिन्नङ्के राजा उदयनो निद्रायां वासवदत्तां दृष्ट्वा परिदेवनं क..। स्वप्नान्ते तां साक्षात्पश्यति च। किन्तु भाग्यविपर्ययेण सा उदयनस्य अपेक्षां तिरस्कृत्य तिरोहिता भवति। एतदेव स्वप्नवासवदत्तमिति नामक रणस्य मर्मभूतं प्रकरणम्। स्वप्ने दृष्टां वासवदत्तामधिकृत्य कृतं नाटकमिति नाम्नो नन्वर्थता। एवं पञ्चमाङ्ककथा।

षष्ठाङ्ककथा।

अङ्कारम्भे राजानं द्रष्टुं महासेनस्य सन्देशवाहको रैभ्यसगोत्रः काञ्चुकीयः प्रविशति। अङ्गारवतीदेव्याः सन्देशेन वासवदत्ताधात्री वसुन्धरा च तत्रागच्छति। नाटकेऽस्मिन् मिश्रविष्कम्भः अत्रैव कृतः।

तदा अन्तःपुरे राजा नर्मदातीराल्लब्धां घोषवतीं नाम वीणां अङ्के कृत्वा वासवदत्तावृत्तान्तं स्मृत्वा मोहं गतः। अथ सः महासेनस्य देव्याः च सन्देशं पद्मावत्या सह श्रृणोति। महासेनस्य महादेव्याः च सन्देशश्रवणेन प्रीतं राजानं उदयनवासवदत्तयोः चित्राङ्कितं फलकं धात्री प्रदर्शयति। तस्मिन् वासवदत्ताया रूपं दृष्ट्वा अस्याः प्रतिकृत्या सदृशी एका तरुणी इहैव प्रतिवसतीति पद्मावती वदति। राजा तां द्रष्टुमभिलषति। केनचिद्ब्राह्मणेन न्यासत्वेन निक्षिप्ता सा परपुरुषदर्शनं नेच्छतीति सा राजानं वदति। तदा ब्राह्मणवेषधारी यौगन्धरायणः प्रविश्य तस्य स्वसारं प्रत्यर्पयितुं प्रार्थयते। ततः तत्रानीतां वासवदत्तां दृष्ट्वा 'इयमस्माकं भर्तृदारिका वासवदत्ता' इति धात्री वदति। राजा उदयनः इदं सर्वं सत्यं वा स्वप्नोवेति भ्राम्यति। यौगन्धरायणः 'देव्यपनयेन कृतापराधः खल्वहं तद् क्षम्यता'मित्युक्त्वा राज्ञः पादयोः पतति। राजा, पद्मावतीपरिणयेन स्वस्य बन्धुबलं वर्धयितुं कृतान् यौगन्धरायणस्य सदुद्यमान् मुक्तकण्ठं प्रशंसति। एवं नायकाभ्युदयेन स्वप्नवासवदत्तं नाटकं यौगन्धरायणस्य भरतवाक्येन सह पर्यवस्यति।

***

स्वप्नवासवदत्तम्

प्रथमोऽङ्कः

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्रधारः -

उदयनवेन्दुसवर्णा
वासवदत्ताबलौ बलस्य त्वाम्।
पद्मावतीर्णपूर्णौ
वसन्तकम्रौ भुजौ पाताम्।।१।।

एवमार्यमिश्रान् विज्ञापयामि। अये किन्नु खलु मयि विज्ञापनव्यग्रे शब्द इव श्रूयते। अङ्ग! पश्यामि।

(नेपथ्ये)

उस्सरह उस्सरह अय्या! उस्सरस

(उत्सरतोत्सरतार्याः! उत्सरत)

सूत्रधारः - भवतु विज्ञातम्।

भृत्यैर्मगधराजस्य स्निग्धैः कन्यानुगामिभिः।
धृष्टमुत्सार्यते सर्वस्तपोवनगतो जनः।। २।।

(निष्क्रान्तः)

स्थापना

प्रथमोऽङ्कः

(प्रविश्य)

भटौ - उस्सरह उस्सरह अय्या! उस्सरह। (उत्सरतोत्सरतार्याः! उत्सरत)

(ततः प्रविशति परिव्राजकवेषो यौगन्धरायणः आवन्तिकवेषधारिणी वासवदत्ता च)

यौगन्धरायणः - (कर्णं दत्वा) कथमिहाप्युत्सार्यते? कुतः -

धीरस्याश्रमसंश्रितस्य वसतस्तुष्टस्य
वन्यैः फलै-
र्मानार्हस्य जनस्य वल्कलवतस्त्रासः
समुत्पाद्यते।
उत्सिक्तो विनयादपेतपुरुषो
भाग्यैश्चलैर्विस्मितः
कोऽयं भो निभृतं तपोवनमिदं
ग्रामीकरोत्याज्ञया।। ३।।

वासवदत्ता - अय्य! को एसो उस्सारेदि? (आर्य! क एष उत्सारयति?)

यौगन्धरायणः - भवति! यो धर्मादात्मानमुत्सारयति।

वासवदत्ता - अय्य! ण हि एव्वं वत्तुकामा, अहं विणाम उस्सारइदव्वा होमित्ति। (आर्य! नह्येवं वक्तुकामा, अहमपि नामोत्सारयितव्या भवामीति।)

यौगन्धरायणः - भवति! एवमनिर्ज्ञातानिदैवतान्यवधूयन्ते।

वासवदत्ता - अय्य! नहि परिस्समो परिखेदं ण उप्पादेदि, जह अअं परिभवो। (आर्य! तथा परिश्रमः परिखेदं नोत्पादयति, यथायं परिभवः।)

यौगन्धरायणः - भुक्तोज्झित एष विषयोऽत्र भवत्या। नात्र चिन्ता कार्या। कुतः -

पूर्वं त्वयाप्यभिमतं गतमेवमासीत्
श्लाघ्यं गमिष्यसि पुनर्विजयेन भर्तुः।
कालक्रमेण जगतः परिवर्तमाना
चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः।। ४।।

भटौ - उस्सरह अय्या! उस्सरह। (उत्सरतार्याः! उत्सरत।)

(ततः प्रविशति काञ्चुकीयः।)

काञ्चुकीयः - सम्भाषक! न खलु न खलूत्सारणा कार्या। पश्य -

परिहरतु भवान् नृपापवादं
न परुषमाश्रमवासिषु प्रयोज्यम्।
नगरपरिभवान् विमोक्तुमेते
वनमभिगम्य मनस्विनो वसन्ति।। ५।।

उभौ - अय्य! तह। (आर्य! तथा।)

(निष्क्रान्तौ)

यौगन्धरायणः -हन्त सविज्ञानमस्य दर्शनम्। वत्से! उपसर्पावस्तावदेनम्।

वासवदत्ता - अय्य! तह। (आर्य! तथा।)

यौगन्धरायणः - (उपसृत्य) भोः! किं कृतेयमुत्सारणा?

काञ्चुकीयः - भोस्तपस्विन्!

यौगन्धरायणः - (आत्मगतम्) तपस्विन्निति गुणवान् खल्वयमालापः। अपरिचयात्तु न श्लिष्यते मे मनसि।

काञ्चुकीयः - भोः! श्रूयताम्। एषा खलु गुरुभिरभिहित नामधेयस्यास्माकं महाराजदर्शकस्य भगिनी पद्मावतीनाम। सैषा नो महाराजमातरं महादेवीमाश्रमस्थामभिगम्यानुज्ञाता तत्र भवत्या राजगृहमेव यास्यति। तद् अद्यास्मिन्नाश्रमपदे वासऽभिप्रेतोऽस्याः। तद्भवन्तः।

तीर्थोदकानि समिधः कुसुमानि दर्भान्
स्वैरं वनादुपनयन्तु तपोधनानि।

धर्मप्रिया नृपसुता नहि धर्मपीडा-

मिच्छेत् तपस्विषु कुलव्रतमेतदस्याः ।। ६ ।।

यौगन्धरायणः - (स्वगतम्) एवम्। एषा सा मगधराजपुत्री पद्मावती नाम, या पुष्पकभद्रादिभिरादेशिकैरादिष्टा स्वामिनो देवी भविष्यतीति। ततः।

प्रद्वेषो बहुमानो वा सङ्कल्पादुपजायते।

भर्तृदाराभिलाषित्वादस्यां मे महती स्वता ।। ७ ।।

वासवदत्ता - (स्वगतम्) राअदारिअत्ति सुणिअ भइणि आसिणेहोविमे एत्थ सम्बज्जइ। (राजदारिकेति श्रुत्वा भगिनिकास्नेहोऽपि मेऽत्र सम्पद्यते।)

(ततः प्रविशति पद्मावती सपरिवारा चेटी च)

चेटी - एदु एदु भट्टिदारिआ; इदं अस्समपदं पविसदु। (एत्वेतु भर्तृदारिका, इदमाश्रमपदं प्रविशतु।)

(ततः प्रविशति उपविष्टा तापसी)

तापसी - सा अदं राअदारिआए। (स्वागतं राजदारिकायाः।)

वासवदत्ता - (स्वगतम्) इ अं सा रा अदारि आ। अभिजणाणु रूपं खुसे रूवं। (इयं सा राजदारिका। अभिजनानुरूपं खल्वस्या रूपम्।)

पद्मावती - अय्ये! वन्दामि। (आर्ये! वन्दे।)

तापसी - चिरं जीव। पविसजादे! पविस। तवोवणाणि णाम अदिहिजणस्स स अगेहं। (चिरं जीव। प्रविश जाते! प्रविश। तपोवनानि नामातिथिजनस्य स्वगेहम्।)

पद्मावती - भोदु भोदु। अय्ये! विस्सत्थम्मीतु। इमिणा बहुमाणवअणेण अणुग्गहिदह्मि। (भवतु भवतु। अर्ये! विश्वस्तास्मि, अनेन बहुमानवचनेनानुगृहीतास्मि।)

वासवदत्ता - (स्वगतम्) णहि रूवं एव्व, वा अवि खुसे महुरा। (नहि रूपमेव, वागपि खल्वस्या मधुरा।)

तापसी - भद्दे! इमं दाव भद्दमुहस्स भइणअं कोच्चिराआ अ वरेदि। (भद्रे! इमां तावद् भद्रमुखस्य भगिनिकां कश्चिद् राजा न वरयति?)

चेटी - अत्थिराआपज्जोदो णाम उज्जइणी ए। सोदार अस्स कारणादो दूदसम्पादं करेदि। (अस्ति राजा प्रद्योतो नामोज्जयिन्याः। स दारकस्य कारणाद् दूतसम्पादं करोति।)

वासवदत्ता - (स्वगतम्) भोदु भोदु। एसा अ अत्तणी आ दाणिं संवुत्ता। (भवतु, भवतु। एषा चात्मीयेदानीं संवृत्ता।)

तापसी - अर्हा खु इ अं आ इदी इमस्स बहुमाणस्स। उभ आणि रा अ उलाणि महत्तराणि त्ति सुणी अदि। (अहो खल्वियमाकृतिरस्य बहुमानस्य। उभे राजकुले महत्तरे इति श्रूयते।)

पद्मावती - अय्य! किं दिट्टो मुणिजणो अत्ताण अणुग्गहीदुं। अभिप्पेदप्पदाणेण तपस्सिजणो उवणिअदुदाव कोकिं एत्थ इच्छदि त्ति। (आर्य! किं दृष्टो मुनिजन आत्मानमनुग्रहीतुम्। अभिप्रेतप्रदानेन तपस्विजन उपनिमन्त्र्यतां तावत् कः किमत्रेच्छतीति।)

काञ्चुकीयः - यदभिप्रेतं भवत्या। भो भो आश्रमवासिनस्तपस्विनः! शृण्वन्तु शृण्वन्तु भवन्तः। इहात्रभवती मगधराजपुत्री अनेन विस्रंभेणोत्पादितविस्रंभा धर्मार्थमर्थेनोपनिमन्त्रयते।

कस्यार्थः कलशेन को मृगयते
वासो यथा निश्चितम्
दीक्षां पारितवान् किमिच्छति पुन-
र्देयं गुरोर्यद्भवेत्।
आत्मानुग्रहमिच्छतीह नृपजा
धर्माभिरामप्रिया
यद्यस्यास्ति समीप्सितं वदतु तत्
कस्याद्य किं दीयताम्।। ८।।

यौगन्धरायणः - (स्वगतम्) हन्त दृष्ट उपायः (प्रकाशम्) भोः! अहमर्थी।

पद्मावती - दिट्टिआ सहळं मे तवोवणाभिगमनं। (दिष्ट्या सफलं मे तपोवनाभिगमनम्।)

तापसी - सन्तुट्ट तपसिजणं इदं अस्समपदं। आअन्तु एण इमिणा हो दव्वं। (सन्तुष्ट तपस्विजनमिदमाश्रमपदम्। आगन्तुकेनानेन भवितव्यम्।)

काञ्चुकीयः - भोः! किं क्रियताम्।

यौगन्धरायणः - इयं मे स्वसा। प्रोषितभर्तृकामिमामिच्छाम्यत्र भवत्या कञ्चित् कालं परिपाल्यमानाम्। कुतः -

कार्यं नैवार्थैर्नापि भोगैर्नवस्त्रै-
र्नाहं काषायं वृत्तिहेतोः प्रपन्नः।
धीरा कन्येयं दृष्टधर्मप्रचारा
शक्ता चारित्रं रक्षितुं मे भगिन्याः।। ९।।

वासवदत्ता - (स्वगतम्) हं इह मं णि क्खि विदुकामो अय्ययोगन्धरायणो। होदु, अविआरिअकमंण करिस्सदि। (हं इह मां निक्षेप्तुकाम आर्ययौगन्धरायणः। भवतु, अविचार्यक्रमं न करिष्यति।)

काञ्चुकीयः - भवति! महती खल्वस्य व्यपाश्रयणा। कथं प्रतिजानीमः कुतः।

सुखमर्थो भवेद् दातुं सुखं प्राणाः सुखं तपः।
सुखमन्यद् भवेत् सर्वं दुःखं न्यासस्य रक्षणम्।। १०।।

पद्मावती - अय्य! पढमं उग्घोसि अ कोकिं इच्छदित्ति अजुत्तं दाणिं वि आरिदुं। जं एसो भणादि, तं अणुचिट्ठदु अय्यो। (आर्य! प्रथममुद्घोष्य कः किमिच्छतीत्ययुक्तमिदानीं विचारयितुम्। यदेष भणति, तदनुतिष्ठत्वार्यः।)

काञ्चुकीयः - अनुरूपमेतद् भवत्याभिहितम्।

चेटी - चिरं जीवदु भट्टिदारिआ एवं सच्चवादिणी। (चिरं जीवतु भर्तृदारिकैवं सत्यवादिनी।)

तापसी - चिरं जीवदु भद्दे! (चिरं जीवतु भद्रे!)

काञ्चुकीयः - भवति! तथा। (उपगम्य) भोः! अभ्युपगतमत्र भवतो भगिन्याः परिपालनमत्र भवत्या।

यौगन्धरायणः - अनुगृहीतोऽस्मि तत्रभवत्या। वत्से! उपसर्पात्र भवतीम्।

वासवदत्ता - (स्वगतम्) कागई। एसा गच्छामि मन्दभा आ। (का गतिः एषा गच्छामि मन्दभागा।)

पद्मावती - भोदु भोदु। अत्तणीआ दाणिं संवुत्ता। (भवतु भवतु। आत्मीयेदानीं संवृत्ता।)

तापसी - जा ईदिसी से आइदी, इयं वि राअदारिअ त्ति तक्केमि। (याईदृशस्या आकृतिः, इयमपि राजदारिकेति तर्कयामि।)

चेटी - सुट्ठु अय्या भणादि। अहं वि अणुहूदसुहत्ति पेक्खामि। (सुष्ठु आर्या भणति। अहमपि अनुभूतसुखेति पश्यामि।)

यौगन्धरायणः - (स्वगतम्) हन्त भोः! अर्धमवसितं भारस्य। यथा मन्त्रिभिः सह समर्थितं, तथा परिणमति। ततः प्रतिष्ठिते स्वामिनि तत्रभवतीमुपनयतो मे इहात्र भवती मगधराजपुत्री विश्वासस्थानं भविष्यति। कुतः -

पद्मावती नरपतेर्महिषी भवत्री
दृष्टा विपत्तिरथ यैः प्रथमं प्रदिष्टा।
तत् प्रत्ययात् कृतमिदं न हि सिद्धवाक्या-
न्युत्क्रम्य गच्छति विधिः सुपरीक्षितानि।। ११।।

(ततः प्रविशति ब्रह्मचारी)

ब्रह्मचारी - (ऊर्ध्वमवलोक्य) स्थितो मध्याह्नः। दृढमस्ति परिश्रान्तः। अथ कस्मिन् प्रदेशे विश्रमयिष्ये? (परिक्रम्य) भवतु, दृष्टं। अभितस्तपोवनेन भवितव्यम्। तथा हि -

विस्रब्धं हरिणाश्चरन्त्यचकिता देशागतप्रत्यया
वृक्षाः पुष्पफलैः समृद्धविटपाः सर्वे दयारक्षिताः।
भूयिष्ठं कपिलानि गोकुलधनान्यक्षेत्रवत्यो दिशो
निस्सन्दिग्धमिदं तपोवनमयं धूमो हि हव्याश्रयः।। १२।।

यावत् प्रविशामि। (प्रविश्य) अये आश्रमविरुद्धः खल्वेष जनः। (अन्यतो विलोक्य) अथवा तपस्विजनोऽप्यत्र। निर्दोषमुपसर्पणम्। अये स्त्रीजनः।

काञ्चुकीयः - स्वैरं स्वैरं प्रविशतु भवान्। सर्वजनसाधारणमाश्रमपदं नाम।

वासवदत्ता - हं।

पद्मावती - अम्मो परपुरुसदंसणं परिहरदि अय्यो। भोदु, सुपरिवाळणी ओ खु मण्णासो। (अम्मो परपुरुषदर्शनं परिहरत्यार्या। भवतु, सुपरिपालनीयः खलु मन्न्यासः।)

काञ्चुकीयः - भोः! पूर्वं प्रविष्टाः स्मः प्रतिगृह्यतामतिथिसत्कारः।

ब्रह्मचारी - (आचम्य) भवतु भवतु। निवृत्तपरिश्रमोऽस्मि।

यौगन्धरायणः - भोः कुत आगम्यते, क्व गन्तव्यं, क्वाधिष्ठानमार्यस्य।

ब्रह्मचारी - भोः! श्रूयताम्। राजगृहतोऽस्मि। श्रुतिविशेषणार्थं वत्सभूमौ लावाणकं नाम ग्रामस्तत्रोषितवानस्मि।

वासवदत्ता - (स्वगतम्) हा ळावाण अं णाम। ळावाण अ संकित्तणेण पुणो णवीकिदो वि अ मे सन्दावो। (हा लावाणकं नाम। लावणकसङ्कीर्तनेन पुनर्नवीकृत इव मे सन्तापः।)

यौगन्धरायणः - अत परिसमाप्ता विद्या।

ब्रह्मचारी - न खलु तावत्।

यौगन्धरायणः - यद्यनवसिता विद्या, किमागमनप्रयोजनम्।

ब्रह्मचारी - तत्र खल्वतिदारुणं व्यसनं संवृत्तम्।

यौगन्धरायणः - कथमिव।

ब्रह्मचारी - तत्रोदयनो नाम राजा प्रतिवसति।

यौगन्धरायणः - श्रूयते तत्र भवानुदयनः किं सः?

ब्रह्मचारी - तस्यावन्तिराजपुत्री वासवदत्ता नाम पत्नी दृढमभिप्रेता किल।

यौगन्धरायणः - भवितव्यम्। ततस्ततः?

ब्रह्मचारी - ततस्तस्मिन् मृगयानिष्क्रान्ते राजनि ग्रामदाहेन सा दग्धा।

वासवदत्ता - (स्वगतम्) अळिणं अळिणं एदं। जीवामि मन्दभाआ। (अलीकमलीकं खलु एतत्। जीवामि मन्दभागा।)

यौगन्धरायणः - ततस्ततः?

ब्रह्मचारी - ततस्तामभ्यवपत्तुकामो यौगन्धरायणो नाम सचिवस्तस्मिन्नेवाग्नौ पतितः।

यौगन्धरायणः - सत्यं पतित इति। ततस्ततः?

ब्रह्मचारी - ततः। प्रतिनिवृत्तो राजा तद्वृत्तान्तं श्रुत्वा तयो वियोगजनितसन्तापस्तस्मिन्नेवाग्नौ प्राणान् परित्यक्तुकामोऽमात्यैर्महता यत्नेन वारितः।

वासवदत्ता - (स्वगतम्) जाणामि जाणामि अय्य उत्तस्समइ साणुक्कोसत्तणं। (जानामि जानाम्यार्यपुत्रस्य मयि सानुक्रोशत्वम्।)

यौगन्धरायणः - ततस्ततः?

ब्रह्मचारी - ततस्तस्याः शरीरोपभुक्तानि दग्धशेषाण्याभरणानि परिष्वज्य राजा मोहमुपगतः।

सर्वे - हा।

वासवदत्ता - (स्वगतम्) सकामो दाणिं अय्यजोअन्धराअणो होदु। (सकाम इदानीमार्य यौगन्धरायणो भवतु।)

चेटी - भट्टिदारिए! रोदिदि खु इअं अय्या। (भर्तृदारिके! रोदिति खल्वियमार्या।)

पद्मावती - साणुक्कोसाए होदव्वं। (सानुक्रोशया भवितव्यम्।)

यौगन्धरायणः - अथ किमथकिम्? प्रकृत्या सानुक्रोशा मे भगिनी। ततस्ततः?

ब्रह्मचारी - ततः शनैः शनैः प्रतिलब्धसंज्ञः संवृत्तः।

पद्मावती - दिट्ठीआ धरइ मोहं गदो त्ति सुणिअ सुण्णंविअ मे हिअअं। (दिष्ट्या ध्रियते। मोहं गत इति श्रुत्वा शून्यमिव मे हृदयम्।)

यौगन्धरायणः - ततस्ततः?

ब्रह्मचारी - ततः स राजा महीतलपरिसर्पणपांसुपाटलशरीरः सहसोत्थाय हा वासवदत्ते! हा अवन्तिराजपुत्रि! हा प्रिये! हा प्रियशिष्ये! इति किमपि किमपि बहु प्रलपितवान्। किं बहुना।

नैवेदानीं तादृशाश्चक्रवाका
नैवाप्यन्ये स्त्रीविशेषैर्वियुक्ताः।
धन्या सा स्त्री यां तथा वेत्ति भर्ता
भर्तृस्नेहात् सा हि दग्धाप्यदग्धा।। १३।।

यौगन्धरायणः - अथ भोः! तं तु पर्यवस्थापयितुं न कश्चित् यत्नवानमात्यः?

ब्रह्मचारी - अस्ति रुमण्यान्नामामात्यो दृढं प्रयत्नवांस्तत्रभवन्तं पर्यवस्थापयितुम्। स हि,

अनाहारे तुल्यः प्रततरुदितक्षामवदनः
शरीरे संस्कारं नृपतिसमदुःखं परिवहन्।
दिवा वा रात्रौ वा परिचरति यत्नैर्न्नरपतिं
नृपः प्राणान् सद्यस्त्यजति यदि तस्याप्युपरमः।। १४।।

वासवदत्ता - (स्वगतम्) दिट्ठिआ सुणिक्खित्तो दाणीं अय्य उत्तो। (दिष्ट्या सुनिक्षिप्त इदानीमार्यपुत्रः।)

यौगन्धरायणः - (स्वगतम्) अहो महद्भारमुद्वहति रुमण्वान्। कुतः -

सविश्रमो ह्ययं भारः प्रसक्तस्तस्य तु श्रमः।
तस्मिन् सर्वमधीनं हि यत्राधीनो नराधिपः।। १५।।

(प्रकाशम्) अथ भोः! पर्यवस्थापित इदानीं स राजा।

ब्रह्मचारी - तदिदानीं न जाने। 'इह तया सह हसितं, इह तया सह कथितं, इह तया सहपर्युषितं, इह तया सह कुपितं, इह तया सहशयितं' इत्येवं तं विलपन्तं राजानममात्यैर्महता यत्नेन तस्माद् ग्रामाद् गृहीत्वापक्रान्तम्। ततो निषक्रान्ते राजनि प्रोषितनक्षत्रचन्द्रमिव नभोऽरमणीयः संवृत्तः स ग्रामः। ततोऽहमपि निर्गतोऽस्मि।

तापसी - सो खु गुणवन्तो णाम राआ, जो आ अन्तु एण विइमिणा एव्वं पसंसीअदि। (स खलु गुणवान् नाम राजा, य आगन्तुकेनाप्यनेनैवं प्रशस्यते।)

चेटी - भट्टिदारिए! किंणुखु अवरा इत्थिआ तस्स हत्थं गमिस्सदि। (भर्तृदारिके! किन्नु खलु अपरा स्त्री तस्य हस्तं गमिष्यति।)

पद्मावती - (स्वगतम्) मम हिअएण एव्व सहमन्तिदं। (मम हृदयेनैव सह मन्त्रितम्।)

ब्रह्मचारी - आपृच्छामि भवन्तौ। गच्छामस्तावत्।

उभौ - गम्यतामर्थसिद्धये।

ब्रह्मचारी - तथास्तु। (निष्क्रान्तः)

यौगन्धरायणः - साधु, अहमपि तत्र भवत्याभ्यनुज्ञातो गन्तुमिच्छामि।

काञ्चुकीयः - तत्र भवत्याभ्यनुज्ञातो गन्तुमिच्छति किल।

पद्मावती - अय्यस्स भइणिआ अय्येण विना उक्कण्ठिस्सिदि। (आर्यस्य भगिनिकार्येण विनोत्कण्ठिष्यते।)

यौगन्धरायणः - साधुजनहस्तगतैषा नोत्कण्ठिष्यति। (काञ्चुकीयमवलोक्य) गच्छामस्तावत्।

काञ्चुकीयः - गच्छतु भवान् पुनर्दर्शनाय।

यौगन्धरायणः - तथास्तु। (निष्क्रान्तः)

काञ्चुकीयः - समय इदानीमभ्यन्तरं प्रवेष्टुं।

पद्मावती - अय्ये! वन्दामि। (आर्ये! वन्दे।)

तापसी - जादे! तव सदिसं भत्तारं लभेहि। (जाते! तव सदृशं भर्तारं लभस्व।)

वासवदत्ता - अय्ये! वन्दामि दाव अहं। (आर्ये! वन्दे तावदहम्।)

तापसी - तुवं पि अइरेण भत्तारं समासादेहि। (त्वमपि अचिरेण भर्तारं समासादय।)

वासवदत्ता - अणुग्गहीतह्मि। (अनुगृहीतास्मि।)

काञ्चुकीयः - तदागम्यताम्, इत इतो भवति!

सम्प्रति हि -

खगा वासोपेताः सलिलमवगाढो मुनिजनः
प्रदीप्तोऽग्निर्भाति प्रविचरति धूमो मुनिवनम्।
परिभ्रष्टो दूराद् रविरपि च संक्षिप्तकिरणो
रथं व्यावृत्यासौ प्रविशति शनैरस्तशिखरम्।। १६।।

(निष्क्रान्ताः सर्वे)

इति प्रथमोऽङ्कः।

अथ द्वितीयोऽङ्कः।

(ततः प्रवितशि चेटी)

चेटी - कुञ्जरीए! कुञ्जरीए! कहिं कहिं भट्टिदारिआ पदुमावदी। किं भणासि, एसा भट्टिदारिआ माहवीळदामण्डपस्सपस्सदो कन्दुएण कीळदित्ति। जाव भट्टिदारिअं उवसप्पामि। (परिक्रव्यावलोक्य) अम्मो इअं भट्टिदारिआ उक्करिदकण्णचूळि एण वाआमसञ्जादसेदबिन्दु विइत्तिदेण परिस्सन्तरमणी अदंसणेण मुहेणकन्दु एण कीळन्ती इदो एव्वआअच्छदि। जाव उवसप्पिसं। (कुञ्जरिके! कुञ्जरिके! कुत्र कुत्र भर्तृदारिका पद्मावती? किं भणसि? एषा भर्तृदारिका माधवीलतामण्डपस्य पार्श्वतः कन्दुकेन क्रीडतीति। यावद् भर्तृदारिकामुपसर्पामि।

अम्मो इयं भर्तृदारिका उत्कृतकर्णचूलिकेन व्यायमसञ्जातस्वेदबिन्दुविचित्रितेन परिश्रान्तरमणीयदर्शनेन मुखेन कन्दुकेन क्रीडन्तीत एवागच्छति। यावदुपसर्प्स्यामि।)

(निष्क्रान्ता)

प्रवेशकः

(ततः प्रविशति कन्दुकेन क्रीडन्ती पद्मावती सपरिवारा वासवदत्तया सह)

वासवदत्ता - हळा! एसो दे कन्दुओ। (हला! एष ते कन्दुकः।)

पद्मावती - अय्ये! भोदु दाणिं एत्तअं। (आर्ये! भवत्विदानीमेतावत्।)

वासवदत्ता - हळा! अदिचिरं कन्दुएण कीळिअ अहिअसञ्जादराआ परकेरआ विअ देहत्था संवुत्ता। (हला! अतिचिरं कन्दुकेन क्रीडित्वाधिकसञ्जातरागौ परकीयाविव ते हस्तौ संवृत्तौ।)

चेटी - कीळदु कीळदु दाव भट्टिदारिअ। णिव्वत्तीअदु दावअअं कण्णाभावरमणीओ काळो। (क्रीडतु क्रीडतु तावद् भर्तृदारिका। निर्वर्त्यतां तावद् अयं कन्याभावरमणीयः कालः।)

पद्मावती - अय्ये! किं दाणिं मं ओहसिदुं विअणिज्झा असि। (आर्ये! किमिदानीं मामपहसितुमिव निध्यायसि?)

वासवदत्ता - णहि णहि। हळा! अधिअं अज्ज सो हदि। अभिदो विअ दे अज्जवरमुहं पेक्खामि। (नहि नहि। हला अधिकमद्यशोभते। अभित इव तेऽद्य वरमुखं पश्यामि।)

पद्मावती - अवेहि। मादाणिं मं ओहस। (अपेहि। मेदानीं मामपहस।)

वासवदत्ता - एसम्मि तुह्णीआ भविस्सम्महासेण वहू! (एषास्मि तूष्णीका भविष्यन्महासेनवधू।)

पद्मावती - को एसो महासेणो णाम। (क एष महासेनो नाम।)

वासवदत्ता - अत्थि उज्जणीओ राआ पज्जोदोणाम। तस्स बळपरिमाणणिव्वुत्तं णामहेअं महासेणोत्ति। (अस्ति उज्जयिन्या राजा प्रद्योतो नाम। तस्य बलपरिमाणनिर्वृत्तं नामधेयं महासेन इति।)

चेटी - भट्टिदारिआ तेण रञ्ञा सह संबन्धं णेच्छदि। (भर्तृदारिका तेन राज्ञा सह संबन्धं नेच्छति।)

वासवदत्ता - अह केण खुदाणिं अभिळसदि? (अथ केन खल्विदानीमभिलषति?)

चेटी - अत्थि वच्छराओ उअअणो णाम। तस्स गुणाणि भट्टिदारिआ अभिळसदि। (अस्ति वत्सराज उदयनो नाम। तस्य गुणान् भर्तृदारिकाभिलषति।)

वासवदत्ता - (स्वगतम्) अय्यउत्तं भत्तारं अभिळसदि। (प्रकाशम्) केण कारणेण। (आर्यपुत्रं भर्तारमभिलषति। केन कारणेन।)

चेटी - साणुक्कोसो त्ति। (सानुक्रोश इति।)

वासवदत्ता - (स्वगतम्) जाणामि। जाणामि अअं विजणो एव्वं उम्मादिदो। (जानामि जानामि। अयमपि जन एवमुन्मादितः।)

चेटी - भट्टिदारिए! जदि सो राआ विरूव भवे? (भर्तृदारिके! यदि स राजा विरूपो भवेत्?)

वासवदत्ता - णहि णहि। दंसणीओ एव्व। (नहि नहि। दर्शनीय एव।)

पद्मावती - अय्ये! कहं तुवं जाणासि? (आर्ये! कथं त्वं जानासि?)

वासवदत्ता - (स्वगतम्) अय्यउत्तपक्खवादेण अदिक्कन्दो समुदाआरो। किं दाणिं करिस्सं। होदु, दिट्ठं। (प्रकाशम्) हळा! एव्वं उज्जइणीओ जणो मन्तेदि। (आर्यपुत्तपक्षपातेनातिक्रान्तः समुदाचारः। किमिदानीं करिष्यामि। भवतु दृष्टम्। हला! एवमुज्जयिन्या जनो मन्त्रयते।)

पद्मावती - जुज्जइ। ण खु एसो उज्झइणीदुळ्ळहो। सव्वजणमणोभिरामं खु सोभग्गं णाम। (युज्यते। न खल्वेष उज्जयिनीदुर्लभः सर्वजनमनोभिरामं खलु सौभाग्यं नाम।)

(प्रविश्य)

धात्री - जेदु भट्टिदारिआ। भट्टिदारिए! दिण्णासि। (जयतु भर्तृदारिका। भर्तृदारिके! दत्तासि।)

वासवदत्ता - अय्ये! कस्स। (आर्ये! कस्मै?)

धात्री - वच्छराअस्स उदअणस्स। (वत्सराजायोदयनाय।)

वासवदत्ता - अह कुसळी सो राआ? (अथ कुशली स राजा?)

धात्री - कुसळी सो आअदो। तस्स भट्टिदारिआ पडिच्छिदाअ। (कुशली स आगतः। अस्य भर्तृदारिका प्रतीष्टा च।)

वासवदत्ता - अच्चाहिदं। (अत्याहितम्।)

धात्री - किं एत्थ अच्चाहिदं? (किमत्रात्याहितम्?)

वासवदत्ता - णहु किञ्चि। तह णाम सन्तप्पिअ उदासीणो होदि त्ति। (न खलु किञ्चित्। तथा नाम सन्तप्योदासीनो भवतीति।)

धात्री - अय्ये! आअमप्पहाणाणि सुळहपय्यवत्थाणाणि महापुरुसहिअआणि होन्ति। (आर्ये! आगमप्रधानानि सुलभपर्यवस्थानानि महापुरुषहृदयानि भवन्ति।)

वासवदत्ता - अय्ये! सअं एव्व तेण वरिदा? (आर्ये! स्वयमेव तेन वरिता?)

धात्री - णहि णहि। अण्णप्पओ अणेण इह आअदस्स अभिजणविञ्ञाणवओरूवं पेक्खिअ सअं एव्वमहाराएण दिण्णा। (नहि नहि। अन्यप्रयोजनेनेहागतस्याभिजनविज्ञानवयोरूपं दृष्ट्वा स्वयमेव महाराजेन दत्ता।)

वासवदत्ता - (स्वगतम्) एव्वं। अणवरद्धो दाणीं एत्थ अय्यउत्तो। (एवं अनपराद्ध इदानीमत्रार्यपुत्रः।)

(प्रविश्यापरा)

चेटी - तुवरदु तुवरदु दाव अय्या। अज्ज एव्व किळ सोभणं णक्खत्तं। अज्ज एव कोदुअम्ङगणं कादव्वंत्ति अम्माणं भट्टिणी भणादि। (त्वरतां त्वरतां तावदार्या। अद्यैव किल शोभनं नक्षत्रम्। अद्यैव कौतुकमंगलं कर्तव्यमित्यस्माकं भट्टिनी भणति।)

वासवदत्ता - (स्वगतम्) जह जह तुवरदि, तह तह अन्धीकरेदिमे हिअअं। (यथा यथा त्वरते, तथा तथान्धीकरोति मे हृदयम्।)

धात्री - एदु, एदु भट्टिदारिआ। (एत्वेतु भर्तृदारिका।)

(निष्क्रान्ताः सर्वे)

इति द्वितीयोऽङ्कः।

अथ तृतीयोऽङ्कः।

(ततः प्रविशति विचिन्तयन्ती वासवदत्ता)

वासवदत्ता - विवाहामोदसङ्कुळे अन्तेउरचउस्साळेपरित्तिजिअ पदुमावदिं इह आअदम्मि पमदवणं। जावदाणिं भाअधेअणिव्वुत्तं दुःखं विणोदेमि। (परिक्रम्य)अहो अच्चाहिदं। अय्यउत्तो विणामपरकेरओ संवुत्तो। जाव उपविसामि। (उपविश्य) धञ्ञा खु चक्कवाअवहू, जा अण्णोण्णविरहिदा ण जीवइ। ण खु अहं पाणाणि परित्तजामि। अय्य उत्तं पेक्खामित्ति एदिणा मणोरहेण जीवामि मन्दभाआ। (विवाहामोदसङ्कुले अन्तःपुरचतुश्शाले परित्यज्यपद्मावतीमिहागतास्मि प्रमदवनम्। यावदिदानीं भागधेयनिर्वृत्तंदुःखं विनोदयामि। अहो अत्याहितम्। आर्यपुत्रोऽपि नामपरकीयः संवृत्तः यावद् उपविशामि। धन्या खलु चक्रवाकवधूः, यान्योन्यविरहिता न जीवति। न खल्वहं प्राणान् परित्यजामि। आर्यपुत्रं पश्यामीति एतेन मनोरथेन जीवामि मन्दभागा।)

(ततः प्रविशति पुष्पाणि गृहीत्वा चेटी)

चेटी - कहिंणुखु गदा अय्या आवन्तिआ। (परिक्रम्यावलोक्य) अम्मो इअं चिन्तासुञ्ञहिअआ णीहारपडिहदचन्दळेहा विअ अमण्डिदभद्दअं वेसंधारअन्दी पिअङ्गुसिळापट्ठए उवविट्ठा। जाव उवसप्पामि। (उपसृत्य) अय्ये! आवन्तिए! को काळो, तुमं अण्णेसामि। (क्वनु खलुगता आर्यावन्तिका। अम्मो इयं चिन्ताशून्यहृदया नीहारप्रतिहतचन्द्रलेखेवामण्डित भद्रकं वेषं धारयन्ती प्रियङ्गुशिलापट्टके उपविष्टा। यावदुपसर्पामि। आर्ये! आवन्तिके! कः कालः, त्वामन्विष्यामि।)

वासवदत्ता - किण्णिमित्तं? (किन्निमित्तम्?)

चेटी - अह्माअं भट्टिणी भणादि - महाकुळप्पसूदासिणिद्धा णि उणा त्ति इमं दाव कोदुअमाळिणं गुह्मदु अय्या। (अस्माकं भट्टिनीभणति - महाकुलप्रसूता स्निग्धा निपुणेति इमां तावत् कौतुकमालिकां गुंफत्वार्या।)

वासवदत्ता - अह कस्स किळ गुह्मिदव्वं? (अथ कस्मै किल गुंफितव्यम्?)

चेटी - अह्माअं भट्टिदारिआए। (अस्माकं भर्तृदारिकायै।)

वासवदत्ता - (स्वगतम्) एदं पि मए कुत्तव्वं आसी अहो अकरुणा खु इस्सरा। (एतदपि मया कर्तव्यमासीत्। अहो अकरुणाः खल्वीश्वराः।)

चेटी - अय्ये! मा दाणिं अञ्ञं चिन्तिअ। एसो जामादुओ मणिभूमीए ह्णाअदि। सिग्घं दाव गुह्मदु अय्या। (आर्ये! मेदानीमन्यच्चिन्तयित्वा। एष जामाता मणिभूम्यां स्नायति। शीघ्रं तावद् गुंफत्वार्या।)

वासवदत्ता - (स्वगतम्) ण सक्कुणोमि। अण्णं चिन्तेदुं। (प्रकाशम्) हळा! किं दिट्ठो जामादुओ? (न शक्नोम्यन्यच्चिन्तयितुम्। हला! किंदृष्टो जामाता?)

चेटी - आमदिट्ठो भट्टिदारिआएसिणेहेण अह्माअं कोदूहळेण अ। (आं दृष्टो भर्तृदारिकायाः स्नेहेनास्माकं कौतूहलेन च।)

वासवदत्ता - कीदिसो जामादुओ? (कीदृशो जामाता?)

चेटी - अय्ये! भणामि जाव, ण ईरिसो दिट्ठपुरुवो। (आर्ये भणामि तावद्, नेदृशो दृष्टपूर्वः।)

वासवदत्ता - हळा! भणाहि भणाहि, किं दंसणीओ? (हला! भण भण, किं दर्शनीयः?)

चेटी - सअं खु भअवं सरचावहीणो कामदेवोत्ति। (स्वयं खलु भगवान् शरचापहीनः कामदेव इति।)

वासवदत्ता - होदु एत्तअं। (भवत्वेतावत्।)

चेटी - किण्णिमित्तं वारेसि? (किन्निमित्तं वारयसि?)

वासवदत्ता - अजूत्तं परपुरुससङ्कीत्तणं सोदुं। (अयुक्तं परपुरुषसङ्कीर्तनं श्रोतुम्।)

चेटी - तेण हि गुह्मदु अय्या सिग्घं। (तेनहि गुंफत्वार्या शीघ्रम्।)

वासवदत्ता - आणेहि। (स्वगतम्) इअं गुह्मामि मन्दभाआ। (वर्जयित्वा विलोक्य) इमं दाव ओसहं किंणाम? (आनय। इयं गुंफामि मन्दभागा। इदं तावदौषधं किं नाम?)

चेटी - अविहवाकरणं णाम। (अविधवाकरणं नाम।)

वासवदत्ता - (स्वगतम्) इदं बहुसो गुह्मिदव्वं मम अ पदुमावदीए अ। (प्रकाशम्) इमं दाव ओसहं किं णाम? (इदं बहुशो गुंफितव्यं मम च पद्मावत्याश्च। इदंतावदौषधं किंनाम?)

चेटी - सवत्तिमदुणं णाम। (सपत्नीवर्दनं नाम।)

वासवदत्ता - इदं ण गुह्मिदव्वं। (इदं न गुंफितव्यम्।)

चेटी - कीस? (कस्मात्?)

वासवदत्ता - उवरदा तस्स भय्या, तंणिप्पओअणं त्ति। (उपरता तस्य भार्या, तन्निष्प्रयोजनमिति।)

(प्रविश्यापरा)

चेटी - तुवरदु तुवरदु अय्या। एसो जामादुओ अविहवाहि अब्भन्तरचउस्साळं पवेसीअदि। (त्वरतां त्वरतामार्या। एषा जामाता अविधवाभिरभ्यन्तरचतुश्शालं प्रवेश्यते।)

वासवदत्ता - अइ! वदामि, गृह्ण एदं। (अयि! वदामि, गृहाणैतत्।)

चेटी - सोहणं। अय्ये! गच्छामि दाव अहं। (शोभनम् आर्ये! गच्छामि तावदहम्.)

(उभे निष्क्रान्ते)

वासवदत्ता - गदा एसा। अहो अच्चाहिदं। अय्य उत्तो वि णाम परकेरओ संवुत्तो। अविदा सय्या ए मम दुक्खं विणोदेमि, जदि णिद्दं ळभामि। (गतैषा। अहो अत्याहितम्। आर्यपुत्रोऽपि नाम परकीयः संवृत्तः। अविदा शय्यायां मम दुःखं विनोदयामी, यदि निद्रां लभे।)

(निष्क्रान्ता)

इति तृतीयोऽङ्कः।

अथ चतुर्थोऽङ्कः।

(ततः प्रविशति विदूषकः)

विदूषकः - (सहर्षम्) भो! दिट्ठिआ तत्तहोदो वच्छराअस्स अभिप्पेदविवाहमंगळरमणिज्जो काळोदिट्ठो। भो! को णाम एदं जाणादि - तादिसे वयं अणत्थसळिळावत्ते पक्खित्ता उण उम्मज्जिस्सामो

त्ति। इदाणिं पासादेसु वसीअदि, अन्देउरदिग्घि आसुह्णाईअदि, पकिदिमउरसुउमाराणि मोदअखज्जआणि खज्जीअन्ति त्ति अणच्छरसं वासो उथ्तरकुरुवासो मए अणुभवीअदि। एक्कोखु महन्तो दोसो, मम आहारो सुट्ठुण परिणमदि। सुप्पच्छदणाए सय्याए णिद्दं ण ळभामि, जह वादसोणिदं अभिदो विअ वत्तदि त्ति पेक्खामि। भोसुहं णामअपरिभूदं अकळ्ळवत्तं च। (भोः! दिष्ट्या तत्र भवतो वत्सराजस्याभिप्रेतविवाहमंगळरमणीयः कालो दृष्टः। भोः! को नामैत्तज्जानाति। तादृशे - वयमनर्थसलिलावर्त्ते प्रक्षिप्ताः। पुनरुन्मङ्क्ष्याम इति। इदानीं प्रासादेषु उष्यते, अन्तःपुरुदीर्घिकासु स्नायते, प्रकृति मधुरसुकुमाराणि मोदकखाद्यानि खाद्यन्त इति अनप्सरस्संवास उत्तरकुरुवासो मयानुभूयते। एकः खलु महान् दोषः, ममाहारः सुष्ठु न परिणमति। सुप्रच्छदनायां शय्यायां निद्रां न लभे, यथावातशोणितमभित इव वर्त्तत इति प्रेक्षे। भो! सुखं नामयपरिभूतमकल्यवर्त्तं च।)

(ततः प्रविशति चेटी)

चेटी - कहिंणुखु गदो अय्यवसन्तओ। (परिक्रम्य) अह्मो एसो अय्यवसन्तओ। (उपगम्य) अय्य! वसन्तअ! को काळो, तुमं अण्णेसामि। (कुत्र नखलु गत आर्यवसन्तकः। अहो एष आर्यवसन्तकः। आर्य! वसन्तक! कः कालः, त्वामन्वेषे।)

विदूषकः - (दृष्ट्वा) किंणिमित्तं भद्दे! मंअण्णेससि? (किन्निमित्तं भद्रे! मामन्वेषसि?)

चेटी - अह्माणं भट्टिणी भणादि - अविह्णादो जामादुओ त्ति। (अस्माकं भट्टिनी भणति - अपि स्नातो जामातेति।)

विदूषकः - किंणिमित्तं भोदि! पुच्छदि? (किन्निमित्तं भवति! पृच्छति?)

चेटी - किमण्णं। सुमणावण्णणं आणेमि त्ति। (किमन्यत्। सुमनोवर्णकमानयामीति।)

विदूषकः - ह्णादो तत्तभवं। सव्वं आणेदु भोदी वज्जिअ भोअणं। (स्नातस्तत्रभवान्। सर्वमानयतु भवती वर्जयित्वा भोजनम्।)

चेटी - किंणिमित्तं वारेसि भोअणं? (किन्निमित्तं वारयसि भोजनम्?)

विदूषकः - अधण्णस्स मम कोइळाणां अक्खि परिवट्टोविअ कुक्खिपरिवट्टो संवुत्तो। (अधन्यस्य मम कोकिलानामक्षिपरिवर्तः इव कुक्षिपरिवर्तः संवृत्तः।)

चेटी - ईदिसो एव्व होहि। (ईदृश एव भव।)

विदूषकः - गच्छदु भोदी। जाव अहंवि तत्तहोदोसआसं गच्छामि। (गच्छतु भवती।यावदहमपि तत्र भवतः सकाशं गच्छामि।)

(निष्क्रान्तौ)

प्रवेशकः

(ततः प्रविशति सपरिवारा पद्मावती आवन्तिकावेषधारिणी वासवदत्ता च)

चेटी - किं णिमित्तं भट्टिदारिआ पमदवणं आअदा? (किन्निमित्तं भर्तृदारिका प्रमदवनमागता?)

पद्मावती - हळा! ताणि दाव सेहाळिआ गुह्मआणि पेक्खामि कुसुमिदाणि वा णवेत्ति। (हला! ते तावत्

शेफालिकागुल्मकाः प्रेक्षे कुसुमिता वा न वेति ।)

चेटी - भट्टिदारिए! ताणि कुसुमिदाणि णाम, पवाळन्तरिदेहिं विअमोत्तिआलंबएहिं आइदाणि कुसुमेहिं । (भर्तृदारिके! ते कुसुमिता नाम, प्रवालान्तरितैरिव मौक्तिका-लंबकैराचिताः कुसुमैः ।)

पद्मावती - हळा! जदि एव्वं, किंदाणिं विळंबेसि? (हला! यद्येवं, किमिदानीं विलंबसे?)

चेटी - तेणहिळमस्सिं सिलावट्टए मुहुत्तअं उपविसदु भट्टिदारिआ। जाव अहं वि कुसुमावचअं करेमि। (तेन ह्यस्मिन् शिलापट्टके मुहूर्त्तकमुपविशतु भर्तृदारिका। यावदहमपि कुसुमावचयं करोमि ।)

पद्मावती - अय्ये! किं एन्थ उपविसामो। (आर्ये! किमत्रोपविशावः ।)

वासवदत्ता - एव्वं होदु। (एवं भवतु ।)

(उभे उपविशतः)

चेटी - (तथा कृत्वा) पेक्खदु पेक्खदु भट्टिदारिआ। अद्धा मणसिळावट्टएहिं विअ सेहाळिआकुसुमेहि पूरिअं मे अञ्जळिं। (पश्यतु पश्यतु भर्तृदारिका। अर्ध मनश्शिलापट्टकैरिव शेफालिकाकुसुमैः पूरितो मेऽञ्जलिः ।)

पद्मावती - (दृष्ट्वा) अहो विइत्तदा कुसुमाणं। पेक्खदु पेक्खदु अय्या। (अहो विचित्रता कुसुमानाम्। पश्यतु पश्यत्वार्या ।)

वासवदत्ता - अहो दस्सणीअदा कुसुमाणं। (अहो दर्शनीयतां कुसुमानाम् ।)

चेटी - भट्टिदारिए! किं भूयो अवइणुस्सं? (भर्तृदारिके! किं भूयोऽवचेष्यामि?)

पद्मावती - हळा! मा मा भूयो अवइणिअ। (हला! मा मा भूयोऽवचित्य ।)

वासवदत्ता - हळा! किंणिमित्तं वारेसि? (हला! किन्निमित्तं वारयसि?)

पद्मावती -अय्यउत्तो इह आअच्छिअ इमं कुसुमसमिद्धिं पेक्खिअ सम्माणिदा भवेअं। (आर्यपुत्र! इहागत्येमां कुसुमसमृद्धिं दृष्ट्वा सम्मानिता भवेयम् ।)

वासवदत्ता - हळा! पिओ दे भत्ता। (हला! प्रियस्ते भर्ता ।)

पद्मावती - अय्ये! ण आणामि, अय्यउत्तेण विरहिदा उक्कण्ठिदा होमि। (आर्ये, न जानामि, आर्यपुत्रेण विरहितोल्क्कण्ठिता भवामि ।)

वासवदत्ता - (स्वगतम्) दुक्खरं खु अहं करेमि इअं विणाम एव्वं मन्तेदि। (दुष्करं खल्वहं करोमि। इयमपि नामैवं मन्त्रयते ।)

चेटी - अभिजातं खु भट्टिदारिआए मन्तिदं - पिओमे भत्तत्ति। (अभिजातं खलु भर्तृदारिकया मन्त्रितं - प्रियो मे भर्तेति ।)

पद्मावती - एक्को खु मे सन्देहं। (एकः खलु मे सन्देहः ।)

वासवदत्ता - किं किं? (किं किम्?)

पद्मावती - जह मम अय्यउत्तो, तह एव्व अय्याए वासवदत्ता एत्ति। (यथा ममार्यपुत्रस्तथैवार्याया वासवदत्ताय इति ।)

वासवदत्ता - अदो वि अधिअं। (अतोऽप्यधिकम्।)

पद्मावती - कहं तुवं जानासि? (कथं त्वां जानासि?)

वासवदत्ता - (स्वगतम्)हं, अय्य उत्तपक्खवादेण अदिक्कन्दो समुदा आरो। एव्वं दाव भणिस्सं। (प्रकाशम्) जइ अप्पो सिणेहो सा सजणं ण परित्तजदि। (हं, आर्यपुत्रपक्षपातेनातिक्रान्तः समुदाचारः। एवं तावद् भणिष्यामि। यद्यल्पः स्नेहः, सा स्वजनं न परित्यजति।)

पद्मावती - होदव्वं। (भवितव्यम्।)

चेटी - भट्टदारिए! साहु भट्टारं भणाहि - अहं पि वीणं सिक्खिस्सामित्ति। (भर्तृदारिके! साधु भर्तारं भण -अहमपि वीणां शिक्षिष्य इति।)

पद्मावती - उत्तो मये अय्यउत्तो। (उक्तो मयार्यपुत्रः।)

वासवदत्ता - तदो किं भणिदं? (ततःकिं भणितम्?)

पद्मावती - अभणिअ किञ्चिदिग्घं णिस्ससिअ तुह्णीओ संवुत्तो। (अभणित्वा किञ्चिद् दीर्घं निःश्वस्य तूष्णीकः संवृत्तः।)

वासवदत्ता - तदो तुवं किं विअ तक्केसि? (ततस्त्वं किमिव तर्कयसि?)

पद्मावती - तक्केमि अय्याए वासवदत्ताए गुणाणि सुमरिअ दक्खिणदा ए मम अग्गदो ण रोदिदित्ति। (तर्कयाम्यार्याया वासवदत्ताया गुणान् स्मृत्वा दक्षिणतया ममाग्रतो न रोदितीति।)

वासवदत्ता - (स्वगतम्) धञ्ञा खुह्मि, जदि एव्वं सच्चं भवे। (धन्या खल्वस्मि, यद्येवं सत्यं भवेत्।)

(ततः प्रविशति राजा विदूषकश्च)

विदूषकः - हीही। पचिअपडिअबन्धुजीवकुसुमविरळवादरमणिज्जं पमदवणं। इदो दाव भवं। (हीही। प्रचितपतितबन्धुजीवकुसुमविरलपातरमणीयं प्रमदवनम्। इतस्तावत् भवान्।)

राजा - वयस्य वसन्तक! अयमयमागच्छामि।

कामेनोज्जयिनीं गते मयि तदा
कामप्यवस्थां गते
दृष्ट्वा स्वैरमवन्तिराजतनयां
पञ्चेषवः पातिताः।
तैरद्यापि सशल्यमेव हृदयं
भूयश्च विद्धा वयं
पञ्चेषुर्मदनो यदा कथमयं
षष्ठः शरः पातितः।। १।।

विदूषकः - कहिंणु खु गदा तत्तहोदी पदुमावदी, ळदामण्डवं गदा भवे, उदाहो असणकुसुमसञ्चिदं वग्घचम्मावगुण्ठिदं विअ पव्वदतिळअं णाम सिळापट्टअं गदा भवे, आदु अधिअकडुअगन्धसत्तच्छदवणं पविट्ठा भवे, अहव आळिहिद-मिअपक्खिसङ्कुळं भारुपव्वदअं गदा भवे। (ऊर्ध्वमवलोक्य) ही ही सरअकाळणिम्मळे अन्तरिक्खे पसादिअबळदेवबाहुदंसणीअं

सारसपन्तिं जाव समाहिदं गच्छन्तिं पाक्खदु दाव भवं। (कुत्र नु खलु गता तत्र भवती पद्मावती, लतामण्डपं गता भवेद्, उताहो असनकुसुमसञ्चितं व्याघ्रचर्मावगुण्ठितमिव पर्वततिलकं नाम शिलापट्टकं गता भवेद्, अथवा अधिककटुकगन्धसप्तच्छदवनं प्रविष्टा भवेद्, अथवालिखितमृगपक्षिसङ्कुलं दारुपर्वतकं गता भवेद्। हीही शरत्कालनिर्मलेऽन्तरिक्षे प्रसारितबलदेवबाहुदर्शनीयां सारसपङ्क्तिं यावत् समाहितं गच्छन्तीं प्रेक्षतां तावद् भवान्।)

राजा - वयस्य! पश्याम्येनाम् -

ऋज्वायतां च विरलां च नतोन्नतां च
सप्तर्षिवंशकुटिलां च निवर्तनेषु।
निर्मुच्यमानभुजगोदर निर्मलस्य
सीमामिवांबरतलस्य विभज्यमानाम्।। २ ।।

चेटी - पेक्खदु पेक्खदु भट्टदारिआ एदं कोकणदमाळापण्डररमणीअं सारसपन्तिं जाव समाहिदं गच्छन्तिं अम्मो भट्टा। (प्रेक्षतां प्रेक्षतां भर्तृदारिका एतां कोकनदमालापाण्डुररमणीयां सारसपङ्क्तिं यावद् समाहितं गच्छन्तिम्। अद्ये भर्ता।)

पद्मावती - हं अय्यउत्तो। अय्ये! तव कारणादो अय्यउत्तदंसणं परिहरामि। ता इमं दाव माहवीळदामण्डवं पविसामो। (हं आर्यपुत्रः आर्ये! तव कारणादार्यपुत्रदर्शनं परिहरामि। तदिमंतावन्माधवीलतामण्डपं प्रविशामः।)

वासवदत्ता - एव्वं होदु। (एवं भवतु।)

(तथा कुर्वन्ति)

विदूषकः - तत्त होदी पदुमावदी इह आ अच्छिअणिग्गदा भवे। (तत्र भवती पद्मावतीहागत्य निर्गता भवेत्।)

राजा - कथं भवान् जानाति?

विदूषकः - इमाणि अवइदकुसुमाणि सेफाळिआगुच्छ आणि पेक्खदु दाव भवं। (इमानपचितकुसुमान् शेफालिकागुच्छकान् प्रेक्षतां तावद् भवान्।)

राजा - अहो विचित्रता कुसुमस्य वसन्तक!

वासवदत्ता - (स्वगतम्) वसन्तअ सङ्कित्तणेण अहं पुण जाणामि उज्जइणिए वत्तामि त्ति। (वसन्तकसङ्कीर्तनेनाहं पुनर्जानामि उज्जयिन्यां वर्त इति।)

राजा - वसन्तक! अस्मिन्नेवासीनौ शिलातले पद्मावतीं प्रतीक्षिष्यावहे।

विदूषकः - भो! तह। (उपविश्योत्थाय) हीही सरअकाळतिक्खो दुस्सहो आदवो। ता इमं दाव माहवीमण्डपं पविसामो। (भोस्तथा। ही ही शरत्कालतीक्ष्णो दुस्सह आतपः तदिमं तावन्माधवीमण्डपं प्रविशावः।)

राजा - बाढम्। गच्छाग्रतः।

विदूषकः - एव्वं होदु। (एवं भवतु।)

(उभौ परिक्रामतः)

पद्मावती - सव्वं आउळं कत्तुकामो अय्य वसन्तओ। किंदाणिं करेह्म? (सर्वमाकुलं कर्तुकाम आर्य वसन्तकः किमिदानीं कुर्मः।)

चेटी - भट्टिदारिए! एदं महुअरपरिणिळीणं ओळं बळदं ओधूय भट्टारं वारइस्सं। (भर्तृदारिके! एतां मधुकरपरिनिलीनामवलंबलतामवधूय भर्तारं वारयिष्यामी।)

पद्मावती - एव्वं करेहि। (एवं कुरु।)

(चेटी तथाकरोति)

विदूषकः - अविह अविह, चिट्ठदु चिट्ठदु दाव भवं। (अविह अविह, तिष्ठतु तिष्ठतु तावद् भवान्।)

राजा - किमर्थम्?

विदूषकः - दासीए पुत्तेहि महुअरेहि पीडिदोह्मि। (दास्याः पुत्रैर्मधुकरैः पीडितोऽस्मि।)

राजा - मामा भवानेवम्। मधुकरसन्त्रासः परिहार्यः। पश्य -

मधुमदकला मधुकरा
मदनार्ताभिः प्रियाभिः रूपगूढाः।
पादन्यासविषण्णा
वयमिव कान्तावियुक्ताः स्युः।। ३ ।।

तस्मादिहै वासिष्यावहे।

विदूषकः - एव्वं होदु। (एवं भवतु।)

(उभावुपदिशतः)

पद्मावती - दिट्ठिआ उपविट्ठो अय्यउत्तो। (दिष्ट्यापोविष्ट आर्यपुत्रः।)

वासवदत्ता -(स्वगतम्) दिट्ठिआ पकिदित्थसरीरो अय्यउत्तो। (दिष्ट्या प्रकृतिस्थशरीर आर्यपुत्रः।)

चेटी - भट्टिदारिए! रुद्धा खु ह्म वयं। भट्टिदारिए! सस्सुप्पादा खु अय्याए दिट्ठी। (भर्तृदारिके! रुद्धाः खलु स्मो वयम्। भर्तृदारिके! साश्रुपाता खल्वार्याया दृष्टिः।)

वासवदत्ता - एसा खु महुअराणं अविणआदो कासकुसुमरेणुणा पडिदेण सोदआ मे दिट्ठी। (एषा खलु मधुकराणामविनयात् काशाकुसुमरेणुना पतितेन सोदका मे दृष्टिः।)

पद्मावती - जूज्जइ। (युज्यते।)

विदूषकः - भो! सुण्णं खु इदं पमदवणं। पुच्छिदव्वं किञ्चि अत्थि। पुच्छामि भवन्तं। (भोः! शून्यं खल्विदं प्रमदवनम्। प्रष्टव्यं किञ्चिदस्ति। पृच्छामि भवन्तम्।)

राजा - छन्दतः।

विदूषकः - का भवदो पिआ, तदाणिं तत्त होदी वासवदत्ता इदाणिं पदुमावदी वा? (का भवतः प्रिया, तदानीं तत्रभवती वासवदत्ता इदानीं पद्मावती वा?)

राजा - किमिदानीं भवान् महति बहुमानसङ्कटे मां न्यस्यति?

पद्मावती - हला! जादिसे सङ्कडे निक्खित्तो अय्यउत्तो। (हला! यादृशे सङ्कटे निक्षिप्त आर्यपुत्रः।)

वासवदत्ता - (स्वगतम्) अहं अ मन्दभाआ। (अहं च मन्दभागा।)

विदूषकः - सेरं सेरं भणादु भवं। एक्का उवरदा, अवरा असण्णिहिदा। (स्वैरं स्वैरं भणतु भवान्। एकोपरता, अपरा असन्निहिता।)

राजा - वयस्य! न खलु ब्रूयाम्। भवां स्तु मुखरः।

पद्मावती - एत्तएण भणिदं अय्यउत्तेण। (एतावता भणितमार्यपुत्रेण।)

विदूषकः - दो! सच्चेण सवामि, कस्सवि ण आचक्खिस्सं। एसो सन्दट्ठा मे जीहा। (भोः! सत्येन थपामि, कस्यापि नाख्यास्यामि। एषा सन्दष्टो मे जिह्वा।)

राजा - नोत्सहे सखे! वक्तुम्।

पद्मावती - अहो इमस्स पुराभाइदा। एत्तिएणहिअअं ण जाणादि। (अहो अस्य पुरोभागिता। एथावता हृदयं न जानाति।)

विदूषकः - किं ण भणादि मम। अणाचक्खिअ इमादो सिळावट्टआदो ण सक्तं एक्कपदं वि गमिदुं। एसो रुद्धो अत्त भवं। (किं न भणति मम। अनाख्यायास्माच्छिलापट्टका-न्नशक्यमेकपदमपि गन्तुम्। एष रुद्धोऽत्रभवान्।)

राजा - किं बलात्कारेण?

विदूषकः - आम, बळक्कारेण। (आम, बलात्कारेण।)

राजा - तेन हि पश्यामस्तावत्।

विदूषकः - पसीददु पसीददु भवं। वअस्सभावेण साविदोसि, जइ सच्चं ण भणासि। (प्रसीदतु प्रसीदतु भवान्। वयस्यभावेन शापितोऽसि, यदि सत्यं न भणसि।)

राजा - का गतिः! श्रूयताम्।

पद्मावती बहुमता
मम यद्यपि रूपशीलमाधुर्यैः।
वासवदत्ता बद्धं
न तु तावन्मे मनो हरति।। ४।।

वासवदत्ता - (स्वगतम्) भोदु भोदु दिण्णं वेदणं इमस्सपरिखेदस्स। अहो अञ्जादवासं पि एत्थ बहुगुणं सम्पज्जइ। (भवतु। भवतु। दत्तं वेतनमस्य परिखेदस्य। अहो अज्ञात-वासोऽप्यत्र बहुगुणः सम्पद्यते।)

चेटी - भट्टिदारिए! अदक्खिञ्ञो खु भट्टा। (भर्तृदारिके! अदाक्षिण्यः खलु भर्ता।)

पद्मावती - हळा! मामा एव्वं। सदक्खिञ्ञो एव्व अय्य उत्तो, जो इदाणिं वि अय्याए वासवदत्ताए गुणाणि सुमरदि। (हला! मामैवं, सदाक्षिण्य एवार्यपुत्रः, य इदानीमप्यार्याया वासवदत्तया गुणान् स्मरति।)

वासवदत्ता - भद्दे! अभिजणस्स सदिसं मन्तिदं। (भद्रे! अभिजनस्य सदृशं मन्त्रिदम्।)

राजा - उक्तं मया। भवानिदानीं कथयतु। का भवतः प्रिया तदा वासवदत्ता, इदानीं पद्मावती वा।

पद्मावती - अय्यउत्तो पि वसन्तओ संवुत्तोः। (आर्यपुत्रोऽपि वसन्तकः संवृत्तः।)

विदूषकः - किं मे विप्पळविदेण। उभओ वि तत्तहोदी ओमे बहुमदा ओ। (किं मे विप्रलपितेन। उभे अपि तत्र भवत्यौ मे बहुमते।)

राजा - वैधेय! मामेवं बलाच्छ्रुत्वा किमिदानीं नाभिभाषसे।

विदूषकः - किं मंपि बळक्कारेण? (किं मामपि बलात्कारेण?)

राजा - अथ किम्? बलात्कारेण।

विदूषकः - तेणहि ण सक्कं सोदुं। (तेन हि न शक्यं श्रोतुम्।)

राजा - प्रसीदतु प्रसीदतु महाब्राह्मणः स्वैरं स्वैरमभिधीयताम्।

विदूषकः - इदाणिं सुणादु भवं। तत्तहोदी वासवदत्तामे बहुमदा। तत्तहोदी पदुमावदी तरुणीदस्सणीआ अकोवणा अणहङ्कारा महुरवाआ सदक्खिञ्ञा। अअं च अवरो महन्तो गुणो, सिणिद्धेण भोअणेण मं पच्चुग्गच्छइ कहिंणुखुगदो अय्य वसन्तओ त्ति। (इदानीं शृणोतु भवान्! तत्र भवती वासवदत्ता मे बहुमता। तत्रभवती पद्मावती तरुणी दर्शनीया अकोपना अनहङ्कारा मधुरवाक् सदाक्षिण्या। अयं चापरो महान् गुणः स्निग्धेन भोजनेन मां प्रत्युत्गच्छति वासवदत्ता कुत्र नु खलु गत आर्यवसन्तक इति।)

वासवदत्ता - भोदु भोदु, वसन्तअ! सुमरेहि दाणिं एदं। (भवतु भवतु वसन्तक! स्मरेदानीमेताम्।)

राजा - भवतु भवतु वसन्तक! सर्वमेतत् कथयिष्ये देव्यै वासवदत्तायै।

विदूषकः - अविहा वासवदत्ता। कहिं वासवदत्ता। चिराखु उवरदा वासवदत्ता। (अविहा वासवदत्ता। कुत्र वासवदत्ता। चिरात् खलूपरता वासवदत्ता।)

राजा - (सविषादम्) एवम्। उपरता वासवदत्ता,

अनेन परिहासेन व्याक्षिप्तं मे मनस्त्वया।
ततो वाणी तथैवेयं पूर्वाभ्यासेन निस्सृता।। ५।।

पद्मावती - रमणीओ खु कहाजोओ णिसंसेण विसंवादिओ। (रमणीयः खलु कथायोगो नृशंसेन विसंवादितः।)

वासवदत्ता - (स्वगतम्) भोदु भोदु, विस्सत्थह्मि। अहो पिअं णाम ईदिसं वअणं अप्पच्चक्खं सुणीअदि। (भवतु भवतु, विश्वस्तास्मि। अहोप्रियं नामेदृशं वचनमप्रत्यक्षं श्रूयते।)

विदूषकः - धारेदु धारेदु भवं। अणदिक्कमणीओ हि विही। ईदिसं दाणि एदं। (धारयतु धारयतु भवान्। अनतिक्रमणीयो हि विधिः ईदृशमिदानीमेतत्।)

राजा - वयस्य! नजानीति भवानवस्थाम्। कुतः -

दुःखं त्यक्तुं बद्धमूलोऽनुरागः
स्मृत्वा स्मृत्वा याति दुःखं भावत्वम्।
यात्रा त्वेषा यद् विमुच्येह बाष्पं
प्राप्तानृण्या याति बुद्धिः प्रसादम्।। ६।।

विदूषकः - अस्सुपादकिळिण्णं खु तत्तहोदो मुहं। जाव मुहोदअं आणेमि। (अश्रुपातक्लिन्नं खलु तत्रभवतो मुखम्। यावन्मुखोदकमानयामि।)

(निष्क्रान्तः)

पद्मावती - अय्ये! बप्फाउळपडन्तरिदं अय्य उत्तस्स मुहं। जाव णिक्कमह्म। (आर्ये! बाष्पाकुलपटान्तरितमार्यपुत्रस्य मुखम्। यावन्निष्क्रामामः।)

वासवदत्ता - एव्वं होदु। अहव चीट्ठतुवं। उक्कण्ठिदं भत्तारं उज्झिअ अजुत्तं णिग्गमणं। अहं एव्वगमिस्सं। (एवं भवतु। अथवा तिष्ठत्वम्। उत्कण्ठितं भर्तारमुज्झित्वा अयुक्तं निर्गमनम्। अहमेव गमिष्यामि।)

चेटी - सुट्ठु अय्या भणादि। उवसप्पदु दाव भट्टिदारिआ। (सुष्ठ्वार्या भणति। उपसर्पतु तावद् भर्तृदारिका।)

पद्मावती - किंणुखु पविसामि। (किन्नु खलु प्रविशामि।)

वासवदत्ता - हळा! पविस। (हला! प्रविश।)

(इत्युक्त्वा निष्क्रान्ता)

(प्रविश्य)

विदूषकः - (नलिनीपत्रेण जलं गृहीत्वा) एसा तत्तहोदी पदुमावदी। (एषा तत्र भवती। पद्मावती।)

पद्मावती - अय्य वसन्तअ! किं एदं? (आर्य! वसन्तक! किमेतत्?)

विदूषकः - एदं इदं। इदं एदं। (एतदिदम्। इदमेतत्।)

पद्मावती - भणादु भणादु अय्यो भणादु। (भणतु भणत्वार्यो भणतु।)

विदूषकः - भोदि! वादणीदेण कासकुसुमरेणुणाअक्खिणिपडिदेण सस्सुपादं खु तत्तहोदो मुहं। ता गह्णदू होदी इदं मुहोदअं। (भवति! वातनीतेन काशकुसुमरेणुनाक्षिनिपतितेन साश्रुपातं खलु तत्र भवतो मुखम्। तद्गृह्णातु भवतीदं मुखोदकम्।)

पद्मावती - अहो सद क्खिञ्ञस्स जणस्स परिजणोवि सदक्खिञ्ञो एव्व खोदि। (उपेत्य) जेदु अय्य उत्तो। इदं मुहोदअं। (अहो सदाक्षिण्यस्य जनस्य परिजनोऽपि सदाक्षिण्य एव भवति। जयत्वार्यपुत्रः। इदं मुखोदकम्।)

राजा - अये पद्मावती। (अपवार्य) वसन्तक! किमिदम्।

विदूषकः - (कर्णे) एव्वं विअ। (एवमिव।)

राजा - साधु वसन्तक! साधु (आचम्य) पद्मावति! आस्यताम्।

पद्मावदी - जं अय्य उत्तो आणवेदि। (उपविशति) (यदार्यपुत्र आज्ञापयति।)

राजा - पद्मावति!

शरच्छशाङ्कगौरवेण वाताविद्धेन भामिनि!
काशपुष्पलवेनेदं साश्रुपातं मुखं मम।। ७।।

(स्वगतम्)

इयं बाला नवोद्वाहा

सत्यं श्रुत्वा व्यथां व्रजेत्।

कामं धीरस्वभावेयं

स्त्रीस्वभावस्तु कातरः ।। ८ ।।

विदूषकः - उइदं तत्तहोदो मअधराअस्स अवरह्णकाळे भवन्तं अग्गदो करिअसुहिज्जणदंसणं। सक्कारो हि नाम सक्कारेण पडिच्छिदो पीदिं उप्पादेदि। ता इट्ठेदु दाव भवं। (उचितं तत्रभवतो मगधराज्यस्यापराह्नकाले भवन्तमग्रतः कृत्वा सुहृज्जनदर्शनम्। सत्कारो हि नाम सत्कारेण प्रतीष्टः प्रीतिमुत्पादयति। तदुत्तिष्ठतु तावद् भवान्।)

राजा - बाढम्। प्रथमः कल्पः। (उत्थाय)

गुणानां वा विशालानां

सत्काराणां च नित्यशः।

कर्तारः सुलभा लोके

विज्ञातारस्तु दुर्लभाः ।। ९ ।।

(निष्क्रान्ताः सर्वे)

इति चतुर्थोऽङ्कः।

अथ पञ्चमोऽङ्कः।

(ततः प्रविशति पद्मिनिका)

पद्मिनिका - महुअरिए! महुअरिए आअच्छदाव सिग्घं। (मधुकरिके! मधुकरिके! आगच्छ तावत् शीघ्रम्।)

(प्रविश्य)

मधुकरिका - हळा! इअह्मि। किं करीअदु? (हला! इयमस्मि। किं क्रियताम्?)

पद्मिनिका - हळा! किं ण जाणासि तुवं भट्टिदारिआ पदुमावदी सीसवेदणाए दुक्खाविदे त्ति। (हला! किं न जानासि त्वं भर्तृदारिक पद्मावती शीर्षवेदनया दुःखितेति।)

मधुकरिका - हधि। (हा धिक्!)

पद्मिनिका - हळा! गच्छ सिग्घं, आय्यं आवन्तिअं सद्दावेहि। केवळं भट्टिदारिआए सीसवेदणं एव्व णिवेदेहि। तदो सअं एव्व आगमिस्सदि। (हला! गच्छ शीघ्रं, आर्यामावन्तिकां शब्दायस्व। केवलं भर्तृदारिकायाः शीर्षवेदनामेव निवेदय। ततः स्वयमेवागमिष्यति।)

मधुकरिका - हळा! किंसा करिस्सदि। (हला! किंसा करिष्यति।)

पद्मिनिका - साहु दाणिं मगुराहि कहाहि भट्टिदारिआए सीसवेदणं विणोदेदि। (सा खल्विदानीं मधुराभिः कथाभिः भर्तृदारिकायाः शीर्षवेदनां विनोदयति।)

मधुकरिका - जुज्जइ। कहिं सअणीयं रइदं भट्टिदारिआए। (युज्यते। कुत्र शयनीयं रचितं भर्तृदारिकायाः।)

पद्मिनिका - समुद्दगिहके किळ सेज्जात्थिण्णा। गच्छदाणि तुवं। अहं वि भट्टिणो णिवेदणत्थं अर्य वसन्तअं अण्णेसामि। (समुद्रगृहके किल शय्यास्तीर्णा। गच्छेदानीं त्वम्। अहमपि भर्त्रे निवेदनार्थमार्यवसन्तकमन्वेषे।)

मधुकरिका - एव्वं होदु। (एवं भवतु।)

(निष्क्रान्ता)

पद्मिनिका - कहिं दाणिं अय्यवसन्तअं पेक्खामि। (कुत्रेदानीमार्यवसन्तकं प्रेक्षे।)

(तत्र प्रविशति विदूषकः)

विदूषकः - अज्ज खु देवीविओअविहुरहिअअस्स तत्तहोदो वच्छराअस्स पदुमावदीपाणि-ग्गहणसमीरिअस्स अच्चन्तसुहावहे मंगळोसवे मदणग्गिदाहो अहिअदरं वड्ढइ। (पद्मिनिकां विलोक्या) अयि पदुमिणिआ। पदुमिणिए! किं इह वत्तदि? (अद्य खलु देवीवियोगविधुरहृदयस्य तत्र भवतो वत्सराजस्य पद्मावतीपाणिग्रहणसमीरित-स्यात्यन्तसुखावहे मङ्गलोत्सवे मदनाग्निदाहोऽधिकतरं वर्धते। अयि पद्मिनिका। पद्मिनिके! किमिह वर्तते?)

पद्मिनिका - अय्य! वसन्तअ! किं ण जणासि तुवं भट्टिदारिआ पदुमावदी सीसवेदणाए दुःखाविदत्ति। (आर्य! वसन्तक! किं न जानासि त्वं भर्तृदारिका पद्मावती शीर्षवेदनया दुःखितेति।)

विदूषकः - भोदि! सच्चं, ण जाणामि। (भवति! सत्यं, न जानामि।)

पद्मिनिका - तेण हि भट्टिणो णिवेदेहि णं। जाव अहं वि सीसाणुळेवणं तुवारेमि। (तेन हि भर्त्रे निवेदयैनाम्। यावदहमपि शीर्षानुलेपनं त्वरयामि।)

विदूषकः - कहिं सअणीअं रइदं पदुमावदीए। (कुत्र शयनीयं रचितं पद्मावत्याः।)

पद्मिनिका - समुद्दगिहके किळ सेज्जात्थिण्णा। (समुद्रगृहके किल शय्यास्तीर्णा।)

विदूषकः - गच्छदु भोदी। जाव अहं वि तत्तहोदो णिवेदइस्सं। (गच्छतु भवती। यावदहमपि तत्र भवते निवेदयिष्यामि।)

(निष्क्रान्तौ)

प्रवेशकः।

(ततः प्रविशति राजा)

राजा - श्लाघ्यामवन्तिनृपतेः सदृशीं तनूजां
कालक्रमेण पुनरागतदारभारः।
लावाणके हुतवहेन हृताङ्गयष्टिं
तां पद्मिनीं हिमहतामिव चिन्तयामि।। १।।

(प्रविश्य)

विदूषकः - तुवरदु तुवरदु दाव भवं। (त्वरतां त्वरतां तावद् भवान्।)

राजा - किमर्थम्?

विदूषकः - तत्तहोदी पदुमावदी सीसवेदणाए दुक्खाविदा। (तत्रभवती पद्मावती शीर्षवेदनया दुःखिता।)

राजा - कैवमाह?

विदूषकः - पदुमिणिआए कहिदं। (पद्मिनिकया कथितम्।)

राजा - भो! कष्टम्।

रूपश्रिया समुदितां गुणतश्च युक्तां
लब्ध्वा प्रियां मम तु मन्द इवाद्य शोकः।
पूर्वाभिघातसरुजोऽप्यनुभूतदुःखः
पद्मावतीमपि तथैव समर्थयामि।। २ ।।

अथ कस्मिन् प्रदेशे वर्तते पद्मावती?

विदूषकः - समुद्दगिहके किळ सेज्जात्थिण्णा। (समुद्रगृहके किल शय्यास्तीर्णा।)

राजा - तेन हि तस्य मार्गमादेशय।

विदूषकः - एदु एदु भवं। (एत्वेतु भवान्।)

(उभौ परिक्रामतः)

विदूषकः - इदं समुद्दगिहकं। पविसदु भवं। (इदं समुद्रगृहकम्। प्रविशतु भवान्।)

राजा - पूर्वं प्रविश।

विदूषकः - भो! तह। (प्रविश्य) अविहा चिट्ठदु चिट्ठदु दाव भवं। (भोः! तथा। अविहा तिष्ठतु तिष्ठतु तावद् भवान्।)

राजा - किमर्थम्?

विदूषकः - एसो खु दीवप्रभावसूइदरुपो वसुधातळे परिवत्तमाणो अअं काओदरो। (एष खलु दीपप्रभावसूचितरूपो वसुधातले परिवर्तमानोऽयं काकोदरः।)

राजा - (प्रविश्यामवलोक्य सस्मितम्) अहो सर्पव्यक्तिर्वैधेयस्य।

ऋज्वायतां हि मुखतोरणलोलमालां
भ्रष्टां क्षितौ त्वमवगच्छसि मूर्ख! सर्पम्।
मन्दानिलेन निशि या परिवर्तमाना
किञ्चित् करोति भुजगस्य विचेष्टितानि।। ३ ।।

विदूषकः - (निरूप्य) सुट्ठु भवं भणादि। णहुअअं काओअरो। (प्रविश्यामवलोक्य) तत्तहोदी पदुमावदी इह आअच्छिअ णिग्गदा भवे। (सुष्ठु भवान् भणति। न खल्वयं काकोदरः तत्र भवती पद्मावतीहागत्य निर्गता भवेत्।)

राजा - वयस्य! अनागतया भवितव्यम्।

विदूषकः - कहं भवं जाणादि? (कथं भवान् जानाति?)

राजा - किमत्र ज्ञेयम्। पश्य -

शय्या नावनता तथास्तृतसमा
न व्याकुलप्रच्छदा
नक्लिष्टं हि शिरोपधानममलं
शीर्षाभिघातौषधैः।
रोगे दृष्टिविलोभनं जनयितुं
शोभा न काचित् कृता
प्राणी प्राप्य रुजा पुनर्न शयनं
शीघ्रं स्वयं मुञ्चति।। ४।।

विदूषकः - तेणहि इमस्सिं सय्याए मुहुत्तअं उवविसिअ तत्तहोदिं पडिवाषेदु भवं। (तेन ह्यस्यां शय्यायां मुहूर्तकमुपविश्य तत्र भवतीं प्रतिपालयतु भवान्।)

राजा - बाढम्। (उपविश्या) वयस्य! निद्रा मां बाधते। कथ्यतां काचित् कथा।

विदूषकः - अहं कहइस्सं। होन्तिं करेदु अत्तभवं। (अहं कथयिष्यामि। हों इति करोत्वत्र भवान्।)

राजा - बाढम्।

विदूषकः - अत्थी णअरी उज्जइणी णाम। तहिं अहिअरमणीआणी उदह्णाणाणि वत्तन्ति किळ। (अस्ती नगर्युज्जयिनी नाम। तत्राधिकरमणीयान्युदकस्नानानि वर्तन्ते किल।)

राजा - कथमुज्जयिनी नाम?

विदूषकः - जइ अणभिप्पेदा एसा कहा, अण्णं कह इस्सं। (यद्यनभिप्रेतैषा कथा, अन्यां कथयिष्यामि।)

राजा - वयस्य! न खलु नाभिप्रेतैषा कथा। किन्तु -

स्मराम्यवन्त्याधिपतेः सुतायाः
प्रस्थानकाले स्वजनं स्मरन्त्याः।
बाष्पं प्रवृद्धं नयनान्तलग्नं
स्नेहान्ममैवोरसि पातयन्त्याः।। ५।।

अपि च -

बहुशोऽप्युपदेशेषु यया मामीक्षमाणया।
हस्तेन स्त्रस्तकोणेन कृतमाकाशवादितम्।। ६।।

विदूषकः - भोदु, अण्णं कहइस्सं। अत्थि णअरं बह्मदत्तं णाम। तहिं किळ राआ कंपिळ्ळो णाम। (भवतु, अन्यां कथयिष्यामि, अस्ति नगरं ब्रह्मदत्तं नाम। तत्र किल राजा काम्पिल्यो नाम।)

राजा - किमिति, किमिति?

विदूषकः - (पुनस्तदेव पठति।)

राजा - मूर्ख! राजा ब्रह्मदत्तः, नगरं काम्पिल्यमित्यभिधीयताम्।

विदूषकः - किं राआ बह्मदत्तो, णअरं कम्पिळ्ळं? (किं राजा ब्रह्मदत्तः, नगरंकाम्पिल्यम्?)

राजा - एवमेतत्।

विदूषकः - तेण हि मुहुत्तअं पडिवाळेदु भवं, जाव ओट्ठगअं करिस्सं। राआ बह्मदत्तो, णअरं कम्पिळ्ळं। (इति बहुशस्तदेव पठित्वा) इदाणिं सुणादु भवं। अयि सुत्तो अत्तभवं। अदिसीदळा इअं वेळा। अत्तणो पावरअं गह्णिअ आ अमिस्सं। (तेन हि मुहूर्तकं प्रतिपालयतु भवान्, यावदोष्ठगतं करिष्यामि। राजा ब्रह्मदत्तः, नगरं काम्पिल्यम्। इदानीं शृणोतु भवान्। अयिसुप्तोऽत्र भवान्। अतिशीतलेयं वेला। आत्मनः प्रावारकं गृहीत्वागमिष्यामि।)

(निष्क्रान्तः)

(ततः प्रविशति वासवदत्ता आवन्तिकवेषेण, चेटी च)

चेटी - एदु एदु अय्या। दिढं खुभट्टि दारिआ सीसवेदणाए दुक्खाविदा। (एत्वेत्वार्या। दृढं खलु भर्तृदारिका शीर्षवेदनया दुःखिताः।)

वासवदत्ता - हद्धि, कहिं सअणीअं रइदं पदुमावदीए? (कुत्र शयनीयं रचितं पद्मावत्या?)

चेटी - समुद्दगिहके किळ सेज्जात्थिण्णा। (समुद्रगृहके किल शय्यास्तीर्णा।)

वासवदत्ता - तेण हि अग्गदो याहि। (तेन हि ह्यग्रतो याहि।)

(उभे परिक्रामतः)

चेटी - इदं समुद्दगिहकं। पविसदु अय्या। जाव अहं वि सीसाणुळेवनं तुवारेमि। (इदं समुद्रगृहकम्। प्रविशत्वार्या। यावदहमपि शीर्षानुलेपनं त्वरयामि।)

(निष्क्रान्ता)

वासवदत्ता - अहो अकरुणा खु इस्सरा मे। विरहपय्युस्सुअस्स अय्यउत्तस्स विस्समत्थाणभूदा इअं पिणाम पदुमावदी अस्सत्था जादा। जाव पविसामि। (प्रविश्यावलोक्य) अहो परिजणस्स पमादो। अस्सत्थं पदुमावदिं केवळं दीवसहाअं करिअपरित्तजदि। इअं पदुमावदी ओसुत्ता। जाव उवविसामि। अहवा अञ्ञासण परिग्गहेण अप्पोविअ सिणेहोपडिभादि। ता इमस्सिं सय्याए उवविसामि। (उपविश्य) किंणुहु एदाए सह उवविसन्तीए अज्ज पहळादिदं विअ मे हिअअं। दिट्ठिआ अविच्छिण्णसुहणिस्सासा। णिव्वुत्तरो आएहोदव्वं। अहव एअदेससंविभाअदाए सअर्णाअस्स सूएदिमं आळिङ्गेहि त्ति। जावसइस्सं। (अहो अकरुणाः खल्वीश्वरा मे। विरहपर्युत्सुकस्यार्यपुत्रस्य विश्रमस्थानभूतेयमपि नाम पद्मावत्यस्वस्था जाता। यावत्प्रविश्यामि। अहो परिजनस्य प्रमादः। अस्वस्थां पद्मावतीं केवलं दीपसहायां कृत्वा परित्यजति। इयं पद्मावत्यवसुप्ता। यावदुपविशामि। अथवान्यासनपरिग्रहेणाल्प इव स्नेहः प्रतिभाति। तदस्यां शय्यायांउपविशामि। किं नु खल्वेतया सहोपविशन्त्या अद्य प्रह्लादितमिव मे हृदयम्। दिष्ट्याविच्छिन्नसुखनिःश्वासा। निवृत्तरोगया भवितव्यम्। अथवैकदेश-संविभागतया शयनीयस्य सूचयति मामालिङ्गेति। यावच्छयिष्ये।)

(शयनं नाटयति)

राजा - (स्वप्नायते)हा वासवदत्ते!

वासवदत्ता - (सहसोत्थाय) हं अय्य उत्तो, णहु पदुमावदी। किंणुखु दिट्ठह्मि। महन्तो खु अय्यजोअन्धराअणस्स पडिण्णाहारो मम दंसणेण णिप्फळो संवुत्तो। (हं आर्यपुत्रः, न खलु पद्मावती। किन्नु खलु दृष्टास्मि। महान् खल्वार्ययौगन्धरायणस्य प्रतिज्ञाभारो ममदर्शनेन निष्फलः संवृत्तः।)

राजा - हा अवन्तिराजपुत्रि!

वासवदत्ता - दिट्ठिआ सिविणाअदि खु अय्यउत्तो। ण एत्थ कोच्चि जणो। जाव मुहुत्तअं चिट्ठि अदिट्ठिं हिअअंच तोसेमि। (दिष्ट्या स्वप्नायते खल्वार्यपुत्रः। नात्रकश्चिज्जनः। यावन्मुहूर्तकं स्थित्वा दृष्टिं हृदयं च तोषयामि।)

राजा - हा प्रिये! हा प्रियशिष्ये! देहिमे प्रतिवचनम्।

वासवदत्ता - आळवामि भट्टा। आळवामि। (आलपामि भर्तः! आलपामि।)

राजा - किं कुपितासि?

वासवदत्ता - णहि णहि, दुक्खिदह्मि। (नहि नहि, दुःखितास्मि।)

राजा - यद्यकुपिता, किमर्थं नालङ्कृतासि?

वासवदत्ता - इदो वरं किं? (इतः परं किम्?)

राजा - किं विरचिकां स्मरसि?

वासवदत्ता - (सरोषम्) आ अवेहि, इहावि विरहिआ। (आ अपेहि, इहापि विरचिका।)

राजा - तेनहि विरचिकार्थं भवतीं प्रसादयामि।

(हस्तौ प्रसारयति)

वासवदत्ता - चिरं ठिदह्मि। को विमं पेक्खे। तागमिस्सं। अहव, सय्यावळंबिअं अय्य उत्तस्स हत्थं सअणीए आरोविअ गमिस्सं। (चिरं स्थितास्मि। कोऽपि मां पश्येत्। तद्गमिष्यामि। अथवा, शय्यावलंबितमार्यपुत्रस्य हस्तं शयनीय आरोप्य गमिष्यामि।)

(तथाकृत्वा निष्क्रान्ता)

राजा - (सहसोत्थाय) वासवदत्ते! तिष्ठ तिष्ठ, हाधिक्।

निष्क्रामन् संभ्रमेणाहं द्वारपक्षेण ताडितः।
ततो व्यक्तं न जानामि भूतार्थोऽयं मनोरथः।। ७।।

(प्रविश्य)

विदूषकः - अइ पडिबुद्धो अत्तभवं। (अयिप्रतिबुद्धोऽत्र भवान्।)

राजा - वयस्य! प्रियमावेदये, धरते खलु वासवदत्ता।

विदूषकः - अविहा वासवदत्ता। कहिं वासवदत्ता? चिराखु उवरदा वासवदत्ता। (अविहा वासवदत्ता। कुत्र वासवदत्ता? चिरात् खलूपरता वासवदत्ता।)

राजा - वयस्य! मा मैवम् -

शय्यायामवसुप्तं मां बोधयित्वा सखे! गता।
दग्धेति ब्रुवता पूर्वं वञ्चितोऽस्मि रुमण्वता।। ८।।

विदूषकः - अविहा असंभावणीअं एदं ण। आ उदअह्णाण सङ्कित्तणेणतत्तहोदिं चिन्त अन्तेण सा सिविणे दिट्ठा भवे। (अविहा असंभावनीयमेतद् न। आ, उदकस्नानसङ्कीर्तनेन तत्र भवतीं चिन्तयता सा स्वप्ने दृष्टा भवेत्।)

राजा - यदि तावदयं स्वप्नो धन्यमप्रतिबोधनम्।
अथायं विभ्रमो वा स्याद् विभ्रमो ह्यस्तु मे चिरम्।। ९।।

विदूषकः - मा दाणि भवं अत्ताणं ओहसिअं कादुं। किन्तु इमस्सिं राअउळे अवन्तिसुन्दरी णाम जक्खिणी पडिवसदि। सातुए दिट्ठा भवे। (मेदानीं भवानात्मानमवहसितुं कर्तुम्। किन्त्वस्मिन् राजकुलेऽवन्तीसुन्दरी नाम यक्षिणी प्रतिवसति। सा त्वया दृष्टा भवेत्।)

राजा - न न -

स्वप्नस्यान्ते विबुद्धेन नेत्रविप्रोषिताञ्जनम्।
चारित्रमपि रक्षन्त्या दृष्टं दीर्घालकं मुखम्।। १०।।

अपि च वयस्य! पश्य पश्य -

योऽयं सन्त्रस्तया देव्या तया बाहुर्निपीडितः।
स्वप्नेऽप्युत्पन्नसंस्पर्शो रोमहर्षं न मुञ्चति।। ११।।

विदूषकः - मा दाणि भवं अणत्थं चिन्तिअ। एदु एदु भवं। च उस्साळं पविसामो। (मेदानीं भवाननर्थं चिन्तयित्वा। एत्वेतु भवान्। चतुःशालं प्रविशामः।)

(प्रविश्य)

काञ्चुकीयः - जयत्वार्यपुत्रः। अस्माकं महाराजो दर्शको। भवन्तमाह - एष खलु भवतोऽमात्यो रुमण्वान् महता बलसमुदयेनोपयातः खल्वारुणिमभिघातयितुम्। तथा हस्त्यश्वरथपदातीनि मामकानि विजयांगानि सन्नद्धानि। तदुत्तिष्ठतु भवान्। अपि च -

भिन्नास्ते रिपवो भवद् गुणरताः
पौराः समाश्वासिताः
पार्ष्णीं चापि भवत् प्रयाण समये
तस्या विधानं कृतम्।
यद्यत्साध्यमरिप्रमातजननं
तत्तन्मयानुष्ठितं
तीर्णा चापि बलैर्नदी त्रिपथगा
वत्साश्च हस्ते तव।। १२।।

राजा - (उत्थाय) बाढम्। अयमिदानीम् -

उपेत्य नागेन्द्रतुरंगतीर्णे
तमारुणिं दारुणकर्मदक्षम्।

वाकीर्णबाणोग्रतरंगभंगे

महार्णवाभे युधि नाशयामि ।। १३ ।।

(निष्क्रान्ताः सर्वे)

इति पञ्चमोऽङ्कः ।

अथ षष्ठोऽङ्कः ।

(ततः प्रविशति काञ्चुकीयः)

काञ्चुकीयः - क इह भो! रत्नतोरणद्वारमशून्यं कुरुते -

(प्रविश्य)

प्रतीहारी - अय्य! अहं विजआ। किं करीअदु। (आर्य! अहं विजया। किं क्रियताम्।)

काञ्चुकीयः - भवति! निवेद्यतां निवेद्यतां वत्सराज्यलाभप्रवृद्धोदयायोदयनाय -एष खलु महासेनस्य सकाशाद् रैभ्यसगोत्रः काञ्चुकीयः प्राप्तः, तत्र भवत्या चांगारवत्या प्रेषितार्या वसुन्धरा नाम वासवदत्ताधात्री च प्रतीहारमुपस्थिताविति।

प्रतीहारी - अय्य! अदेसकाळोपडिहारस्स। (आर्य! अदेशकालः प्रतिहारस्य।)

काञ्चुकीयः - कथमदेशकालो नाम?

प्रतीहारी - सुणादु अय्यो! अज्ज भट्टिणो सय्यामहाप्रासादगदेण केण वि वीणा वादिदा। तं च सुणिअ भट्टिणा भणिअं - घोसवदीए सद्दोविअ सुणीअदित्ति। (शृणोत्वार्यः। अद्य भर्तुः शय्यामहाप्रासादगतेन केनापि वीणा वादिता। तां च श्रुत्वा भर्त्रा भणितं - घोषवत्याः शब्द इव श्रूयते इति।)

काञ्चुकीयः - ततस्ततः।

प्रतीहारी - तदो तहिं गच्छिअ पुच्छिदो - कुदो इमा ए वीणाए आगमोत्ति। तेण भणिअं-अह्मेहिं-णम्मदातीरे कोय्यगुम्मळग्गा दिट्ठा। जइ प्पओअणं इमा ए उवणीअदु भट्टिणत्ति। तं च उवणीदं अङ्के करिअ मोहं गदो भट्टा। तदो मोहप्पच्चागदेण बप्फपय्याउळेण मुहेण भट्टिणा भणिअं-दिट्ठासि घोसवदि! सा हुण दिस्सदि त्ति। अय्य! ईदिसो अणवसरो। कहं णिवेदेमि। (ततस्तत्र गत्वा पृष्टः - कुतोऽस्या वीणाया आगम इति। तेन भणितं - अस्माभिर्नर्मदातीरे (कोय्य?) गुल्मलग्ना दृष्टा। यदि प्रयोजनमनया, उपनीयतां भर्त्रेति। तां चोपनीतामङ्के कृत्वा मोहं गतो भर्ता। ततो मोहप्रत्यागतेन बाष्पपर्याकुलेन मुखेन भर्त्रा भणितम्। दृष्टासि घोषवति! सा खलु न दृश्यत इति। आर्य! ईदृशोऽनवसरः कथं निवेदयामि।)

काञ्चुकीयः - भवति! निवेद्यताम्। इदमपि तदाश्रयमेव।

प्रतीहारी - अय्य! इअं णिवेदेमि। एसो भट्टासय्यामहप्पासादादो ओदरइ। ता इह एव्वणि वेदइस्सं। (आर्य! इयं निवेदयामि। एष भर्ता शय्यामहाप्रासादादवतरति तदिहैव निवेदयिष्यामि।)

काञ्चुकीयः - भवति! तथा।

(उभौ निष्क्रान्तौ)

मिश्रविष्कम्भकः।

(ततः प्रविशति राजा विदूषकश्च)

राजा - श्रुतिसुखनिनदे! कथं नु देव्याः
स्तनयुगले जघनस्थले च सुप्ता।
विहगगणरजोविकीर्णदण्डा
प्रतिभयमध्युषितास्यरण्यवासम्।। १ ।।

अपि च, अस्निग्धासि घोषवति! या तपस्विन्या न स्मरसि-

श्रोणीसमुद्वहनपार्श्वनिपीडितानि
स्वेदस्तनान्तरसुख्वन्युपगूहितानि।
उद्दिश्य मां च विरहे परिदेवितानि
वाद्यान्तरेषु कथितानि च सस्मितानि।। २ ।।

विदूषकः - अळं दाणि भवं अदिमत्तं सन्तप्पिअ। (अलमिदानिं भवानतिमात्रं सन्तप्य।)

राजा - वयस्य! मा मैवं -

चिरप्रसुप्तः कामो मे वीणया प्रतिबोधितः।
तां तु देवीं न पश्यामि यस्या घोषवतीप्रिया।। ३ ।।

वसन्तक! शिल्पिजनसकाशान्नवयोगां घोषवतीं कृत्वा शीघ्रमानय।

विदूषकः - जं भवं आणवेदि। (यद् भवानाज्ञापयति।)

(वीणां गृहीत्वा निष्क्रान्तः)

(प्रविश्य)

प्रतीहारी - जेदुभट्टा। एसोखु महासेणस्स सआसादोरब्भसगोत्तो कञ्चुइओ देवीएअंगारवदीए पेसिदा अय्या वसुन्धरा णाम वासवदत्ताधत्ती अ पडिहारं उवट्ठिदा। (जयतु भर्ता। एष खलु महासेनस्य सकाशाद् रैभ्यसगोत्रः काञ्चुकीयो देव्योङ्गारवत्या प्रेषितार्यावसुन्धरानाम वासवदत्ताधात्री च प्रतिहारमुपस्थितौ।)

राजा - तेन हि पद्मावती तावदाहूयताम्।

प्रतीहारी - जं भट्टा आणवेदि। (यद्भर्ताज्ञापयति।)

(निष्क्रान्तः)

राजा - किन्नु खलु शीघ्रमिदानीमयं वृत्तान्तो महासेनेन विदितः।

(ततः प्रविशति पद्मावती प्रतीहारी च)

प्रतीहारी - एदु एदु भट्टिदारिआ। (एत्वेतु भर्तृदारिका।)

पद्मावती - जेदु अय्यउत्तो। (जयत्वार्यपुत्रः।)

राजा - पद्मावति! किं श्रुतं महासेनस्य सकाशाद् रैभ्यसगोत्रः काञ्चुकीयः प्राप्तस्तत्र भवत्याचांगारवत्या प्रेषितार्या वसुन्धरानाम वासवदत्ताधात्री च प्रतिहालमुपस्थिताविति।

पद्मावती - अय्यउत्त! पिअंमे ञादिकुळस्स कुसळवुत्तन्तं सोदुं। (आर्यपुत्र! प्रियं मे ज्ञातिकुलस्य कुशलवृत्तान्तं श्रोतुम्।)

राजा - अनुरूपमेतद् भवत्याभिहितम्। वासवदत्ता स्वजनो मे स्वजन इति। पद्मावति! आस्यताम्। किमिदानीं नास्यते?

पद्मावती - अय्यउत्त! किं मए सह उवविट्ठो एदं जणं पेक्खिस्सदि? (आर्यपुत्र! किं मया सहोपविष्ट एतं जनं प्रेक्षिष्यते?)

राजा - कोऽत्रदोषः?

पद्मावती - अय्यउत्तस्स अवरो परिग्गहो त्ति उदासीणं विअ होदि। (आर्यपुत्रस्यापरः परिग्रह इति उदासीनमिव भवति।)

राजा - कलत्रदर्शनार्हं जनं कलत्रदर्शनात्परिहरतीति बहुदोषमुत्पादयति। तस्मादास्यताम्।

पद्मावती - जं अय्यउत्तो आणवेदि। (उपविश्य) अय्यउत्त! तदो वा अंबा वा किंणुखु भणिस्सदित्ति आविग्गा विअ संवुत्ता। (यदार्यपुत्र आज्ञापयति। आर्यपुत्र! तातोवांबा वा किंनु खलु भणिष्यतीत्याविग्नेव संवृत्ता।)

राजा - पद्मावति! एवमेतत्।

किं वक्ष्यतीति हृदयं परिशङ्कितं मे
कन्या मयाप्यपहृता न च रक्षिता स।
भाग्यैश्चलैर्महदवाप्त गुणोपघातः
पुत्रः पितुर्जनितरोष इवास्मि भीतः।। ४।।

पद्मावती - अकिं सक्कं रक्खिदुं पत्तकाळे। (न किं शक्यं रक्षितुं प्राप्तकाले।)

प्रतीहारी - एसो कञ्चुइओ धत्ती अ पडिहारं उवट्ठिदा। (एष काञ्चुकीयो धात्री च प्रतीहारमुपस्थितौ।)

राजा - शीघ्रं प्रवेश्यताम्।

प्रतीहारी - जंभट्टा आणवेदि। (यद्भर्ताज्ञापयति।)

(निष्क्रान्ता)

(ततः प्रविशति काञ्चुकीयो धात्री प्रतिहारी च)

काञ्चुकीयः - भो!

संबन्धिराज्यमिदमेत्य महान् प्रहर्षः
स्मृत्वा पुनर्नृपसुतानिधनं विषादः।
किं नाम दैव! भवता न कृतं यदि स्याद्
राज्यं परैरपहृतं कुशलं च देव्याः।। ५।।

प्रतीहारी - एसो भट्टा, उवसप्पदु अय्यो। (एष भर्ता, उपसर्पत्वार्यः।)

काञ्चुकीयः - (उपेत्य) जयत्वार्यपुत्र?

धात्री - जेदुभट्टा। (जयतु भर्ता।)

राजा - (सबहुमानम्) आर्य!

पृथिव्यां राजवंश्यानामुदयास्तमयप्रभुः।
अपि राजा स कुशली मया काङ्क्षितबान्धवः।। ६।।

काञ्चुकीयः - अथ किम्? कुशलीमहासेनः। इहापि सर्वगतं कुशलं पृच्छति।

राजा - (आसनादुत्थाय) किमाज्ञापयति महासेनः?

काञ्चुकीयः - सदृशमेतद् वैदेहीपुत्रस्य। नन्वासनस्थेनैव भवता श्रोतव्यो महासेनस्य सन्देशः।

राजा - यदाज्ञापयति महासेनः। (उपविशति)

काञ्चुकीयः - दिष्ट्या परैरपहृतं राज्यं पुनः प्रत्यानीतमिति। कुतः -

कातरा येऽप्यशक्ता वा
नोत्साहस्तेषु जायते।
प्रायेण हि नरेन्द्रशीः
सोत्साहैरेव भुज्यते।। ७।।

राजा - आर्य! सर्वमेतन्महासेनस्य प्रभावः -

अहमवजितः पूर्वं
तावत् सुतैः सह लालितो
दृढमपहृता कन्या
भूयो मया न च रक्षिता।
निधनमपि च श्रुत्वा
तस्यास्तथैव मयि स्वता
ननु यदुचितान् वत्सान्
प्राप्तुं नृपोऽत्र हि कारणम्।। ८।।

काञ्चुकीयः - एष महासेनस्य सन्देशः। देव्याः सन्देशमिहात्र भवती कथयिष्यति।

राजा - हा अम्ब!

षोडशान्तःपुरज्येष्ठा पुण्या नगरदेवता।
मम प्रवासदुःखार्ता माता कुशलिनी ननु? ९।।

धात्री - अरोआ भट्टिणी भट्टारं सव्वगदं कुसळं पुच्छदि। (अरोगा भट्टिनी भर्तारं सर्वगतं कुशलं पृच्छति।)

राजा - सर्वगतं कुशलमिति। अम्ब! ईदृशं कुशलम्।

धात्री - मा दाणिं भट्टा अदिमत्तं सन्तप्पिदुं। (मेदानीं भर्तातिमात्रं सन्तप्तुम्।)

काञ्चुकीयः - धारयत्वार्यपुत्रः उपरताप्यनुपरता महासेनपुत्री एवमनुकम्प्यमानार्यपुत्रेण। अथवा -

कः कं शक्तो रक्षितुं मृत्युकाले
रज्जुच्छेदे के घटं धारयन्ति।
एवं लोकस्तुल्यधर्मो? (मा) वनानां
काले काले छिद्यते रुह्यते च।। १०।।

राजा - आर्य! मा मैवं,

महासेनस्य दुहिता शिष्या देवी च मे प्रिया।
कथं सा न मया शक्या स्मर्तुं देहान्तरेष्वपि।। ११ ।।

धात्री - आह भट्टिणी-उवरदा वासवदत्ता। मम वा महासेनस्स वा जादिसा गोवाळअपाळआ तादिसो एव्व तुमं पुढमं एव्व अभिप्पेदो जामादुअत्ति। एदण्णिमित्तं उज्जइणिं आणीदो। अग्गिसक्खिअं वीणाववदेसेण दिण्णा। अत्तणो चवळदाए अणिव्वुत्तविवाहमंगळो एव्वगदो। अहअ अह्नेहिं तवअ वासवदत्ताएअ पडिकिदिं चित्तफळआए आळिहिअ विवाहो णिव्वुत्तो। एसा चित्त फळआ तव सआसं पेसिदा। एदं पेक्खिअ णिव्वुदो होहि। (आह भट्टिनी - उपरता वासवदत्ता। ममवा महासेनस्य वा यादृशौ गोपालकपालकौ, तादृश एव त्वं प्रथममेवाभिप्रेतो जामातेति। एतन्निमित्तमुज्जयिनीमानीतः अनग्निसाक्षिकं वीणाव्यपदेशेन दत्ता। आत्मनश्चपलतया निर्वृत्तविवाहमंगल एव गतः। अथचावाभ्यां तव च वासवदत्तायाश्च प्रतिकृतिं चित्तफलकायामालिख्य विवाहो निर्वृत्तः। एषा चित्रफलका तव सकाशं प्रेषिता। एतां प्रेक्ष्य निर्वृतो भव।)

राजा - अहो अतिस्निग्धमनुरूपं चाभिहितं तत्र भवत्या।

वाक्यमेतत् प्रियतरं राज्यलाभशतादपि।
अपराद्धेष्वपि स्नेहो यदस्मासु न विस्मृतः।। १२ ।।

पद्मावती - अय्यउत्त! चित्तगदं गुरुअणं पेक्खिअ अभिवादेदुं इच्छामि। (आर्यपुत्र! चित्रगतं गुरुजनं प्रेक्ष्याभिवादयितुमिच्छामि।)

धात्री - पेक्खदु पेक्खदु भट्टिदारिआ। (प्रेक्षतां प्रेक्षतां भर्तृदारिका।)

(चित्रफलकां दर्शयति)

पद्मावती - (दृष्ट्वा स्वगतम्) हं अदिसदीसीखु इअं अय्या ए आवन्तिआए। (प्रकाशम्) अय्यउत्त! सदिसी खुइअं अय्याए। (हम्। अतिसदृशी खल्वियमार्याया आवन्तिकायाः आर्यपुत्र! सदृशी खल्वियमार्यायाः।)

राजा - न सदृशी। सैवेति मन्ये भोः कष्टम् -

अस्यस्निग्धस्य वर्णस्य विपत्तिर्दारुणा कथम्।
इदं च मुखमाधुर्यं कथं दूषितमग्निना।। १३ ।।

पद्मावती - अय्यउत्तस्स पडिकिदिं पेक्खिअ जाणामि इअं अय्याए सदिसी णवेत्ति। (आर्यपुत्रस्य प्रतिकृतिं प्रेक्ष्य जानामीयमार्यया सदृशी न वेत्ति।)

धात्री - पेक्खदु पेक्खदु भट्टिदारिआ। (प्रेक्षतां प्रेक्षतां भर्तृदारिका।)

पद्मावती - (दृष्ट्वा) अय्यउत्तस्स पडिकिदीए सदिसदाए जाणामि इअं अय्याए सदिसित्ति। (आर्यपुत्रस्य प्रतिकृत्याः सदृशतया जानामीयमार्यया सदृशीति।)

राजा - देवि! चित्रदर्शनात् प्रभृति प्रहृष्टोद्विग्नामिव त्वां पश्यामि। किमिदम्?

पद्मावती - अय्यउत्त! इमाए पडिकिदीए सदिसी इह एव्व पडिवसदि। (आर्यपुत्र! अस्याः प्रतिकृत्याः

सदृशीह प्रतिवसति ।)

राजा - किं वासवदत्तायाः?

पद्मावती - आम ।

राजा - तेन हि शीघ्रमानीयताम् ।

पद्मावती - अय्यउत्त! मम कण्णाभावे केणविबह्मणेण मम भइणिअत्तिण्णासो णिक्खित्तो । पोसिदभत्तुआ परपुरुसदंसणं परिहरदि । ता अय्यं मए सह आअदं पेक्खिअ जाणादु अय्यउत्तो । (आर्यपुत्र! मम कन्याभावे केनापि ब्राह्मणेन मम भगिनिकेति न्यासो निक्षिप्तः । प्रोषितभर्तृका परपुरुषदर्शनं परिहरति । तदार्यां मया सहागतां प्रेक्ष्य जानात्वार्यपुत्रः ।)

राजा - यदि विप्रस्य भगिनी व्यक्तमन्या भविष्यति ।
परस्परगता लोके दृश्यते रूपतुल्यता ।। १४ ।।

(प्रविश्य)

प्रतीहारी - जेदु भट्टा। एसो उज्जइणीओ बह्मणो, भट्टिणीए हत्थे मम भइणिअ त्तिण्णासो णिक्खित्तो, तं पडिग्गहिदुं पडिहारं उवट्ठिदो। (जयतु भर्ता। एष उज्जयिनीयो ब्राह्मणः भट्टिन्या हस्ते मम भगिनिकेति न्यासो निक्षिप्तः, तं प्रतिग्रहीतुं प्रतिहारमुपस्थितः ।)

राजा - पद्मावति! किन्नु सब्राह्मणः?

पद्मावती - होदव्वं । (भवितव्यम् ।)

राजा - शीघ्रं प्रवेश्यतामभ्यन्तरसमुदाचारेण सब्राह्मणः ।

प्रतीहारी - जं भट्टा आणवेदि । (यद् भर्ताज्ञापयति ।)

(निष्क्रान्ता)

राजा -पद्मावति! त्वमपि तामानय ।

पद्मावती - जं अय्यउत्तो आणवेदि । (यदार्यपुत्र आज्ञापयति ।)

(निष्क्रान्ता)

(ततः प्रविशति यौगन्धरायणः प्रतीहारी च)

यौगन्धरायणः -भोः! (स्वगतम्)

प्रच्छाद्य राजमहिषां नृपतेर्हितार्थं
कामं मया कृतमिदं हितमित्यवेक्ष्य ।
सिद्धेऽपि नाम मम कर्मणि पार्थिवोऽसौ
किं वक्ष्यतीतिहृदयं परिशङ्कितं मे ।। १५ ।।

प्रतीहारी - एसो भट्टा । उपसप्पदु अय्यो । (एषभर्ता । उपसर्पत्वार्यः ।)

यौगन्धरायणः - (उपसृत्य) जयतु भवान् जयतु ।

राजा - श्रुतपूर्व इव स्वरः । भो ब्राह्मण! किं भवतः? स्वसा पद्मावत्या हस्ते न्यास इति निक्षिप्ताः ।

यौगन्धरायणः - अथ किम्?

राजा - तेन हि त्वर्यतां त्वर्यतामस्य भगिनिका।

प्रतीहारी - जंभट्टा आणवेदि। (यद् भर्ताज्ञापयति।)

(निष्क्रान्ता)

(ततः प्रविशति पद्मावती आवन्तिका प्रतीहारी च)

पद्मावती - एदु एदु अय्या। पिअं दे णिवेदेमि। (एतेत्वार्या। प्रियं ते निवेदयामि।)

आवन्तिका - किं किं?

पद्मावती - भादा दे आअदो। (भ्राता ते आगतः।)

आवन्तिका - दिट्ठिआ इदाणीं पि सुमरदि। (दिष्ट्येदानीमपि स्मरति।)

पद्मावती - (उपसृत्य) जेदु अय्य उत्तो। एसो णासो। (जयत्वार्यपुत्रः। एष न्यासः।)

राजा - निर्यातय पद्मावति! साक्षिमान् न्यासो निर्यातयितव्यः इहात्रभवान् रैभ्यः, अत्रभवती चाधिकरणं भविष्यतः।

पद्मावती - अय्य! णीअदांदाणिं अय्या। (आर्य! नीयतामिदानीमार्या।)

धात्री - (आवन्तिकां निर्वर्ण्य) अम्मो भट्टिदारिआ वासवदत्ता। (अम्मो भर्तृदारिका वासवदत्ता।)

राजा - कथं महासेनपुत्री। देवि! प्रविश त्वमभ्यन्तरं पद्मावत्या सह।

यौगन्धरायणः - न खलु न खलु प्रवेष्टव्यम्। मम भगिनी खल्वेषा।

राजा - किं भवानाह। महासेनपुत्री खल्वेषा।

यौगन्धरायणः - भो राजन्!

भरतानां कुले जातो विनीतो ज्ञानवाच्छुचिः।
तन्नार्हसि बलाद्धर्तुं राजधर्मस्य देशिकः।। १६।।

राजा - भवतु पश्यामस्तावद् रूपसादृश्यम्। संक्षिप्यतां यवनिका।

यौगन्धरायणः - जयतु स्वामी।

वासवदत्ता - जेदु अय्य उत्तो। (जयत्वार्यपुत्रः।)

राजा - अये असौ यौगन्धरायणः, इयं महासेनपुत्री।

किन्नु सत्यमिदं स्वप्नः सा भूयो दृश्यते मया।
अनयाप्येवमेवाहं दृष्टया वञ्चितस्तदा।। १७।।

यौगन्धरायणः - स्वामिन्! देव्यपनयेन कृतापराधः खल्वहम्। तत्क्षन्तुमर्हति स्वामी। (पादयोः पतति)

राजा - (उत्थाप्य) यौगन्धरायणो भवान् ननु।

मिथ्योन्मादैश्च युद्धैश्च
शास्त्रदृष्टैश्च मन्त्रितैः।
भवद्यन्तैः खलु वयं
मज्जमानाः समुद्धृताः।। १८।।

यौगन्धरायणः - स्वामिभाग्यानामनुगन्तारो वयम्।

पद्मावती - अम्महे अय्याखु इअं। अय्ये! सहीजणसमुदाआरेण अदिक्कन्दो समुदाआरो। ता सीसेण पसादेमि। (अहो आर्या खल्वियम्। आर्ये! सखीजन समुदाचारेणानिक्रान्तः समुदाचारः, तत्शीर्षेण प्रसादयामि।)

वासवदत्ता - (पद्मावतीमुत्थाप्य) उट्ठेहि उट्ठेहि अविहवे! उट्ठेहि। अत्थिसअं णाम सरीरं अवरज्झइ। (उत्तिष्ठोत्तिष्ठाविधवे! उत्तिष्ठ। अर्थिस्वं नाम शरीरमपराध्यति।)

पद्मावती - अणुग्गहिदह्मि। (अनुगृहीतास्मि।)

राजा - वयस्य यौगन्धरायण! देव्यपनये का कृता ते बुद्धिः?

यौगन्धरायणः - कौशांबीमात्रं परिपालयामीति।

राजा - अथ पद्मावत्या हस्ते किं न्यासकारणम्?

यौगन्धरायणः - पुष्पकभद्रादिभिरादेशिकैरादिष्टा स्वामिनो देवी भविष्यतीति।

राजा - इदमपि रुमण्वता ज्ञातम्।

यौगन्धरायणः - स्वामिन्! सर्वैरेव ज्ञातम्।

राजा - अहो शठः खलु रुमण्वान्।

यौगन्धरायणः - स्वामिन्! देव्याः कुशलनिवेदनार्थमद्यैव प्रतिनिवर्ततामत्र भवान् रैभ्योऽत्र भवती च।

राजा - न न, सर्व एव वयं यास्यामो देव्या पद्मावत्या सह।

(भरतवाक्यम्)

इमां सागरपर्यन्तां हिमवद्विन्ध्यकुण्डलाम्।
महीमेकातपत्राङ्कां राजसिंहः प्रशास्तु नः।। १९ ।।

(निष्क्रान्ताः सर्वे)

इति षष्ठोऽङ्कः।

***

श्लोकानां व्याख्यानम्।

प्रथमाङ्कः।

उदयनवेन्दुसवर्णावासवदत्ताबलौ बलस्य त्वाम्।
पद्मावतीर्णपूर्णौ वसन्तकम्रौ भुजौ पाताम्।। १ ।।

अन्वयः - उदयनेन्दुसवर्णौ आसवदत्ताबलौ पद्मावतीर्णपूर्णौ वसन्तकम्रौ बलस्य भुजौ त्वाम् पाताम्।

व्याख्या - उदयनवेन्दुसवर्णौ = उदयनवः उदयकालिकः यः यः नूतनः इन्दुः चन्द्र तेन समानः वर्णः रक्तवर्णः ययोः तौ, आसवदत्ताबलौ = आसवेन मद्येन दत्तं वितीर्णम् अबलं श्लैथिल्यं ययोः तौ, पद्मावतीर्णपूर्णौ = पद्मस्य कमलस्य अवतीर्णः अवतारः तेन पूर्णौ समृद्धौ, वसन्तकम्रौ = वसन्तः

मधुमासः तद्वत् कम्रौ मनोहरौ, बलस्य = कृष्णाग्रजबलरामस्य, भुजौ = बाहू, त्वां = प्रेक्षकजनम्, पातां = रक्षताम्।

टिप्पणी - उदयनवासवदत्तापद्मावतीवसन्तकानां प्रमुखपात्राणां नामनिर्देशेन अत्र मुद्रालङ्कारः। तल्लक्षणं यथा 'सूच्यार्थसूचनं मुद्रा प्रकृतार्थपरैः पदैः'। आर्याछन्दः, तल्लक्षणं यथा 'यस्याः पादे प्रथमे द्वादशमात्रास्तथा तृतीयेऽपि। अष्टादश द्वितीये चतुर्थके पञ्चदश साऽऽर्या।

भृत्यैर्मगधराजस्य स्निग्धैः कन्यानुगामिभिः।
धृष्टमुत्सार्यते सर्वस्तपोवनगतो जनः।। २ ।।

अन्वयः - मगधराजस्य स्निग्धैः कन्यानुगामिभिः भृत्यैः तपोवनगतः सर्वः जनः धृष्टम् उत्सार्यते।

व्याख्या - मगधराजस्य = दर्शकनामकमगधाधीशस्य, स्निग्धैः = स्नेहयुक्तैः, कन्यानुगामिभिः = राजकुमारीपद्मावत्यानुचरैः, भृत्यैः = सेवकैः, भटैरित्यर्थः, तपोवनगतः = तपोवनप्राप्तः, सर्वः = सकलः, जनः = लोकः, धृष्टं = बलात्, उत्सार्यते = दूरीक्रियते। अनुष्टुप्छन्दः।

धीरस्याश्रमसंश्रितस्य वसतस्तुष्टस्य वन्यैः फलैः-
र्मानार्हस्य जनस्य वल्कलवसस्त्रासः समुत्पाद्यते।
उत्सिक्तो विनयादपेतपुरुषो भाग्यैश्चलैर्विस्मितः
कोऽयं भो निभृतं तपोवनमिदं ग्रामीकरोत्याज्ञया।। ३ ।।

अन्वयः - धीरस्य आश्रमसंश्रितस्य वसतः वन्यैः फलैः तुष्टस्य मानार्हस्य वल्कलवतः जनस्य त्रासः समुत्पाद्यते। भोः अत्सिक्तः विनयात् अपेतपुरुषः चलैः भाग्यैः विस्मितः अयम् कः निभृतम् इदं तपोवनम् आज्ञया ग्रामीकरोति।

व्याख्या - धीरस्य = धैर्ययुक्तस्य, आश्रमसंश्रितस्य = आश्रमं तपोवनं संश्रितस्य आश्रितस्य, ब्रह्मचर्यादिविविधाश्रमाचारपरिपालनप्रवणस्येत्यर्थः, वसतः = कानेन निवासं कुर्वतः, वन्यैः फलैः = अरण्योत्पन्नैः फलैः, कन्दमूलप्रभृतिभिरित्यर्थः, तुष्टस्य = सन्तुष्टस्य, मानार्हस्य = आदरणीयस्य, वल्कलवतः = वल्कलधारिणः, जनस्य = तपस्विलोकस्य, त्रासः = भयम्, कुतः = कस्मात् कारणात्, समुत्पाद्यते = जन्यते। भो = हे भटाः, उत्सिक्तः = गर्वितः, विनयात् = नम्रतायाः, अपेतपुरुषः = अपेता रहिता पुरुषाः जनाः यस्य सः, चलैः = अस्थिरैः, भाग्यैः = भागधेयैः, सम्पत्तिशालितास्वरूपैरित्यर्थः, विस्मितः = गर्वयुक्तः, अयम् कः = एषः कः राजा, निभृतं = शान्तम् इदम् = एतत् तपोवनम् = आश्रमम्, आज्ञया = आदेशेन, ग्रामीकरोति = ग्रामसमतां नयति। शार्दूलविक्रीडितं छन्दः।

पूर्वं त्वयाप्यभिमतं गतमेवमासी-
च्छ्लाघ्यं गमिष्यसि पुनर्विजयेन भर्तुः।
कालक्रमेण जगतः परिवर्तमाना
चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः।। ४ ।।

अन्वयः - पूर्वं त्वया अपि एवम् गतम् अभिमतम् आसीत्। पुनः भर्तुः विजयेन श्लाघ्यं गमिष्यति। कालक्रमेण परिवर्तमाना जगतः भाग्यपङ्क्तिः चक्रारपङ्क्तिः इव गच्छति।

व्याख्या - पूर्वं = पुरा, अवन्तिकारूपपरिग्रहात्पूर्वमित्यर्थः। त्वया अपि = भवत्या वासवदत्तया अपि, एवम् = ईदृशम्, पद्मावत्याः इवेत्यर्थः, गतं = गमनम्, अभिमतम् = अभीष्टम्, आसीत् = अभवत्। पुनः = भूयः, भर्तुः = स्वामिनः महाराजोदयनस्य, विजयेन = स्वराज्यलाभेन, श्लाघ्यं = प्रशंसनीयं यथा स्यात्तथा, गमिष्यति = यास्यसि, सुखोपभोगञ्च करिष्यसि इत्यर्थः। कालक्रमेण = समयानुसारेण, परिवर्तमाना = परिभ्रमन्ती, जगतः = लोकस्य, भाग्यपङ्क्तिः = दैवपरम्परा, चक्रापङ्क्तिः इव = चक्रस्य रथस्य अराणां नेमिकाष्ठानां पङ्क्तिः इव श्रेणिः इव, गच्छति = व्रजति, यथा चक्रारपंक्तिः क्रमेण नीचैरुपरि गच्छति तथैव लोकस्य शुभाशुभानि भाग्यानि अपि समयानुसारेण परिवर्तन्ते।

टिप्पणी - अत्रोपमा अर्थान्तरन्यासः चालङ्कारौ। तयोः अङ्गाङ्गिभावेन सङ्करः अलङ्कारः। उपमायाः लक्षणं यथा 'साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमा द्वयोः' (सा. द., ६, १४)। अर्थान्तरन्यासस्य लक्षणं यथा -

'सामान्यं वा विशेषेण विशेषस्तेन वा यदि।
कार्यं च कारणेनेदं कार्येण च समर्थ्यते।।
साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा ततः। (सा. द. ६, ३१, ३२)

सङ्करस्य लक्षणं यथा -

अङ्गाङ्गित्वेऽलङ्कृतीनां तद्वदेकश्रयस्थितौ।
सन्दिग्धे च भवति सङ्करस्त्रिविधः पुनः।। (सा. द., २, ४९)

अस्मिन् श्लोके वसन्ततिला छन्दः। तस्य लक्षणं यथा 'उक्ता वसन्ततिलका तभजा जगौ गः।

परिहरतु भवान् नृपापवादं
न परुषमाश्रमवासिषु प्रयोज्यम्।
नगरपरिभवान् विमोक्तुमेते
वनमभिगम्य मनस्वनो वसन्ति।। ५।।

अन्वयः -भवान् नृपापवादं परिहरतु। आश्रमवासिषु परुषं न प्रयोज्यम्। (एते) मनस्विनः नगरपरिभवान् विमोक्तुं वनम् अधिगम्य वसति।

व्याख्या - भवान् = संभाषकः, नृपापवादं = नृपस्य राज्ञः दर्शकस्य अपवादं निन्दाम्, राजनिन्दाकारणम् उत्सारणमित्यर्थः, परिहरतु = परित्यजतु। आश्रमवासिषु = तपोवननिवासिषु, विषये, परुषं = निष्ठुरं समुत्सारणवाक्यम्। न प्रयोज्यं = नहि प्रयोक्तव्यम्। एते = इमे आश्रमवासिनः, मनस्विनः = उन्नतचेतसः, नगरपरिभवान् = नगरसुलभान् अनादरान्, विमोक्तुं = परिहर्तुम्, वनम् = अरण्यम्, अधिगम्य = आगत्य, वसति = निवासं कुर्वन्ति।

अत्रार्थान्तरन्यासोऽलङ्कारः। पुष्पिताग्रा छन्दः। तल्लक्षणं यथा 'अयुजि नयुगरेफतो यकारो च नजो जरगाश्च पुष्पिताग्रा'।

तीर्थोदकानि समिधः कुसुमानि दर्भान्
स्वैरं वनादुपनयन्तुं तपोधनानि।
धर्मप्रिया नृपसुता न हि धर्मपीडा-
मिच्छेत् तपस्विषु कुलव्रतमेतदस्याः।। ६।।

अन्वयः - तीर्थोदकानि समिधः कुसुमानि दर्भान् तपोधनानि वनात् स्वैरम् उपनयन्तु। हि धर्मप्रिया नृपसुता तपस्विषु धर्मपीडां न इच्छेत् एतत् अस्याः कुलव्रतम्।

व्याख्या - तीर्थोदकानि = तीर्थस्य पवित्रस्थानस्य उदकानि जलानि, समिधः = काष्ठानि, कुसुमानि = पुष्पाणि, दर्भान् = कुशान्, इमानि तपोधनानि = तपस्साधनानि, वनात् = अरण्यात्, स्वैरं = स्वच्छन्दम्, उपनयन्तु = आनयन्तु। हि = यतो हि, धर्मप्रिया = धर्मानुरागिणी, नृपसुता = राजकुमारी पद्मावती, तपस्विषु = तापसेषु, धर्मपीडां = धर्मबाधाम्, न इच्छेत् = न वाञ्छेत्, एतत् = धर्मपालनम्, अस्याः = राजकुमार्याः पद्मावत्याः, कुलव्रतम् = वंशाचरणम्, अस्तीति शेषः।

टिप्पणी - अस्मिन् श्लोके काव्यलिङ्गमलङ्कारः। अत्र वसन्ततिलका छन्दः।

प्रद्वेषो बहुमानो वा सङ्कल्पादुपजायते।
भर्तृदाराभिलाषित्वादस्य मे महती स्वता।। ७।।

अन्वयः - प्रद्वेषः बहुमानः वा सङ्कल्पात् उपजायते। भर्तृदाराभिलाषित्वात् मे अस्यां महती स्वता (अस्ति)।

व्याख्या - प्रद्वेषः = अतिशयः वैरम्, बहुमानः वा = अत्यादरः वा, सङ्कल्पात् = मनोव्यापारात्, उपजायते = उत्पद्यते। अत एव भर्तृदाराभिलाषित्वात् = भर्तुः स्वामिनः उदयनस्य दारा पत्नी तान् अभिलषतीति भर्तृदाराभिलाषी तस्य भावः तस्मात्, 'इयं पद्मावती स्वामिनः उदयनस्य पत्नीभवतु' इत्यभिलाषित्वात् इत्यर्थः, मे = मम यौगन्धरायणस्य, अस्यां = पद्मावत्याम्, महती = अधिका, स्वता = आत्मीयता, अस्तीति शेषः। अस्मिन् श्लोके अनुष्टुप् छन्दः।

कस्यार्थः कलशेन को मृगयते वासो यथानिश्चितं
दीक्षां पारितवान् किमिच्छति पुनर्देयं गुरोर्यद्भवेत्।
आत्मानुग्रहमिच्छतीह नृपजा धर्माभिरामप्रिया
यद्यस्यास्ति समीप्सितं वदतु तत् कस्याद्य किं दीयताम्।। ८।।

अन्वयः - कस्य कलशेन अर्थः? कः यथानिश्चितं वासः मृगयते? दीक्षां पारितवान् किम् इच्छति यत् पुनः गुरोः देयं भवेत्? इह धर्माभिरामप्रिया नृपजा आत्मानुग्रहम् इच्छति। यस्य यत्

समीप्सितम् अस्ति तद् वदतु। अद्य कस्य किं दीयताम्।

व्याख्या - कस्य = कस्य तपस्विनस्य, कलशेन = घटेन, अर्थः = प्रयोजनम्, अस्तीति शेषः, कः कलशम् इच्छतीत्यर्थः? कः = कः तपस्विजनः, यथानिश्चितं = निर्णयानुसारम्, स्वाश्रमस्यानुरूपमिति अर्थः, वासः = वस्त्रम्, मृगयते = अन्विषति, अभिलषतीत्यर्थः, दीक्षां = वेदवेदाङ्गविद्यादिव्रतम्, पारितवान् = समापितवान्, किं = किं वस्तु, इच्छति = अभिलषति, यत् = यद्वस्तु, पुनः = भूयः, गुरोः = आचार्यस्य, देयं = दक्षिणारूपेण दातव्यम्, भवेत् = स्यात्? इह = अस्मिन् अरण्ये, धर्माभिरामप्रिया = धर्मे अभिरामः अभिरुचिः येषां ते धर्माभिरामाः धर्मानुरागिणः, ते प्रियाः यस्याः सा, नृपजा = राजदुहिता, आत्मानुग्रहम् = आत्मनि अनुकम्पाम्, इच्छति = अभिलषति, यस्य = तपस्विजनस्य, यत् = यद्वस्तु, समीप्सितम् = अभीष्टम्, अस्ति = विद्यते, तत् = तद्वस्तु, वदतु = कथयतु। अद्य = अस्मिन् दिवसे, कस्य = कस्य तपस्विजनस्य, किं = किं वस्तु, दीयतां = समर्प्यताम्। शार्दूलविक्रीडितं छन्दः।

कार्यं नैवार्थैर्नापि भोगैर्न वस्त्रै-
र्नाहं काषायं वृत्तिहेतोः प्रपन्नः।
धीरा कन्येयं दृष्टधर्मप्रचारा
शक्ता चारित्रं रक्षितुं मे भगिन्याः।। ९।।

अन्वयः - न अर्थैः एव कार्यं नापि भोगैः न वस्त्रैः। न अहं वृत्तिहेतोः काषायं प्रपन्नः। धीरा दृष्टधर्मप्रचारा इयं कन्या मे भगिन्याः चारित्रं रक्षितुं शक्ता (अस्ति)।

व्याख्या - न = नहि, अर्थैः एव = धनैः एव, कार्यं = प्रयोजनम्, नापि = नैव, भोगैः = भोगसाधनैः द्रव्यविशेषैः, न = नहि, वस्त्रैः = वसनैः। न = नहि। अहं = यौगन्धरायणः, वृत्तिहेतो = जीविकार्थम्, काषायं = गैरिकं वस्त्रम्, परिव्राजकवेषमित्यर्थः, प्रपन्नः = अङ्गीकृतवानस्मि। धीरा = धैर्यशालिनी, दृष्टधर्मप्रचारा = दृष्टः अवगतः धर्मस्य प्रचारः आचरणं यया सा, इयम् = एषा, कन्या = राजकुमारी पद्मावती, मे = मम यौगन्धरायणस्य भगिन्याः = स्वसुः अवन्तिकावेषधार्याः वासवदत्तायाः, चारित्रं = शीलम्, रक्षितुं = पातुम्, शक्ता = समर्था अस्तीति शेषः। अत्र काव्यलिङ्गमलङ्कारः। वैश्वदेवीनामकं छन्दः। तल्लक्षणं यथा 'वाणाश्वैश्छिन्ना वैश्वदेवी ममौ यौ'।

सुखमर्थो भवेत् दातुं सुखं प्राणाः सुखं तपः।
सुखमन्यद्भवेत् सर्वं दुःखं न्यासस्य रक्षणम्।। १०।।

अन्वयः - अर्थः दातुं सुखं भवेत्, प्राणाः सुखं, तपः सुखम्। अन्यत् सर्वं सुखं भवेत् (परम्) न्यासस्य रक्षणं दुःखं भवेत्।

व्याख्या - अर्थः = धनम्, दातुम् = अर्पयितुम्, सुखं = सुकरम्, भवेत् = स्यात्, प्राणाः = असवः, दातुम्, सुखं = सुकरम्। तपः = तपःफलम्, दातुम्, सुखं = सुकरम्। अन्यत् सर्वं =

सकलमितरवस्तु, दातुम्, सुखं = सुकरम्, भवेत् = स्यात्, परम्, न्यासस्य = निक्षेपस्य, रक्षणं = परिपालनम्, दुःखं = अतिदुष्करम् अस्तीति शेषः। अत्रा-र्थान्तरन्यासोऽलङ्कारः। अस्मिन् श्लोके अनुष्टुप् छन्दः।

पद्मावती नरपतेर्महिषी भवित्री
दृष्टा विपत्तिरथ यैः प्रथमं प्रदिष्टा।
तत्प्रत्ययात् कृतमिदं न हि सिद्धवाक्या-
त्युत्क्रम्य गच्छति विधिः सुपरीक्षितानि।। ११ ।।

अन्वयः - यैः प्रथमं प्रदिष्टा विपत्तिः दृष्टा। अथ पद्मावती नरपतेः भवित्री महिषी (इति) प्रदिष्टा। तत्प्रत्ययात् इदं कृतम्। हि विधिः सुपरीक्षितानि सिद्धवाक्यानि व्युत्क्रम्य न गच्छति।

व्याख्या - यैः = पुष्पकभद्रादिभिः सिद्धैः, प्रथमं = पूर्वम्, प्रदिष्टा = आदिष्टा, विपत्तिः = आपत्तिः, दृष्टा = प्रत्यक्षमवलोकिता, अथ = अनन्तरम्, तैरेव सिद्धैः, इति शेषः। पद्मावती = मगधराजदर्शकस्य भगिनी, नरपतेः = राज्ञः उदयनस्य, भवित्री = भाविनी, महिषी = पट्टाभिषिक्ता राज्ञी, इति च प्रदिष्टा = आदिष्टा, ज्ञापितेत्यर्थः। तत्प्रत्ययात् = सिद्धवचनविश्वासात्, इदं = वासवदत्तायाः निक्षेपरूपेण स्थापनम्, कृतं = विहितम्। हि = यतो हि, विधिः = भाग्यम्, सुपरीक्षितानि = सम्यग्जातपरीक्षाणि, सिद्धवाक्यानि = सिद्धानां वाक् सिद्धानां वाक्यानि वचनानि, व्यत्क्रम्य = उल्लङ्घ्य, न गच्छति = न व्रजति, सिद्धवाक्यानुसारेण वर्तते इत्यर्थः। अत्रार्थान्तरन्यासोऽलङ्कारः। वसन्ततिलका छन्दः।

विश्रब्धं हरिणाश्चरन्त्यचकिता देशागतप्रत्यया
वृक्षाः पुष्पफलैः समृद्धविटपाः सर्वे दयारक्षिताः।
भूयिष्ठं कपिलानि गोकुलधनान्यक्षेत्रवत्यो दिशो
निःसन्दिग्धमिदं तपोवनमयं धूमो हि बह्वाश्रयः।। १२ ।।

अन्वयः - देशागतप्रत्ययाः अचकिताः हरिणाः विश्रब्धं चरन्ति। दयारक्षिता सर्वे वृक्षाः पुष्पफलैः समृद्धविटपाः (सन्ति)। कपिलानि गोकुलधनानि भूयिष्ठम् (सन्ति)। दिशः अक्षेत्रवत्यः। हि धूमः बह्वाश्रयः। इदं निःसन्दिग्धं तपोवनम् (अस्ति)।

व्याख्या - देशागतप्रत्ययाः = तपोवनस्थानप्राप्तविश्वासाः, अचकिताः = निर्भयः, हरिणाः = मृगाः, विश्रब्धं = निःशङ्कम्, चरन्ति = इतस्ततः विचरणं कुर्वन्ति। दयारक्षिताः = दयया करुणया रक्षिताः पालिताः, सर्वे = समस्ताः, वृक्षाः = तरवः, पुष्पफलैः समृद्धविटपाः = समृद्धाः परिपूर्णाः विटपाः शाखाः येषां ते, सन्ति इति शेषः। कपिलानि = पिशङ्गवर्णानि, गोकुलधनानि = गोयूथानि एव धनानि, भूयिष्ठं = प्रचुरम्, सन्तीति शेषः। दिशः = ककुभः, अक्षेत्रवत्यः = क्षेत्रहीनाः, कृषिसाधनरहितभूभागाः, विद्यन्ते इति शेषः। हि = यतो हि, धूमः = यज्ञीयधूमः, बह्वाश्रयः = बहवः आश्रयः आधारः यस्य सः, प्रसरति इति शेषः। अत एव इदम् = एतत् पुरोवर्ति, निःसन्दिग्धं = निश्चितम्, तपोवनम् = आश्रयस्थानम्, अस्तीति शेषः।

नैवेदानीं तादृशाश्चचक्रवाका
नैवाप्यन्ते स्त्रीविशेषैर्वियुक्ताः।
धन्या सा स्त्री यां तथा वेत्ति भर्ता
भर्तृस्नेहात् सा हि दग्धाऽप्यदग्धा।। १३।।

अन्वयः - इदानीम् तादृशाः चक्रवाकाः न एव, स्त्रीविशेषैः वियुक्ताः अन्येऽपि न एव। सा स्त्री धन्या यां भर्त्ता तथा वेत्ति। हि भर्तृस्नेहात् दग्धा अपि सा अदग्धा।

व्याख्या - इदानीम् = अधुना, तादृशाः = तथाविधाः, उदयनसदृशाः इत्यर्थः, चक्रवाकाः = कोकाख्याः पक्षिविशेषाः न एव = न एव भवन्ति, स्त्रीविशेषैः = सौन्दर्यादिगुणविशिष्टाभिः स्त्रीभिः, सीतादिभिः इत्यर्थः, वियुक्ताः = विरहिताः, अन्येऽपि, रामादयोऽपि इत्यर्थः। न एव = न एव सन्ति। सा = पूर्वकथिता, स्त्री = योषित्, वासवदत्तेत्यर्थः, धन्या = कृतार्था, अस्तिविशेषः, यां = मृतामपि, भर्त्ता = पतिः, उदयनः इत्यर्थः, तथा = तेन प्रकारेण, वेत्ति = जानाति, स्मरतीत्यर्थः, हि = यतो हि, भर्तृस्नेहात् = पतिप्रणयात्, दग्धा अपि = शरीरेण भस्मीभूता अपि सा = स्त्री वासवदत्ता, अदग्धा = न भस्मीभूता, कीर्तिशरीरेण जीवितप्रायेत्यर्थः। अत्र प्रतीपालङ्कारः। अस्मिन् श्लोके शालिनी छन्दः। तल्लक्षणं यथा 'शालिन्युक्ताम्तौ तगौ गोऽब्धिलोकैः'।

अनाहारे तुल्यः सततरुदितक्षामवदनः
शरीरे संस्कारं नृपतिसमदुःखं परिवहन्।
दिवा वा रात्रौ वा परिचरति यत्नैर्नरपतिं
नृपः प्राणान् सद्यस्त्यजति यदि तस्याप्युपरमः।। १४।।

अन्वयः - (हि) अनाहारे तुल्यः सततरुदितक्षामवदनः नृपतिसमदुःखं शरीरे संस्कारं परिवहन् दिवा वा रात्रौ वा यत्नैः नरपतिं परिचरति। नृपः यदि प्राणान् त्यजति, सद्यः तस्य अपि उपरमः।

व्याख्या - सः = रुमण्वान्, हि = निश्चयन्, अनाहारे = आहारस्य भोजनस्य अग्रहणे, तुल्यः = उदयनसदृशः एव, सततरुदितक्षामवदनः = सततं निरन्तरं रुदितेन रोदनेन क्षामं कृशं वदनम् आननं यस्य सः, नृपतिसमदुःखं = नृपतिना राज्ञा उदयनेन समं सदृशं दुखःपूर्वकं यथा स्यात्तथा, शरीरे = देहे, संस्कारं = स्नानादिकम्, परिवहन् = धारयन्, दिवा वा = दिने वा, रात्रौ वा = रजन्यां वा, यत्नैः = प्रयत्नैः, नरपतिं = राजानमुदयनम्, परिचरति = सेवते। नृपः = राजा उदयनः, यदि = चेत्, प्राणान् = असून्, त्यजति = मुञ्चति, सद्यः = तत्क्षणे, तस्य अपि = तस्य रुमण्वतः अपि, उपरमः = मृत्युः, भवेदिति शेषः। अत्र शिखरिणी छन्दः। तल्लक्षणं यथा 'रसै रुद्रै शिष्ठन्ना यमनसभला गः शिखरिणी'।

सविश्रमो हृदयं भारः प्रसक्तस्तस्य तु श्रमः।
तस्मिन् सर्वमधीनं हि यत्राधीनो नराधिपः।। १५।।

अन्वयः - हि अयं भारः सविश्रमः, तस्य तु श्रमप्रसक्तः। हि तस्मिन् सर्वम् अधीनं यत्र नराधिपः

अधीनः।

व्याख्या - हि = निश्चितम्, अयम् = एषः वासवदत्तारक्षणरूपः, भारः = गुरुकार्यम्, सविश्रमः = वासवदत्तानिक्षेपेण विश्रामयुक्तः, अस्ति इति शेषः, तस्य तु = रुमण्वतस्तु, श्रमः = उदयनरक्षणरूपपरिश्रमः, प्रसक्तः = संलग्नः, वर्तते इति शेषः। हि = यतो हि, तस्मिन् = रुमण्वति, सर्वं = सकलम्, अधीनम् = आयतम्, यत्र = यस्मिन्, नराधिपः = राजोदयनः, अधीनः = आयत्तः, अस्ति इति शेषः, मम यौगन्धरायणस्य भारापेक्षया रुमण्वतो भारः गुरुतरः इत्यर्थः। अत्रार्थान्तरन्यासोऽलङ्कारः। अस्मिन् श्लोके अनुष्टुप् च्छन्दः।

खगा वासोपेताः सलिलमवगाढो मुनिजनः
प्रदीप्तोऽग्निर्भाति प्रविचरति धूमो मुनिवनम्।
परिभ्रष्टो दूराद् रविरपि च संक्षिप्तकिरणो
रथं व्यवर्थ्यासौ प्रविशति शनैरस्तशिखरम्।। १६।।

अन्वयः - खगाः वासोपेताः, मुनिजनः सलिलम् अवगाढः प्रदीप्तः अग्निः भाति, धूमः मुनिजनं प्रविचरति दूरात् परिभ्रष्टः असौ रविः अपि संक्षिप्तकिरणः (सन्) रथं व्यावर्त्य शनैः अस्तशिखरं प्रविशति।

व्याख्या - खगाः = पक्षिणः, वासोपेताः = स्ववासस्थानमुपगताः, मुनिजनः = तपस्विलोकः, सलिलं = जलम्, अवगाढः = प्रविष्टः, प्रदीप्तः = प्रज्वलितः, अग्निः = वह्निः, भाति = शोभते, धूमः = यज्ञाग्निसमुद्भूतः धूम्रः, मुनिवनं = तपोवनम्, प्रविचरति = समन्ततः व्याप्नोति, दूरात् = दूरप्रदेशात्, आकाशशिखरात् इत्यर्थः, परिभ्रष्टः = अधोदेशे निपतितः, असौ = एषः गगनगतः, रविः अपि = सूर्यः अपि, संक्षिप्तकिरणः = संक्षिप्ताः संहृताः किरणाः रश्मयः येन सः, रथं = स्पन्दनम्, व्यावर्त्य = परावर्त्य, शनैः = मन्दं मन्दम्, अस्तशिखरं = अस्ताचलं, प्रविशति = प्रवेशं करोति।

अत्र स्वभावोक्तिरलङ्कारः। अस्मिन् श्लोके शिखरिणी छन्दः।

चतुर्थोऽङ्कः।

कामेनोज्जयिनीं गते मयि तदा कामप्यवस्थां गते
दृष्ट्वा स्वैरमवन्तिराजतनयां पञ्चेषवः पातिताः।
तैरद्यापि सशल्यमेव हृदयं भूयश्च विद्धा वयं
पञ्चेषुर्मदनो यदा कथमयं षष्ठः शरः पातितः।। १।।

अन्वयः - तदा उज्जयिनीं गते अवन्तिराजतनयां स्वैरं दृष्ट्वा कामपि अवस्थां गते मयि कामेन पञ्च इषवः पातिताः। अद्य अपि तैः हृदयं शल्यम् एव। भूयः च वयं विद्धाः। यदा मदनः पञ्चेषु, अयं षष्ठः शरः कथं पातितः।

व्याख्या - तदा = तस्मिन् समये, उज्जयिनीम् = उज्जयिन्याख्याम् अवन्तिराजधानीम्, गते = प्राप्ते, अवन्तिराजतनयाम् = प्रद्योतभूपालसुतां वासवदत्ताम्, स्वैरं = स्वेच्छया, दृष्ट्वा = अवलोक्यं, कामपि = अनिर्वचनीयाम्, अवस्थां = दशाम्, गते = प्राप्ते, मयि = उदयने, कामेन = मदनेन, पञ्च = पञ्चसङ्ख्यकाः, इषवः = बाणाः, पातिताः = निक्षिप्ताः। अद्य अपि = अस्मिन्दिवसेऽपि। तैः = कामबाणैः, हृदयं = चित्तम्, शल्यम् एव = कीलकयुक्तमेव, वर्तते इति शेषः। भूयश्च = पुनः च, वयम् = उदयनः, विद्धाः = ताडिताः। यदा मदनः = यदा कामः, पञ्चेषु = पञ्च पञ्चसङ्ख्यकाः इषवः बाणाः यस्य सः, अयम् = एषः, षष्ठः = षष्ठसङ्ख्यापूरकः, शरः = बाणः, कथं = केन प्रकारेण, पातितः = निक्षिप्तः। शार्दूलविक्रीडितं छन्दः।

ऋज्वायतां च विरलां च नतोन्नतां च
सप्तर्षिवंशकुटिलां च निवर्तनेषु।
निर्मुच्यमानभुजगोदरनिर्मलस्य
सीमामिवाम्बरतलस्य विभज्यमानाम्।। २ ।।

अन्वयः - वयस्य! ऋज्वायतां च विरलां नतोन्नतां च निवर्तनेषु सप्तर्षिवंशकुटिलां निर्मुच्यमानभुजगोदरनिर्मलस्य अम्बरतलस्य विभज्यमानां सीमाम् एव (एनां पश्यामि)।

व्याख्या - वयस्य = हे मित्र विदूषक, ऋज्वायतां च = ऋजुः सरला चासौ आयता विस्तीर्णा ताम् च, विरलां च = परस्परमसंहताम् च, नतोन्नतां च = उच्चावचाम् च, निवर्तनेषु = परावर्तनेषु, सप्तर्षिवंशकुटिलां = सप्तर्षिवंशः सप्ताख्यः तारकगणः तद्वत् कुटिलां = वक्राम्, निर्मुच्यमानभुजगोदरनिर्मलस्य = निर्मुच्यमानः निर्मुक्तनिर्मोकः यः भुजगः सर्पः तस्य उदरम् इव निर्मलं स्वच्छं तस्य, अम्बरतलस्य = गगनतलस्य विभज्यमानां = पृथक् क्रियमाणाम्, सीमाम् इव = मर्यादारेखाम् इव, एनाम् = सारसपङ्क्तिम्, पश्यामि इति शेषः।

टिप्पणी - अत्रोपमोत्प्रेक्षा स्वभावोक्तिश्चालङ्काराः। वसन्ततिलकाच्छन्दः।

मधुमदकला मदनार्ताभिः प्रियाभिरुपगूढा।
पादन्यासविषण्णा वयमिव कान्तावियुक्ता स्युः।। ३ ।।

अन्वयः - मधुमदकलाः मदनार्ताभिः प्रियाभिः उपगूढाः मधुकराः पादन्यासविषण्णाः सन्तः वयम् इव कान्तवियुक्ताः स्युः।

व्याख्या - मधुमदकलाः = मधुनः पुष्परसस्य यः मदः तेन कलाः अव्यक्तमधुरनादयुक्ताः, मदनार्ताभिः = मदनेन कामेन आर्ताभिः पीडिताभिः, प्रियाभिः = प्रियतमाभिः, भ्रमरीभिरित्यर्थः, उपगूढाः = आलिङ्गिताः, मधुकराः = भ्रमराः, पादन्यासविषण्णाः = पादयोः चरणयोः न्यासेन निक्षेपेण विषण्णाः खिन्नाः सन्तः, वयमिव = अहम् उदयनः इव, कान्तावियुक्ताः = कान्तया प्रियया वियुक्ताः विरहिताः, स्युः = भवेयुः।

टिप्पणी - अत्रोपमालङ्कारः। अस्मिन् श्लोके आर्या छन्दः।

पद्मावती बहुमता मम यद्यपि रूपशीलमाधुर्यैः।
वासवदत्ताबद्धं न तु तावन्मे मनो हरति।। ४।।

अन्वयः - यद्यपि रूपशीलमाधुर्यैः पद्मावती मम बहुमता तु वासवदत्ताबद्धं मे मनः तावत् न हरति।

व्याख्या - यद्यपि, रूपशीलमाधुर्यैः = रूपं सौन्दर्यं शीलं चरित्रं माधुर्यं प्रीतिविशेषैः तैः, पद्मावती = मगधराजकुमारी, मम = उदयनस्य, बहुमता = अतिप्रिया, तु = किन्तु, वासवदत्ताबद्धं = वासवदत्तायां बद्धं लग्नम्, मे = ममोदयनस्य, मनः = चित्तम्, तावत् न हरति = नैव आकर्षयति। अत्रार्याच्छन्दः।

अनेन परिहासेन व्याक्षिप्तं मे मनस्त्वया।
ततो वाणी तथैवेयं पूर्वाभ्यास्येन निस्सृता।। ५।।

अन्वयः -अनने परिहासेन त्वया मे मनः व्याक्षिप्तम्। ततः पूर्वाभ्यासेन इयं वाणी निस्सृता।

व्याख्या - अनेन = पूर्वोक्तेन, वासवदत्ता = पद्मावती वा कतरा प्रियतरा इत्येवं रूपेण, परिहासेन = उपहासयुक्तेन, वचनेन, त्वया = विदूषकेन, मे = ममोदयनस्य, मनः = प्रियाविरहितचित्तम्, व्याक्षिप्तं = दूरं नीतम्। ततः = तस्मात् कारणात्, पूर्वाभ्यासेन = पुरातनसंस्कारेण, इयम् वाणी = एषा वाणी, निस्सृता = मुखात् निर्गता। अत्रानुष्टुप्छन्दः।

दुःखं त्यक्तुं बद्धमूलोऽनुरागः
स्मृत्वा स्मृत्वा याति दुःखं नवत्वम्।
यात्रा त्वेषा यद् विमुच्येह बाष्पं
प्राप्तानृण्या याति बुद्धिः प्रसादम्।। ६।।

अन्वयः - बद्धमूलः अनुरागः त्यक्तुं दुःखम्। स्मृत्वा स्मृत्वा दुःखं नवत्वं याति। तु एषा यात्रा यत् इह बाष्पं विमुच्य बुद्धिः प्राप्तानृण्या (सति) प्रसादं याति।

व्याख्या - बद्धमूलः = दृढमूलः, चिरपरिचयरूढः इत्यर्थः, अनुरागः = वासवदत्ताविषयकप्रणयः, त्यक्तुं = परिहर्तुम्, दुःखं = कष्टम्, भवतीतिशेषः। स्मृत्वा स्मृत्वा = पुनः पुनः स्मरणं कृत्वा, दुःखं = कष्टम्, नवत्वं = नूतनत्वम्, याति = गच्छति, प्राप्नोतीत्यर्थः। तु = किन्तु, एषा यात्रा = इयं लोकस्थितिः, यत् = इह अस्मिन् संसारे, बाष्पं = अश्रु, विमुच्य = विसृज्य, बुद्धिः = मतिः, प्राप्तानृण्या = प्राप्तं लब्धं अनृण्यम् ऋणनिष्कृतिः यया सा, प्रसादं = प्रसन्नतां, याति = गच्छति, प्राप्नोतीत्यर्थः। अत्र शालिनीच्छन्दः।

शरच्छशाङ्कगौरेण वाताविद्धेन भामिनी।
काशपुष्पलवेनेदं साश्रुपातं मुखं मम।। ७।।

अन्वयः - हे भामिनि, शरच्छशाङ्कगौरवेण वाताविद्धेन काशपुष्पलवेन इदं मम मुखं साश्रुपातम् (अस्ति)।

व्याख्या - भामिनि = हे कोपने, शरच्छशाङ्कगौरवेण = शरच्चन्द्रधवलेन, वाताविद्धेन = वातेन वायुना, आविद्धिः आक्षिप्तः तेन, वायुप्रेरितेनेत्यर्थः, काशपुष्पलवेन = काशपुष्पस्य इन्दुगन्धकुसुमय लवेन परागकणेन, इदम् = एतत्, मम = मे उदयनस्य, मुखं = वदनम्, साश्रुपातम् = अश्रुपतनयुक्तम्, अस्तीति शेषः। अत्र व्याजोक्तिरनुप्राश्चालङ्कारौ, अनुष्टुप् छन्दश्च।

इयं बाला नवोद्वाहा सत्यं श्रुत्वा व्यथां व्रजेत्।
कामं धीरस्वभावेयं स्त्रीस्वभावस्तु कातरः।। ८।।

अन्वयः - नवोद्वाहा इयं बाला सत्यं श्रुत्वा व्यथां व्रजेत्। कामम् इयं धीरस्वभावा तु स्त्रीस्वभावः कातरः (भवति)।

व्याख्या - नवोद्वाहा = नवः नूतन उद्वाहः परिणयः यस्याः सा, इयम् = एषा, बाला = युवतिः, पद्मावतीत्यर्थः, सत्यं यथार्थम्, श्रुत्वा = आकर्ण्य, व्यथां = दुःखम्, व्रजेत् = प्राप्नुयात्। कामम् = अहं मन्ये यत्, इयं = पद्मावती, धीरस्वभावा = धैर्ययुक्ता, अस्तीति शेषः, तु किन्तु स्त्रीस्वभावः = नारीप्रकृतिः, कातरः = अधीरः, भवतीति शेषः।

गुणानां वा विशालानां सत्काराणां च नित्यशः।
कर्तारः सुलभा लोके विज्ञातारस्तु दुर्लभाः।। ९।।

अन्वयः - लोके विशालानां गुणानां सत्काराणां च कर्तारः नित्यशः सुलभाः, तु विज्ञातारः दुर्लभाः (सन्ति)।

व्याख्या - लोके = संसारे, विशालानां = महताम्, गुणानां = परोपकारादीनाम्, सत्काराणां च = आदराणां च, कर्तारः = अनुष्ठातारः, नित्यशः = सततम्, सुलभाः = सुप्राप्याः, तु = किन्तु, विज्ञातारः = बोद्धारः, दुर्लभाः = दुष्प्राप्याः, सन्तीति शेषः।

पञ्चमोऽङ्कः।

श्लाघ्यामवन्तिनृपतेः सदृशीं तनूजां
कालक्रमेण पुनरागतदारभारः।
लावाणके हुतवहेन हुताङ्गयष्टिं
तां पद्मिनीं हिमहतामिव चिन्तयामि।। १।।

अन्वयः - कालक्रमेण पुनरागतदारभारः लावाणके हुतवहेन हुताङ्गयष्टिं सदृशीम् अवन्तिनृपतेः श्लाघ्यां तां तनूजां हिमहतां पद्मिनीम् इव चिन्तयामि।

व्याख्या - कालक्रमेण = समयचक्रेण, पुनरागतदारभारः = पुनः भूयः आगतः उपस्थितः दारभारः पत्नीभारः यस्य सः अहमिति शेषः, लावाणके = एतन्नामके ग्रामे, हुतवहेन = अग्निना। हुताङ्गयष्टिं = हुता दग्धा अङ्गयष्टिः तनुलता यस्यास्ताम्, सदृशीम् = अनुरूपाम्, अवन्तिनृपतेः = अवन्तिराजस्य प्रद्योतस्य, श्लाघ्यां = प्रशंसनीयाम्, तां = पूर्वपरिणीताम्, तनूजां = तनयाम्, हिमहतां = हिमेन तुषारेण हतां नाशिताम्, पद्मिनीमिव = कमलिनीमिव, चिन्तयामि = चिन्तनं करोमि, स्मारमीत्यर्थः। अत्र उपमा विशेषोक्तिरलङ्काराः। अस्मिन् श्लोके वसन्ततिलका छन्दः।

रूपश्रिया समुदितां गुणतश्च युक्तां
लब्ध्वा प्रियां मम तु मन्द इवाद्य शोकः।
पूर्वाभिघातसरुणोऽप्यनुभूतदुःखः
पद्मावतीमपि तथैव समर्थयामि।। २ ।।

अन्वयः - रूपश्रिया समुदितां गुणतः च युक्तां प्रियां लब्ध्वा अद्य मम शोकः मन्दः इव। पूर्वाभिघातसरुजः अनुभूतदुःखः अपि पद्मावतीम् अपि तथा एव समर्थयामि।

व्याख्या - रूपश्रिया = सौन्दर्यसम्पत्त्या, समुदितां = संयुक्ताम्, गुणतः च = गुणैः च, युक्तां = सम्पन्नाम्, प्रियां = वल्लभाम्, पद्मावतीमित्यर्थः, लब्ध्वा = प्राप्य, अद्य = अस्मिन्दिवसे, मम = उदयनस्य, शोकः = प्रियावियोगजन्यविषादः, मन्दः इव = न्यूनः इव। पूर्वाभिघातसरुजः = पूर्वः प्राथमिकः चासौ अभिघातः वासवदत्ताविनाशरूपः प्रहारः तेन सरुजः पीडया सह वर्तमानः अनुभूतदुःखः = अनुभूतम् अनुभवकृतं, दुःखं कष्टं येन सः अपि, अहमुदयनः अपीति शेषः, पद्मावतीम् अपि = एतन्नामकमगधराजकुमारीमपि, तथा एव = तेन प्रकारेण एव, वासवदत्तामिवेत्यर्थः, समर्थयामि सम्भावयामि। अत्रोत्प्रेक्षालङ्कारः। अस्मिञ्छ्लोके वसन्ततिलका छन्दः।

ऋज्वायतां हि मुखतोरणलोलमालां
भ्रष्टां क्षितौ त्वमवगच्छसि मूर्खः सर्पम्।
मन्दानिलेन निशि या परिवर्तमाना
किञ्चित्करोति भुजगस्य विचेष्टितानि।। ३ ।।

अन्वयः - मूर्ख, हि त्वम् ऋज्वायताम् क्षितौ भ्रष्टाम् मुखतोरणलोलमालां सर्पम् अवगच्छसि या निशि मन्दानिलेन किञ्चित् परिवर्तमाना भुजगस्य विचेष्टितानि करोति।

व्याख्या - मूर्ख = हे मूढ, हि = निश्चयेन, त्वं = विदूषकः, ऋज्वायताम् = ऋजुः सरला चासौ आयता दीर्घा च ताम्, क्षितौ = भूमौ, भ्रष्टां = पतिताम्, मुखतोरणमालां = मुखं मुख्यं यत् तोरणं बहिर्द्वारं तत्र या लोला चञ्चला माला स्रक् ताम्, सर्प = भुजगम्, अवगच्छसि = जानासि, या = माला, निशि = रात्रौ, मन्दानिलेन = मन्दपवनेन, किञ्चित् = अल्पमात्रम्, परिवर्तमाना = विवर्तमाना, भूमौ लुण्ठतीत्यर्थः, भुजगस्य = सर्पस्य, विचेष्टितानि = गतिभङ्गीनि, करोति = विदधाति। अत्र भ्रान्तापह्नतिरलङ्कारः। अस्मिन् श्लोके वसन्ततिलका छन्दः।

शय्या नावनता तथास्तृतसमा न व्याकुलप्रच्छदा
न क्लिष्टं हि शिरोपधानममलं शीर्षाभिघातौषधैः।
रोगे दृष्टिविलोभनं जनयितु शोभा न काचित् कृता
प्राणी प्राप्य रुजा पुनर्न शयनं शीघ्नं स्वयं मुञ्चति।। ४।।

अन्वयः - हि शय्या अवनता न, तथा आस्तृतसमा व्याकुलप्रच्छदा न। अमलं शिरोपधानं शीर्षाभिघातौषधैः क्लिष्टं न। रोगे दृष्टिविलोभनं जनयितुं काचित् शोभा न कृता। प्राणी रुजा शयनं प्राप्य पुनः शीघ्रं स्वयं न मुञ्चति।

व्याख्या - हि = निश्चितम्, शय्या = शयनीयम्, अवनता न = शरीरभारेण न, तथा = यथापूर्वम्, आस्तृतसमा = आस्तृता आस्तरणवस्त्रेण अलङ्कृता सा चासौ समा अविषमा, किञ्चिदपि वैषम्यं नाधिगता व्याकुलप्रच्छदा = व्याकुलः सङ्कुचितः प्रच्छदः निचालः यस्याः तथाभूता, न नास्ति। अमलं = स्वच्छम्, शिरोपधानम् = उपबर्हणम्, शीर्षाभिघातौषधैः = शीर्षाभिघातः शिरोवेदना तन्निग्रहक्षमैः ओषधिविशेषैः, क्लिष्टं न = दूषितं न। रोगे = शिरोवेदनायाम्, दृष्टिविलोभनं = मनोविनोदम्, जनयितुम् = उत्पादयितुम्, काचित् = कापि, शोभा = कक्षसज्जा, न कृतां = न विहिता, प्राणी = जनः, रुजा = रोगेण, शयनं = शयनीयम्, प्राप्य = लब्ध्वा, पुनः = भूयः, शीघ्रं = त्वरितम्, स्वयं = स्वतः, न मुञ्चति = न त्यजति। अत्रानुमानालङ्कारः। शार्दूलविक्रीडितं छन्दः।

स्मराम्यवन्त्याधिपतेः सुतायाः
प्रस्थानकाले स्वजनं स्मरन्त्याः।
बाष्पं प्रवृत्तं नयनान्तलग्नं
स्नेहान्ममैवोरसि पातयन्त्याः।। ५।।

अन्वयः - प्रस्थानकाले स्वजनं स्मरन्त्याः, स्नेहात् प्रवृत्तं नयनान्तलग्नं बाष्पं मम एव उरसि पातयन्त्याः, अवन्त्याधिपतेः सुतायाः स्मरामि।

व्याख्या - उज्जयिनीतः वत्सराज्यं प्रति, प्रस्थानकाले = प्रयाणकाले, स्वजनम् = आत्मीयजनम्, मातापित्रादिकम्, बन्धुवर्गमित्यर्थः। स्मरन्त्याः = स्मरणं कुर्वत्याः स्नेहात् = प्रणयात्, प्रवृत्तम् = उद्‌गतम्, नयनान्तलग्नं = नयनान्तयोः नेत्रप्रान्तयोः लग्नं संलग्नम्, बाष्पम् = अश्रुजलम्, मम एव = मम उदयनस्य एव, उरसि = वक्षःस्थले, पातयन्त्याः = मुञ्चन्त्याः, अवन्त्यधिपतेः = अवन्तिराजस्य, सुतायाः = राजकुमार्याः वासवदत्तायाः, स्मरामि = स्मरणं करोमि। अत्रोपजातिः छन्दः।

बाहुशोऽप्युपदेशे यथा मामीक्षमाणया।
हस्तेन स्रस्तकोणेन कृतमाकाशवादितम्।। ६।।

अन्वयः - उपदेशेषु अपि बहुशः माम् ईक्षमाणया यया स्रस्तकोणेन हस्तेन आकाशवादितं कृतम्।

व्याख्या - उपदेशेषु अपि = मदुदयनकर्तृकवीणावादनशिक्षणेषु अपि बहुशः = अनेकवारम्, मां = शिक्षकमुदयनम्, ईक्षमाणया = दृश्यमानया, यया = वासवदत्तया, स्रस्तकोणेन = स्रस्तः च्युतः कोणः वीणावादनसाधनविशेषः यस्मात् तेन, हस्तेन करेण, आकाशवादितम् = आकाशे शून्ये वादितं वादनम्, कृतं = विहितम्, स्नेहविशेषेण राजोदयनस्य मुखदर्शने व्यग्रत्वेन अस्थाने वादनं कृतमित्यर्थः। अत्रानुष्टुप् छन्दः।

निष्क्रामन् सम्भ्रमेणाहं द्वारपक्षेण ताडितः।
ततो व्यक्तं न जानामि भूतार्थोऽयं मनोरथः।। ७।।

अन्वयः - सम्भ्रमेण निष्क्रामन् अहं द्वारपक्षेण ताडितः। ततः अयं मनोरथः भूतार्थः (वा) व्यक्तं न जानामि।

व्याख्या - सम्भ्रमेण = त्वरया, निष्क्रामन् = निर्गच्छन्, अहम् = उदयनः, द्वारपक्षेण = द्वारपार्श्वकाष्ठेन, ताडितः = आहतः, अस्मीति शेषः, ततः = तस्मात्कारणात्, अयम् = एषः वासवदत्तायाः स्पर्शः, भूतार्थः = भूतार्थः यथा, व्यक्तं = स्पष्टम्, न जानामि = नावगच्छामि। अत्रानुष्टुप् छन्दः।

शय्यायामवसुप्तं मां बोधयित्वा सखे! गता।
दग्धेति ब्रुवता पूर्वं वञ्चितोऽस्मि रुमण्वता।। ८।।

अन्वयः - सखे, शय्यायाम् अवसुप्तं मां बोधयित्वा गता। 'दग्धा' इति ब्रुवता रुमण्वता पूर्वं वञ्चितः अस्मि।

व्याख्या - सखे = हे मित्र, शय्यायां = शयनीये, अवसुप्तं = शयितम्, माम् = उदयनम्, बोधयित्वा = जागरयित्वा, गता = निष्क्रान्ता, वासवदत्ता समुद्रगृहकक्षादिति शेषः। दग्धा इति = ज्वलिता इति, वासवदत्ता इति शेषः, ब्रुवता = कथयता, रुमण्वता = इत्याख्यामात्येन, पूर्वं = प्रथमम्, वञ्चितः अस्मि = विप्रलब्धः अस्मि। अनुष्टुप् छन्दः।

यदि तावदयं स्वप्नो धन्यमप्रतिबोधनम्।
अथायं विभ्रमो वा स्याद् विभ्रमो ह्यस्तु मे चिरम्।। ९।।

अन्वयः - यदि तावत् अयं स्वप्नः अप्रतिबोधनं धन्यम्, वा अयं विभ्रमः स्यात्, हि मे चिरं विभ्रमः अस्तु।

व्याख्या - यदि = चेत्, तावत् = वाक्यालङ्कारे, अयम् = एषः, स्वप्नः = स्वापः, अप्रतिबोधनम् = अजागरणम्, धन्यं = प्रशस्यतरम्, वा = अथवा, अयम् = एषः वासवदत्तासंयोगः, विभ्रमः = भ्रान्तिः, स्यात् = अस्तु, हि = तर्हि, मे = मम उदयनस्य, चिरं = बहुकालं यावत्, विभ्रमः = भ्रान्तिः, अस्तु = स्यात्। अनुष्टुप् छन्दः।

स्वप्नस्यान्ते विबुद्धेन नेत्रविप्रोषिताञ्जनम् ।
चरित्रमपि रक्षन्त्या दृष्टं दीर्घालकं मुखम् ।। १० ।।

अन्वयः - स्वप्नस्य अन्ते विबुद्धेन (मया) चरित्रम् अपि रक्षन्त्याः (वासवदत्तायाः) नेत्रविप्रोषिताञ्जनं दीर्घालकं मुखं दृष्टम् ।

व्याख्या - स्वप्नस्य = स्वापस्य, अन्ते = अवसाने विबुद्धेन = जागरितेन, मया उदयनेन इत्यर्थः, चारित्रम् अपि = सच्चरित्रताम् अपि, रक्षन्त्याः = पालयन्त्याः, वासव-दत्तायाः इति शेषः, नेत्रविप्रोषिताञ्जनं = नेत्राभ्यां नयनाभ्यां विप्रोषितं दूरीकृतम् अञ्जनं कज्जलं यस्मिन् तत् दीर्घालकं = दीर्घाः लम्बमानाः अलकाः कुन्तला यस्मिन् तत्, मुखं = वदनम्, दृष्टम् = अवलोकितम्। अत्रानुष्टुप् छन्दः।

योऽयं सन्त्रस्तया देव्या तया बाहुर्निपीडितः ।
स्वप्नेऽप्युत्पन्नसंस्पर्शो रोमहर्षं न मुञ्चति ।। ११ ।।

अन्वयः - संत्रस्तया तया देव्या यः अयं बाहुः निपीडितः। स्वप्ने अपि उत्पन्नसंस्पर्शः रोमहर्षं न मुञ्चति।

व्याख्या - संत्रस्तया = अतिभीतया, तया = कृताभिषेकया देव्या वासवदत्तया, यः अयं = यः एषः, बाहुः = भुजः, निपीडितः = दृढं गृहीतः, शयनीये आरोपितः इत्यर्थः, तेन कारणेन स्वप्ने अपि = निद्रायाम् अपि, उत्पन्नसंस्पर्शः = उत्पन्नः सञ्जातः संस्पर्शः सम्पर्कः यस्य तादृशः, रोमहर्षं = रोमाञ्चम्, न मुञ्चति = न त्यजति। अत्रानुष्टुप् छन्दः।

भिन्नास्ते रिपवोभवद्गुणरता पौराः समाश्वासिताः
पार्ष्णी यापि भवत्प्रयाणसमये तस्या विधानं कृतम् ।
यद्यत् साध्यमरिप्रमाथजननं तत्तन्मयानुष्ठितं
तीर्णा चापि बलैर्नदी त्रिपथगा वत्साश्च हस्ते तव ।। १२ ।।

अन्वयः - ते रिपवः भिन्नाः। भवद्गुणरताः पौरा समाश्वासिताः। भवत्प्रयाणसमये या पार्ष्णी तस्याः अपि पिधानं कृतम्। अरिप्रमथजननं यत् यत् साध्यं तत् तत् मया अनुष्ठितम्। बलैः त्रिपथगा नदी अपि तीर्णा च। वत्साःच तव हस्ते (सन्ति)।

व्याख्या - ते = तव उदयनस्य, रिपवः = शत्रवः, भिन्नाः = भेदनीतिप्रयोगेण भेदं प्रापिताः, भवद्गुणरताः = भवतः श्रीमतः राजोदयनस्य गुणेषु दयादाक्षिण्यादिगुणेषु रताः अनुरक्ताः, पौराः = नागरिकाः, समाश्वासिताः = सम्यगाश्वासनं प्रापिताः। भवत्प्रयाणसमये = त्वद्विजययात्राकाले, या पार्ष्णी = या पृष्ठसेनाः, तस्याः अपि = पृष्ठसेनायाः अपि, विधानं = रचनम्, कृतं = विहितम्। अरिप्रमाथजननं = अरीणां शत्रूणां प्रमाथः = विध्वंसः तस्य जननम् उत्पादकं यत् यत् = कार्यम्, साध्यम् = साधनीयम् तत् तत् = कार्यम् मया = दर्शकेन, अनुष्ठित = सम्पादितम्। बलैः =

सैनिकैः, त्रिपथगा = गङ्गा, नदी अपि = सरित् अपि, तीर्णा च = लंघिता च, वत्साः च = वत्सदेशाः , तव = उदयनस्य, हस्ते = करे सन्तीति शेषः। काव्यलिङ्गमलङ्कारः। शार्दूलविक्रीडितं छन्दः।

उपेत्य नागेन्द्रतुरङ्गतीर्णे
तमारुणिं दारुणकर्मदक्षम्।
विकीर्णबाणोग्रतरङ्गभङ्गे
महार्णवाभे युधि नाशयामि।। १३ ।।

अन्वयः - नागेन्द्रतुरङ्गतीर्णे विकीर्णबाणोग्रतरङ्गभङ्गे महार्णवाभे युधि उपेत्य दारुणकर्मदक्षं तम् आरुणिं नाशयामि।

व्याख्या - नागेन्द्रतुरङ्गतीर्णे = नागेन्द्राः = गजेन्द्राः च तुरङ्गाः = अश्वाः च तैः तीर्णे = तरणाधारे, विकीर्णबाणोग्रतरङ्गभङ्गे = विकीर्णबाणाः = विक्षिप्तशराः एव उग्रतरङ्गाः = भयङ्करोर्मयः तैः भङ्गः = कुटिलः यस्मिन् = तस्मिन्, महार्णवाभे = महार्णवस्य = महासागरस्य आभा = शोभा यस्य तस्मिन् युधि = सङ्ग्रामे, उपेत्य = सम्प्राप्य, दारुणकर्मदक्षं = दारुणेषु = भीषणेषु कर्मसु = कार्येषु दक्षं = निपुणम् तं = पूर्वोक्तम्, आरुणिम् = एतन्नामकं शत्रुम्, नाशयामि = मारयामि। रूपकोपमयोः संसृष्टिः, अत एव सङ्करालङ्कारः।

षष्ठोऽङ्कः।

श्रुतिसुखनिनदे! कथं नु देव्याः
स्तनयुगले जघनस्थले च सुप्ता।
विहगगणरजोविकीर्णदण्डा
प्रतिभयमध्युषितास्यरण्यवासम्।। १ ।।

अन्वयः - श्रुतिसुखनिनदे, देव्याः स्तनयुगले जघनस्थले च सुप्ता त्वं विहगगण-रजोविकीर्णदण्डा कथं नु प्रतिभयम् अरण्यवासम् अध्युषिता असि।

व्याख्या - श्रुतिसुखनिनदे = हे कर्णानन्दशब्दयुक्ते वीणे, देव्याः = वासवदत्तायाः, स्तनयुगले = कुचयुग्मे, जघनस्थले च = कटिप्रदेशे च, सुप्ता = शयिता, त्वं वीणा, विहगगणरजोविकीर्णदण्डा = विहगगणस्य = पक्षिसमूहस्य रजोभिः = मलैः, विकीर्णः = व्याप्तः दण्डः = प्रवालः यस्याः सा, कथं तु = केन प्रकारेण, प्रतिभयम् = भयङ्करम्, अरण्यवासं = अरण्ये = वने वासं = निवासम्, अध्युषिता असि = स्थिता असि। पुष्पिताग्रा छन्दः।

श्रोणीसमुद्वहनपार्श्वनिपीडितानि
खेदस्तनान्तरसुखान्युपगूहितानि।
उद्दिश्य मां च विरहे परिदेवतानि
वाद्यान्तरेषु कथितानि च सास्मितानि।। २ ।।

अन्वयः - श्रोणीसमुद्वहनपार्श्वनिपीडितानि खेदस्तनान्तरसुखानि, उपगूहितानि, विरहे माम् उद्दिश्य परिदेवतानि, वाद्यान्तरेषु सस्मितानि कथितानि च (न स्मरामि)।

व्याख्या - श्रोणीसमुद्वहनपार्श्वनिपीडितानि = श्रोण्या = जघनेन समुद्वहनं धारणं तानि पार्श्वयोः = उभयपृष्ठभागयोः निपीडितं = संस्पर्शनं तानि च, खेदस्तनान्तरसुखानि = खेदे = श्रमे सति स्तनान्तरे = कुचमध्ये सुखानि = आनन्दकराणि, उपगूहितानि = आलिङ्गनानि, विरहे = वियोगे, माम् = उदयनम्, उद्दिश्य = उद्देश्यं कृत्वा, परिदेवितानि = विलपितानि, वाद्यान्तरेषु = वीणावादनावसरमध्येषु, सस्मितानि = मन्दहासयुक्तानि, कथितानि च = वचनानि च, न स्मरामि इति शेषः। वसन्ततिलका छन्दः।

चिरप्रसुप्तः कामो मे वीणया प्रतिबोधितः।
तां तु देवीं न पश्यामि यस्याः घोषवती प्रिया।। ३ ।।

अन्वयः - मे चिरप्रसुप्तः कामः वीणया प्रतिबोधितः। यस्याः घोषवतीप्रिया तां देवीं तु न पश्यामि।

व्याख्या - मे = मम उदयनस्य, चिरप्रसुप्तः = चिरं = बहुकालं प्रसुप्तः = शयितः, कामः = वासवदत्ताविषयकाभिलाषः, वीणया = घोषवतीनाम्न्या वल्लक्या, प्रतिबोधितः = उद्‌बोधितः, यस्याः = देव्याः वासवदत्तायाः, घोषवतीप्रिया = घोषवतीवीणा प्रिया = अभीष्टा, तां देवीं तु = वासवदत्ताम् तु न पश्यामि = न विलोकयामि। अत्रानुष्टुप्छन्दः।

किं वक्ष्यतीति हृदयं परिशङ्कितं मे
कन्या मयाऽप्यपहृता न च रक्षितां सा।
भाग्यैश्चलैर्महदवाप्तगुणोपघातः
पुत्रः पितुर्जनितरोष इवास्मि भीतः।। ४ ।।

अन्वयः - किं वक्ष्यति, इति मे हृदयं परिशङ्किम्। मया कन्या उपहृता च सा अपि न रक्षिता। चलैः भाग्यैः महदवाप्तगुणोपघातः पितुः जनितरोषः पुत्रः इव भीतः अस्मि।

व्याख्या - किं वक्ष्यति = इति तातः महासेनः कं कथयिष्यति इति, मे = मम उदयनस्य, हृदय = चित्तम्, परिशङ्कितम् = शङ्काग्रस्तम् अस्तीति शेषः, मया = उदयनेन, कन्या = राजकुमारी वासवदत्ता, उपहृता = अपनीता, तयोः अनुमत्या विना तयोः राजकुमारी वासवदत्ता मया चौरेण उपहृत्य उज्जयिनीतः कौशाम्बीम् आनीता इत्यर्थः। च = किन्तु, सा अपि = सा वासवदत्ता अपि, न रक्षिता = न पालिता, लावणकग्रामे अग्निदाहेन न रक्षिता इत्यर्थः, चलैः = चञ्चलैः, भाग्यैः = भागधेयैः, महदवाप्तगुणोपघातः = महत्सु = गुरुजनेषु अवाप्तः = प्राप्तश्च, गुणानां = दयादीनां गुणानाम् उपघातः = भङ्गः येन सः पितुः = जनकस्य, जनितरोषः = जनितः उत्पादितः रोषः = क्रोधः येन स तादृशः, पुत्रः इव = सुतः इव, भीतः अस्मि = भययुक्तः अस्मि। उपमालङ्कारः।

वसन्ततिलका छन्दः।

सम्बन्धिराज्यमिदमेत्य महान् प्रहर्षः
स्मृत्वा पुनर्नृपसुतानिधनं विषादः।
किं नाम देव! भवता न कृतं यदि स्यात्
राज्यं परैरपहृतं कुशलं च देव्याः।। ५।।

अन्वयः - इदं सम्बन्धिराज्यम् एत्य महान् प्रहर्षः, पुनः नृपसुतानिधनं स्मृत्वा महान् विषादः (अस्ति)। दैवः, परैः अपहृतं राज्यं देव्याः कुशलं च यदि स्यात् भवता किं नाम न कृतम्।

व्याख्या - इदम् = एतत्, सम्बन्धिराज्यं = भर्तृ जामातुः उदयनस्य राज्यम्, एत्य = आगत्य, मम इति शेषः, महान् = अधिकः, प्रहर्षः = प्रमोदः, पुनः = भूयः, नृपसुतानिधनं = नृपसुतायाः = राजकुमार्याः वासवदत्तायाः निधनं = मरणम्, स्मृत्वा = स्मरणं कृत्वा, महान् = अधिकः, विषादः = शोकः, अस्तीति शेषः। दैव = हे विधाता, परैः = अन्यैः रिपुभिरित्यर्थः, अपहृतं = बलात् अपहरणं कृतम्, राज्यं = वत्सराज्यम्, देव्याः = राजकुमार्याः वासवदत्तायाः, कुशलं च = मङ्गलं च, यदि = चेत्, स्यात् = भवेत् तर्हि भवता = विधिना, किं नाम = किमभीष्टम्, न कृतं = न सम्पादितम्, सर्वमभीष्टं सम्पादितमित्यर्थः। वसन्ततिलकाच्छन्दः।

पृथिव्यां राजवंश्यानामुदयास्तमयप्रभुः।
अपि राजा सकुशली मयाऽऽकांक्षितबान्धवः।। ६।।

अन्वयः - पृथिव्यां राजवंश्यानाम् उदयास्तमयप्रभुः (एवं च) मया काङ्क्षितबान्धवः सः राजाः कुशली अपि?

व्याख्या - पृथिव्यां = भूतले, राजवंश्यानाम् = राजवंशोत्पन्नानां क्षत्रियाणाम्, उदयास्तमयप्रभुः = उदयः = उत्कर्षः, अस्तमयः = विनाशः, तयोः प्रभुः = समर्थः, मया = उदयनेन, काङ्क्षितबान्धवः = काङ्क्षितम् = इच्छितम्, बान्धवं = बन्धुभावं येन सः, सः = प्रसिद्धः, राजा = महासेनः, कुशली अपि = कुशलेन वर्तते। अनुष्टुप्छन्दः।

कातरा योऽप्यशक्ता वा नोत्साहस्तेषु जायते।
प्रायेण हि नरेन्द्रश्रीः सोत्साहैरेव भुज्यते।। ७।।

अन्वयः - ये कातराः अपि वा अशक्ताः, तेषु उत्साहः न जायते। हि प्रायेण नरेन्द्रश्रीः सोत्साहैः एव भुज्यते।

व्याख्या - ये = जनाः, कातराः = भीरवः, अपि वा = अथवा, अशक्ताः = असमर्थाः, तेषु = असमर्थेषु, उत्साहः = अध्यवसायः, न जायते = न उत्पद्यते, हि = यतो हि, प्रायेण = बहुधा, नरेन्द्रश्रीः = राज्यश्रीलक्ष्मीः सोत्साहैः एव = उत्साहसम्पन्नैः एव भुज्यते = सेव्यते। अत्रानुष्टुप्छन्दः।

अहमवजितः पूर्वं तावत् सुतैः सह लालितो
दृढमपहृता कन्या भूयो मया न च रक्षिता।
निधनमपि श्रुत्वा तस्यास्तथैव मयि स्वता
ननु यदुचितात् वत्सान् प्राप्तुं नृपोऽत्र कारणम्।। ८।।

अन्वयः - पूर्वं तावत् अहम् अवजितः, सुतैः सह लालितः। मया कन्या दृढम् अपहृता भूयः च न रक्षिता। तस्याः निधनम् अपि च श्रुत्वा मयि तथा एव स्वता। ननु यत् उचितान् वत्सान् प्राप्तुम् अत्र नृपः हि कारणम्।

व्याख्या - पूर्वं = पुरा, तावत् = वाक्कायलङ्कारे अहम् = उदयनः अवजितः = पराजितः, सुतैः सह = आत्मपुत्रैः सह, लालितः = पालितः, मया = उदयनेन, कन्या = राजकुमारी वासवदत्ता, दृढं = दृढतापूर्वकम्, अपहृता = अपनीता, अपहरणं कृत्वा स्वराज्यमानीता इत्यर्थः, भूयः च = पुनः च, न रक्षिता = न रक्षणं कृता, लावणकग्रामे अग्निदाहे न त्राता इत्यर्थः। तस्याः = वासवदत्तायाः, निधनम् अपि = मरणम् अपि, श्रुत्वा = आकर्ण्य, मयि = उदयने, तथा एव = तादृशी एव, पौर्वकालिकी एवेत्यर्थः, स्वता = आत्मीयता। ननु = आमन्त्रणे, हे आर्य इत्यर्थः। उचितान् = युक्ताधिकारविषयान् पूर्वोपभोक्तान्, वत्सान् = वत्सराज्यान्, प्राप्तुं = लब्धुम्, अत्र = अस्मिन्विषये, नृपः = महाराजः महासेनः, हि = एव, कारणं = हेतुः, अस्तीति शेषः। अत्र हरिणीच्छन्दः। तल्लक्षणं यथा 'रसयुगहयैन्सौ म्रौ स्लौ गौयदा हरिणी तदा।

षोडशान्तःपुरज्येष्ठा पुण्या नगरदेवता।
मम प्रवासदुःखार्ता माता कुशलिनी ननु।। ९।।

अन्वयः - षोडशान्तःपुरज्येष्ठा पुण्या नगरदेवता मम प्रवासदुःखार्ता माता कुशलिनी ननु?

व्याख्या - षोडशान्तःपुरज्येष्ठा = षोडशेषु = षोडशसंख्यकेषु अन्तःपुरेषु = राजदारेषु ज्येष्ठा = श्रेष्ठा, पुण्या = पवित्राचरणा, नगरदेवता = पुरदेवीस्वरूपा, सर्वजनमाननीयेत्यर्थः। मम = उदयनस्य, प्रवासदुःखार्ता = प्रवासस्य = देशान्तरवासस्य, दुःखेन = कष्टेन आर्ता = पीडिता, माता = पत्नीमाता श्वश्रूरङ्गारवती इत्यर्थः, कुशलिनी ननु = सकुशला ननु। अत्रानुष्टुप्छन्दः।

कः कं शक्तो रक्षितुं मृत्युकाले
रज्जुच्छेदे के घटं धारयन्ति।
एवं लोकस्तुल्यधर्मा वनानां
काले काले छिद्यते रुह्यते वा।। १०।।

अन्वयः - मृत्युकाले कः कं रक्षितुं शक्तः। रज्जुच्छेदे के घटं धारयन्ति? एवं वनानां तुल्यधर्मः लोकः काले काले छिद्यते रुह्यते।

व्याख्या - मृत्युकाले = मरणसमये,कः = जनः, कं = जनम्, रक्षितुं = मृत्योः परित्रातुम्, शक्तः = समर्थः, कोऽपि समर्थो न भवतीत्यर्थः, रज्जुच्छेदे = रज्जोः गुणस्य छेदे भङ्गे, के = जनाः, घटं = कूपे निपतन्तं कुम्भम्, धारयन्ति = दधति, कूपान्तः पतनात् कुम्भं निवारयितुं पारयन्ति कोऽपि न इत्यर्थः। एवम् अनेन प्रकारेण, वनानां = वनस्थवृक्षाणां, तुल्यधर्मः = तुल्यः समानः धर्मः स्वभावः यस्य सः, लोकः = जनः, काले काले = समये समये, छिद्यते = छिन्नः भवति, रुह्यते च = उत्पद्यते च। दृष्टान्तालङ्कारः। शालिनीच्छन्दः।

महासेनस्य दुहिता शिष्या देवी च मे प्रिय।
कथं सा न मया शक्या स्मर्तुं देहान्तरेष्वपि।। ११ ।।

अन्वयः - महासेनस्य दुहिता, मे प्रिया शिष्या देवी च सा मया देहान्तरेषु अपि कथं स्मर्तुं न शक्या?

व्याख्या - महासेनस्य = प्रद्योतस्य, दुहिता = राजकुमारी, मे = मम उदयनस्य, प्रिया = अभीष्टा, शिष्या = वीणावादने छात्रा, देवी च = महाराज्ञी च, सा = वासवदत्ता, मया = उदयनेन, देहान्तरेषु अपि = जन्मान्तरेषु अपि, कथं = केन प्रकारेण, स्मर्तुं = मरणं कर्तुम्, न शक्या = न समर्था। अनुष्टुप्छन्दः।

वाक्यमेतत् प्रियतरं राज्यलाभशतादपि।
अपराद्धेष्वपि स्नेहो यदस्मासु न विस्मृतः।। १२ ।।

अन्वयः - एतत् वाक्यं राज्यलाभशतात् अपि प्रियतरम्, यत् अपराद्धेषु अपि अस्मासु स्नेहः न विस्मृतः।

व्याख्या - एतत् = इदम्, वाक्यम् = अङ्गारवत्याः वचनम्, राज्यलाभशतात् अपि = प्रभूतराज्यप्राप्तेः अपि, अस्मासु = मयि उदयनविषये, स्नेहः = वात्सल्यम्, न विस्मृतः = न विस्मृतिं प्रापितः। अत्रानुष्टुप्छन्दः।

अस्य स्निग्धस्य वर्णस्य विपत्तिर्दारुणा कथम्।
इदं च मुखमाधुर्यं कथं दूषितमग्निना।। १३ ।।

अन्वयः - अस्य स्निग्धस्य वर्णस्य दारुणा विपत्तिः कथम्? इदं मुखमाधुर्यम् अग्निना कथं दूषितम्?

व्याख्या - अस्य = समीपस्थस्य, स्निग्धस्य = स्नेहयुक्तस्य, वर्णस्य = रूपस्य, दारुणा = कठोरा, विपत्तिः = विनाशः, कथं = केन प्रकारेण, अभूदिति शेषः। इदं = समीपस्थम्, मुखमाधुर्यम् = आननसौन्दर्यम्, अग्निना = अनलेन, कथं = केन प्रकारेण, दूषितं = विध्वंसीकृतम्, अत्रानुष्टुप्छन्दः।

यदि विप्रस्य भगिनी व्यक्तमन्या भविष्यति।
परस्परगता लोके दृश्यते रूपतुल्यता।। १४।।

अन्वयः - यदि विप्रस्य भगिनी (तर्हि) व्यक्तम् अन्या भविष्यति। लोके परस्परगता रूपतुल्यता दृश्यते।

व्याख्या - यदि = चेत्, विप्रस्य = ब्राह्मणस्य, भगिनी = स्वसा, तर्हीति शेषः। व्यक्तम् = स्पष्टम्, अन्या = इतरा, वासवदत्तायाः भिन्ना इति शेषः। भविष्यति = वर्तिष्यते। लोके = संसारे, परस्परगता = भिथ स्थिता, रूपतुल्यता = आकारसदृशता, दृश्यते = अवलोक्यते। अनुष्टुप्छन्दः।

प्रच्छाद्य राजमहिषीं नृपतेर्हितार्थं
कामं मया कृतमिदं हितमित्यवेक्ष्य।
सिद्धेऽपि नाम मम मर्मणि पार्थिवोऽसौ
किं वक्ष्यतीति हृदयं परिशङ्कितं मे।। १५।।

अन्वयः - नृपतेः हितार्थं राजमहिषीं प्रच्छाद्य, हितम् इति अवेक्ष्य, मया कामम् इदं कृतम्। मम कर्मणि सिद्धे अपि असौ पार्थिवः किं वक्ष्यति इति मे हृदयं परिशङ्कितं नाम।

व्याख्या - नृपतेः = महाराजोदयनस्य, हितार्थं = कल्याणार्थं, राजमहिषीं = महाराज्ञीं वासवदत्ताम्, प्रच्छाद्य = सङ्गोप्य, वासवदत्ता लावाणके अग्निदाहेन दग्धा इति प्रचारं कृत्वा पद्मावती समीपे न्यासरूपेण निक्षिप्य इत्यर्थः। हितम् = कल्याणम्, इति = इत्थम्, अवेक्ष्य = विचार्य, मया = यौगन्धरायणेन कामं = यथेच्छम्, इदम् = एतत्, पद्मावतीसमीपे वासवदत्तायाः न्यासरूपेण स्थापनम्, कृतं = विहितम्, मम = यौगन्धरायणस्य, कर्मणि = कार्ये, सिद्धे अपि = सफलीभूते अपि, असौ = पुरोदृश्यमानः, पार्थिवः = राजोदयनः, किं वक्ष्यति इति = किं कथयिष्यति इति, मे = मम यौगन्धरायणस्य, हृदयं = चित्तम्, परिशङ्कितं नाम = परितः शङ्काकुलम्, अस्तीति शेषः। वसन्ततिलकाछन्दः।

भारतानां कुले जातो विनीतो ज्ञानवाञ्छुचिः।
तन्नार्हसि बलाद्धर्तुं राजधर्मस्य देशिकः।। १६।।

अन्वयः - भारतानां कुले जातः विनीतः ज्ञानवान् शुचिः राजधर्मस्य देशिकः (असि) तत् बलात् हर्तुं न अर्हसि।

व्याख्या - भारतानां = भरतवंशजानाम्, कुले = वंशे, जातः = उत्पन्नः, विनीतः = नम्रः, ज्ञानवान् = विवेकशीलः, शुचिः = पवित्रः, राजधर्मस्य = नृपाचारस्य, देशिकः = आचार्यः, प्रवर्तकः इत्यर्थः, असीति शेषः, तत् = तस्मात् कारणात्, बलात् = बलपूर्वकात्, मम भगिनीं इति शेषः, हर्तुं = ग्रहीतुम्, न अर्हसि = न योग्यः अस्ति। परिकरालङ्कारः। अनुष्टुप्छन्दः।

किन्नु सत्यमिदं स्वप्नः सा भूयो दृश्यते मया।
अनयाप्येवमेवाहं दृष्टया वञ्चितस्तदा।। १७।।

अन्वयः - इदं किल सत्यं स्वप्नः नु? न मया भूयः दृश्यते। अहं तदा अपि एवम् एव दृष्टया अनया वञ्चितः।

व्याख्या - इदम् = एतत्, पूर्वोक्तं दृश्यम्, वासवदत्तायौगन्धरायणयोः दर्शनमित्यर्थः, सत्यं = यथार्थम्, स्वप्नः = स्वापः, नु = वितर्के, सा = पुरा समुद्रगृहे दृष्टा वासवदत्ता, मया = उदयनेन, भूयः = पुनः, दृश्यते = अवलोक्यते। अहम् = उदयनः, तदा = अपि तस्मिन्काले अपि, एवम् एव = एवं प्रकारेण एव, दृष्टया = अवलोकितया, अनया = वासवदत्तया वञ्चितः = विप्रलब्धः। अत्रानुष्टुप्छन्दः।

मिथ्योन्मादैश्च युद्धैश्च शास्त्रदृष्टैश्च मन्त्रितैः।
भवद्यत्नैः खलु वयं मज्जमानाः समुद्धृता।। १८।।

अन्वयः - मज्जमानाः वयं ननु मिथ्योन्मादैः च शास्त्रदृष्टैः मन्त्रितैः भवद्यत्नैः च समुद्धृता खलु।

व्याख्या - मज्जमानाः = मज्जन्तः, वयम् = उदयनादयः, मिथ्योन्मादैः च = अवास्तविकैः चित्तभ्रमचेष्टितैः च, युद्धैः च = सङ्ग्रामैः च, शास्त्रदृष्टैः = राजनीति-शास्त्रानुमोदितैः, मन्त्रितैः = गुप्तविचारैः, भवद्यत्नैः = भवतः च यौगन्धरायणस्य यत्नैः प्रयत्नैः च, समुद्धृताः = बहिर्निष्क्रान्ताः, खलु = निश्चयेन। अत्रानुष्टुप्छन्दः।

इमां सागरपर्यन्तां हिमवद्विन्ध्यकुण्डलाम्।
महीमेकातपत्राङ्कां राजसिंहः प्रशास्तु नः।। १९।।

अन्वयः - नः राजसिंहः सागरपर्यन्तां हिमवद्विन्ध्यकुण्डलाम् एकातपत्राङ्काम् इमां महीं प्रशास्तु।

व्याख्या - नः = अस्माकम्, राजसिंहः = राजश्रेष्ठः, सागरपर्यन्तां = सागराः समुद्राः पर्यन्ताः अन्तिमसीमात्मानो यस्याः ताम्, हिमवद्विन्ध्यकुण्डलाम् = हिमवान् विन्ध्यश्च हिमवद्विन्ध्यौ हिमाचलविन्ध्याचलौ कुण्डले शोभादायत्वात् कर्णवेष्टनस्थानापन्नौयस्याः ताम्, एकातपत्राङ्काम् = एकम् अद्वितीयम्, आतपत्रं श्वेतच्छत्रम्, यस्याः ताम्, इमाम् महीं = पृथिवीम्, प्रशास्तु = पालयतु। अनुष्टुप्छन्दः।

गद्यांगानाम् व्याख्यानम्।

(१) भो! श्रूयताम्। एषा खलु गुरुभिरभिहितनामधेयस्याऽस्माकं महाराजदर्शकस्य भगिनी पद्मावती नाम। सैषा नो महाराजमातरं महादेवीमाश्रमस्थामधिगम्यानुज्ञाता तत्र-भवत्या राजगृहमेव यास्यति। तदद्यास्मिन्नाश्रमपदे वासोऽभिप्रेतोऽस्याः।

व्याख्या - भो! = सम्बोधनवाचकमव्ययम्! श्रूयताम् = आकर्ण्यताम्। एषा = इयं पुरोदृश्यमाना, पद्मावतीनाम = पद्मावती अभिधाना, खलु = निश्चयेन, गुरुभिः = पित्रादिभिः, अभिहितनामधेयस्य = अभिहितं कथितं नामधेयं नाम यस्य तस्य, अस्माकं = काञ्चुकीयादीनाम्, महाराजदर्शकस्य = दर्शकाभिधानस्य महाराज्ञः, भगिनी = सहोदरा (अस्ति)। सा = पूर्वोक्ता, एषा = इयं पुरोदृश्यमाना, नः = अस्माकम्, महाराजमातरम् = महाराज्ञः स्वामिनः दर्शकस्य मातरं जननीम्, महादेवीं = तन्नामधेयाम्, आश्रमस्थाम् = आश्रमे विद्यमानाम्, अधिगम्य = प्राप्य, तत्रभवत्या = आदरणीयया महादेव्या, अनुज्ञाता = प्राप्तानुज्ञा, राजगृहं = राजभवनम्, एव, यास्यति = गमिष्यति। तत् = तस्मात् कारणात् अद्य = अस्मिन्दिवसे, अस्याः = पद्मावत्याः, अस्मिन् = अत्र, आश्रमस्थाने = आश्रमस्य स्थले, वासः = निवासः, अभिप्रेतः = अभिलषितः अस्ति।

भावार्थः - मगधेश्वरस्य दर्शकस्य सहोदरा एषा पद्मावती तपस्यार्थं तपोवननिवसन्त्याः स्वमातुः महादेव्या दर्शनाय आगता आसीत्। दर्शनं कृत्वा तया अनुज्ञाता सती स्वभवनं गमिष्यति। मार्गे स्थितेऽस्मिन् आश्रमे विश्रान्तुं अद्य तया निवासः इच्छितः।

(२) आर्य! प्रथममुद्घोष्य कः किमिच्छतीत्युक्तामिदानीं विचारयितुम्। यदेष भणति तदनुष्ठित्वार्यः।

व्याख्या - आर्य = हे महानुभाव कञ्चुकि! प्रथमम् = पूर्वम्, कः = कः जनः, किं = किं वस्तु, इच्छति = वाञ्छति, इति, उद्घोष्य = उद्गोषणां कृत्वा, इदानीं = अधुना, विचारयितुं = विचारं कर्तुम्, अयुक्तम् = अनुचितम्। एषः = अयं यौगन्धरायणः, यत् = येन प्रकारेण, भणति = कथयति, तत् = तेन प्रकारेण, आर्यः = पूजनीयः भवान्, अनुतिष्ठतु = स्वीकरोतु।

भावार्थः - कः कितिच्छतीति प्रथमं स्वमुखेनैवोद्घोष्य पश्चात् याचकप्रार्थनायाः सुकरत्वं दुष्करत्वं वा विचारयितुमनुचितमस्ति। तत् दुष्करमपि याचितमिदानीमङ्गीकार्यम्।

(३) हन्त भो! अर्धमवसितं भारस्य। यथा मन्त्रिभिः सह समर्थितं तथा परिणमति। ततः प्रतिष्ठिते स्वामिनि तत्र भवतीमुपनयतो मे इहात्र भवती मगधराजपुत्रीविश्वासस्थानं भविष्यति।

व्याख्या - हन्त भोः = हर्षसूचकमव्ययम्, भारस्य = विपक्षापहतस्वामिराज्य-परावर्तनभारस्य, अर्धं = अर्धभागम्, अवसितं = सम्पन्नम्। यथा = येन प्रकारेण, मन्त्रिभिः = अमात्यैः, सह = समम्, समर्थितं = मन्त्रयित्वा निर्धारितम्, तथा = तेन प्रकारेण, परिणमति = सम्पद्यते। ततःतस्मात् कारणात्, स्वामिनि = महाराजोदयने, प्रतिष्ठिते = स्वराज्ये स्थापिते सति, तत्र भवतीं = वासवदत्ताम्, उपनयतः = प्रापयतः, मे = मम यौगन्धरायणस्य, भवती मगधराजपुत्री = मगधराजकुमारी पद्मावती, विश्वासस्थानं = स्वामिनः वासवदत्ताविषये शीलशुद्धिविश्वासोत्पादने साक्षिणी, भविष्यति = गमिष्यति।

भावार्थः - वासवदत्तां पद्मावत्याः पार्श्वे न्यासरूपेण निधाय यौगन्धरायणस्य स्वीकृतकार्यस्यार्धभागः सम्पन्नः। अत एव सः अतिप्रसन्नः वर्तते। यदा उदयनः पुनः राज्यं ग्रहिष्यति तदा सः वासवदत्तया सह तस्य पार्श्वे गमिष्यति तस्मिन् काले चिरवियुक्तायाः अपि वासवदत्तायाः शीलादिविषये पद्मावत्या कथ्यमानं साक्ष्यं तद्विश्वासेन अवश्यमेव वत्सराजः स्वीकरिष्यति।

(४) ततः प्रतिनिवृत्तो राजा तद्वृत्तान्तं श्रुत्वा तयोर्वियोगजनितसन्तापस्तस्मिन्नेवाग्नौ प्राणान् परित्यक्तुकामोऽमात्यैर्महता यत्नेन वारितः।

व्याख्या - ततः = मृगयातः, प्रतिनिवृत्तः = प्रत्यावर्तितः, राजा = उदयनः, तद्वृत्तान्तं = अग्निदाहेन वासवदत्ता मृतः यौगन्धरायणः च मृतः इति वृत्तान्तं वृत्तम्, श्रुत्वा = आकर्ण्य, तयोः = वासवदत्तायौगन्धरायणयोः, वियोगजनितसन्तापः = वियोगेन विरहेण जनितम् उत्पादितं सन्तापं यस्य तादृशः (सन्), तस्मिन् = लावाणकग्रामे ज्वलिते, एव अग्नौ = वह्नौ, प्राणान् = जीवान्, परित्यक्तुकामः = परित्यक्तुं कामः अभिलाषः यस्य तादृशः, अमात्यैः = मन्त्रिभिः, महता प्रयत्नेन = महदोद्योगेन। वारितः = निवारितः।

भावार्थः - मृगयातः प्रत्यागमनानन्तरं वासवदत्तायौगन्धरायणयोर्दाहविषयकं वृत्तान्तं श्रुत्वा तदुभयोः विरहेण पीड्यमानं शोकावेगाधिक्येन अग्नौ निपत्य प्राणपरित्यागोत्सुकं राजानम् अतिप्रयासेन रुमण्वानादयः मन्त्रिणः अग्निपतनात् न्यवारयन्।

(५) तदिदानीं न जाने। 'इह तया सह हसितम्, इह तया सह कथितम्, इह तया सह पर्युषितम्, इह तया सह कुपितम्, इह तया सह शयितम्' इत्येवं विलपन्तं राजानममात्यैर्महता यत्नेन तस्माद् ग्रामाद् गृहीत्वाऽपक्रान्तम्, ततो निष्क्रान्ते राजानं प्रोषितनक्षत्रचन्द्रमिव नभोऽरमणीयः संवृत्तः सः ग्रामः। ततोऽहमपि निर्गतोऽस्मि।

व्याख्या - तत् = तत् राज्ञः स्वस्थताविषये, इदानीं = सम्प्रति, न जाने = निश्चितरूपेण न जानामि। इह = अत्र लावाणकग्रामे, तया = वासवदत्तया, सह = सार्धम्, हसितं = हास्यं कृतम्। इह = अत्र, तया = पूर्वोक्तया वासवदत्तया, सह, कथितं = वार्तालापः कृतः। इह = अस्मिन् ग्रामे तया सह, पर्युषितम् = अध्युषितम्। इह = अत्र तया सह, कुपितं = कृतककोपः उद्भावितः। इह = अत्र तया सह शयितं = शयनं कृतम्, इत्येवम् = अनेन प्रकारेण विलपन्तं = विलापं कुर्वन्तम्, राजानं = नृपतिमुदयनम्, अमात्यैः = मन्त्रिभिः, महता यत्नेन = महदुद्योगेन, तस्मात् = पूर्वोक्तात् ग्रामात् = पुरात्, गृहीत्वा = आदाय, उपक्रान्तम् = अपसृतम्, ततः = तस्मात् ग्रामात्, निष्क्रान्ते = निष्क्रमणकृते, राजानम् = उदयनम्, प्रोषितनक्षत्रचन्द्रम् = प्रोषितानि अन्तर्हितानि नक्षत्राणि तारकाः चन्द्रः इन्दुः च यत्र, तत् अरमणीयः = अमनोहरम्, नभः = आकाशम्, इव, सः = पूर्वोक्तः, ग्रामः = लावाणकः, संवृत्तः = जातः। ततः = तस्मात्, कारणात्, अहं = ब्रह्मचारी, अपि, निर्गतोऽस्मि = निष्क्रान्तोऽस्मि।

भावार्थः - राज्ञः उधयनस्य स्वस्थताविषये किमपि साम्प्रतं निश्चितरूपेण न जानामि। परञ्च अस्मिन्ग्रामे, वासवदत्तया सह उपहासः वार्तालापः निवासः प्रणयकोपः कृतः। अत्र तया सह शयनं कृतमिति रुदन्तं राजानं महदोद्योगेन आदाय रुमण्वानादयः तस्मात् ग्रामात् बहिः अगच्छत्। राज्ञः गमनानन्तरम् उपगतचन्द्रतारकमाकाशमिव सः ग्रामः मनोरमशून्यजातः। अनेन अहं ब्रह्मचारी अपि तस्मात् ग्रामात् निर्गत्य अन्यत्र पठनाय गच्छामि।

(६) कुञ्जरिके! कुञ्जरिके! कुत्र कुत्र भर्तृदारिका पद्मावती। किं भणसि, एषा भर्तृदारिका माधवीलतामण्डपस्य पार्श्वतः कन्दुकेन क्रीडतीति। यावद् भर्तृदारिकामुप-सर्पामि। (परिक्रम्यावलोक्य) अम्मो! इयं भर्तृदारिका उत्कृतकर्णचूलिकेन व्यायाम-सञ्जातस्वेदबिन्दुविचित्रितेन परिश्रान्तरमणीयदर्शनेन मुखेन कन्दुकेन क्रीडन्तीति एवा-गच्छति। यावदुपसर्पामि।

व्याख्या - कुञ्जरिके = हे कुञ्जरिके! भर्तृदारिका = आदरणीया, पद्मावती = एतदभिधाना राजकुमारी, कुत्र कुत्र = कस्मिन्स्थाने, वर्तते इति शेषः। किं भणसि = किं वदसि। एषा = पुरोदृश्यमाना, भर्तृदारिका = राजकुमारी। माधवीलतामण्डपस्य = वासन्तीलतानिकुञ्जस्य, पार्श्वतः = समीपे, कन्दुकेन, क्रीडति = खेलति। यावत्, भर्तृदारिकां = राजकुमारीम्, उपसर्पामि = पउगच्छामि। परिक्रम्य = परिभ्रम्य, अवलोक्य = दृष्ट्वा च। अम्मो = विस्मयवाचकमव्ययम्, इयम् = एषा, भर्तृदारिका = राजकुमारी, उत्कृतकर्णचूलिकेन = उत्कृता ऊर्ध्वकृता कर्णछूलिका कर्णाभूषणविशेषः यस्मिन् तेन, व्यायमसञ्जातस्वेदबिन्दुविचित्रितेन = व्यायामात् कन्दुकास्फालनजन्यपरिश्रमात् सञ्जाताः उत्पन्नाः ये स्वेदबिन्दवः धर्मबिन्दवः तैः विचित्रितेन, परिश्रान्तरमणीयदर्शनेन = परिश्रान्तेन रमणीयं मनोहरं दर्शनमवलोकनं यस्य तेन, मुखेन = आननेन, कन्दुकेन क्रीडन्ती = खेलन्ती, इतः एव, आगच्छति = आयाति। यावत्, उपसर्पामि = उपगच्छामि।

भावार्थः - 'भर्तृदारिका पद्मावतीलतामण्डपस्य समीपे कन्दुकेन क्रीडति' इति पद्मावत्याः स्थितिस्थानवस्थां च बुद्ध्वा चेटी अनन्तरकरणीयं कार्यं प्रस्तौति यत् राजदुहिता पद्मावती कन्दुकक्रीडाप्रसिता अस्मिन्नेव स्थाने समायाति। यावदुपसर्पामि।

(७) विवाहामोदसङ्कुले अन्तःपुरचतुशाले परित्यज्य पद्मावतीमिहागतास्मि प्रमदवनम्। यावदिदानीं मागधेयनिर्वृत्तं दुःखं विनोदयामि। अहो! अत्याहितम्! आर्यपुत्रोऽपि नाम परकीयः संवृत्तः। यावत् उपविशामि। धन्या खलु चक्रवाकवधूः याऽन्योन्यविरहिता न जीवति। न खल्वहं प्राणान् परित्यजामि। आर्यपुत्रं पश्यामीत्येतेन मनोरथेन जीवामि मन्दभाग्या।

व्याख्या - विवाहामोदसङ्कुले = विवाहस्य पद्मावत्याः पाणिग्रहणस्य आमोदः हर्षः तेन सङ्कुले परिपूर्णे, अन्तःपुरचतुःशाले = अन्तःपुरस्य शुद्धान्तस्य चतुःशालं सज्जनवर्ण तस्मिन्, पद्मावतीं = तदभिधानां राजदुहिताम्, परित्यज्य = त्यक्त्वा, इह = अत्र, प्रमदवनं = प्रमदोद्यानम्, आगता = सम्प्राप्ता, अस्मि = वर्ते। यावत्, इदानीं = सम्प्रति, भागधेयनिर्वृत्तं = दुर्भाग्योत्पन्नम्, दुःखं = कष्टम्,

विनोदयामि। अहो = चिन्तासूचकमव्ययम्, अत्याहितं = महानन्नर्थः। आर्यपुत्रः = पतिदेवः वत्सराजः, अपि, परकीयः, संवृत्तः = सञ्जातः। यावत्, उपविशामि = स्थास्यामि। चक्रवाकवधूः = चक्रवाकपत्नी, धन्या = प्रशंसनीया, या = पूर्वोक्ता चक्रवाकवधूः, अन्योन्यविरहिता = परस्परवियुक्ता, न जीवति = न प्राणान् धारयति। अहं = वासवदत्ता, प्राणान् = जीवनम्, न = नहि, खलु = निश्चितमेव, परित्यजामि। आर्यपुत्रम् = वत्सराजम्, पश्यामि = विलोकयामि, इति, एतेन = मयोक्तेन, मनोरथेन = अभिलाषेण, मन्दभाग्या = दुर्भाग्ययुक्ता, जीवामि = प्राणान् धारयामि।

भावार्थः - विवाहमहोत्सवशालिनि अन्तःपुरचतुःशाले राजदारिकां पद्मावतीं परित्यज्य वासवदत्ता प्रमदवनोद्यानं गता। यद्यपि बहुजनाकीर्णे वासवदत्तायाः प्रच्छन्नरूपायाः प्रमदोद्यानं स्थातुं नोचितम् तथापि स्वभाग्येन खिन्नं चित्तं विनोदयितुं तत्र तिष्ठति। तत्र स्थित्वा स स्वकीयानि भाग्यधेयानि.........। तस्याः भर्ताः उदयनः अपि परस्याः पद्मावत्याः संवृत्तः। सा आत्मानमपि निन्दयति यत् चक्रवाकी अपि प्रशंसनीया वर्तते यतः चक्रवाकेन वियुक्ता सती प्राणान् त्यजति। अहन्तु पद्मावत्याः विवाहप्रसङ्गेन अत्रागतः आर्यपुत्रो मम दृष्टिगोचरः भवेत् इति आशातन्तुनैव प्रियवियुक्ताऽपि जीवामि।

(८) भो! दिष्ट्या तत्रभवतो वत्सराजस्याभिप्रेतविवाहमङ्गलरमणीयः कालो दृष्टः। भो! कोनामैतज्जानाति तादृशे वयमर्थसलिलावर्ते प्रक्षिप्ता पुनरुन्मङ्क्ष्याम इति। इदानीं प्रसादेषूष्यते, अन्तःपुरदीर्घिकासु स्नायते, प्रकृतिमधुरसुकुमाराणि मोदकखाद्यानि खाद्यन्त इत्यनप्सरस्संवास उत्तरकुरुवासो मयानुभूयते। एकः खलु महान् दोषः, ममाहारः सुष्ठु न परिणमति, सुप्रच्छदनायां शय्यायां निद्रां न लभे। यथा वातशोणितमभित इव वर्तत इति पश्यामि। भो! सुखं नामयपरिभूतमकल्यवर्तं च।

व्याख्या - भोः = हे महानुभाव, दिष्ट्या = सौभाग्येन, तत्रभवतः = आदरणीयस्य, वत्सराजस्य = वत्सदेशनरेशस्योदयनस्य, अभिप्रेतविवाहमङ्गलरमणीयः = अभिप्रेतेन अभीष्टेन, विवाहमङ्गलेन पाणिग्रहणशुभेन रमणीयः रम्यः, कालः = समयः, दृष्टः = अवलोकितः। भोः = हे महानुभाव, कः = जनः, एतत् = इदम्, जानाति = अवगच्छति। तादृशे = तत्सदृशे, अनर्थसलिलावर्ते = सङ्कटजलभ्रमे, प्रक्षिप्ताः = निपतिताः, वयम् = विदूषकादयः, पुनः = भूयः, उन्मङ्क्ष्यामः इति = उन्मुक्ताः भविष्यामः इति। इदानीम् = अधुना, प्रासादेषु = राजभवनेषु, उष्यते = निवासः, क्रियते, अन्तःपुरदीर्घिकासु = अन्तःपुरनिवासवापीषु, स्नायते = स्नानं कुरुते, प्रकृतिमधरसुकुमाराणि = प्रकृत्या स्वभावेन, मधुराणि मिष्ठानि सुकुमाराणि कोमलानि, मोदकखाद्यानि = लड्डुकभक्ष्यपदार्थाः, खाद्यन्ते = भोज्यन्ते, इति अस्मात्कारणात्, अनप्सरःसंवासः = अप्सरःसहवासरहितः, उत्तरकुरुवासः = देवभूमिविशेषः, मया = विदूषकेन, अनुभूयते = अनुभवं कुरुते। खलु = किन्तु एकः = अद्वितीयः, महान् दोषः = महत् दूषणम्, यत्, मम = विदूषकस्य, आहारः = भोज्यपदार्थः, सुष्ठु = सम्यक्, न = नहि, परिणमति = परिपाकं गच्छति। सुप्रच्छनायां = शोभनास्तरणयुक्तायाम्, शय्यायां = शयनीये, निद्रां = स्वापः, न लभे = न प्राप्नोति। यथा = येन प्रकारेण, अमितः = परितः, वातशोणितम् इव = तदाख्यो रोगः इव, वर्तते = विद्यते, इति एवं प्रकारेण, पश्यामि = अवलोकयामि।

भोः = अरे, आमयपरिभूतं = रोगाक्रान्तम्, अकल्यवर्तं च = प्रातभर्जोनाभावः च, सुखम् = आनन्दः, न = नहि अस्तीति शेषः।

भावार्थः - अपहृतराज्येन वासवदत्ताविरहव्याकुलेन राज्ञा तत्समसुखदुःखैः विदूष-कादिभिः साक्षात् परम्परया वा यन्नाम तादृशं महत्कष्टमनुभूतं परञ्च राज्ञः पद्मावत्या सह विवाहेन ते अनिर्वचनीयसुखविशेषानुभूतिभाजनं भविष्यन्ति।

सम्प्रति ते किलास्मिन् समये वत्सराजनूतनविवाहमहिम्ना प्रासादवासान्तःपुरविहार-मधुरभोजनोपचितप्रभूतदिव्यसौभग्यसम्पन्नाः नूनामिमां भूमिम् अप्सराविहीनं स्वर्गमेव मन्यन्ते। एतादृक्सुखविशेषानुभवतः अपि विदूषकभोजनं सम्यक् परिपाकं न गच्छति अत एव सुन्दरकोमलाऽऽस्तरणयुक्तशय्यायामपि निद्रां न प्राप्नोति। येन सः वातरक्तव्याधिना पीडितः अपि। सः रोगाक्रान्तः प्रतराशविरहितं सुखं सुखं न मन्यते।

(९) कुत्र नु खलु गता तत्रभवती पद्मावती, लतामण्डपे गता भवेत्, उताहो असनकुसुमसञ्चितं व्याघ्रचर्मावगुण्ठितमिव पर्वततिलकं नाम शिलापट्टकं गता भवेत्, अथवा अधिककटुकगन्धसप्तच्छदवनं प्रविष्टा भवेत्, अथवा अलिखितमृगपक्षिसङ्कुलं दारुपर्वतकं गता भवेत्। ही! ही! शरत्कालनिर्मलेऽन्तरिक्षे प्रसारितबलदेवबाहुदर्शनीयां सारसपङ्क्तिं यावत् समाहितं गच्छन्तीं पश्यतु तावत् भवान्।

व्याख्या - तत्रभवती = आदरणीया, पद्मावती = तदभिधाना वत्सराजस्य नवपरिणीता पत्नी, कुत्र = कस्मिन्स्थाने, गता = याता (स्यात्)। लतामण्डपं = लतानिकुञ्जम्, गता = याता, भवेत् = स्यात्। उत अहो = अथवा असनकुसुमसञ्चितं = असनानां सर्जकतरूणां कुसुमैः पुष्पैः सञ्चितम् आच्छन्नम्, व्याघ्रचर्मावगुण्ठितं = शार्दूलकृत्तिसमाच्छादितम्, इव, पर्वततिलकं = पर्वततिलकाभिधानम्, शिलापट्टकं = शिलापीठकम्, गता = याता, भवेत् = स्यात्। अथवा = वा, अधिककटुकगन्धसप्तच्छदवनं = अधिककटुकः, अतितीक्ष्णा गन्धः सौरभं येषां तथोक्ता ये सप्तच्छदाः सप्तपर्णाः तेषां वनम् उद्यानम्, प्रविष्टा = प्रवेशं कृता, भवेत् = स्यात्। अथवा = वा आलिखितमृगपक्षिसङ्कुलं = आलिखिताः चित्रिताः ये मृगा हरिणाः पक्षिणः खगाः तैः सङ्कुलं व्याप्तम्, दारुपर्वतकं = दारुणा काष्ठेन निर्मितं पर्वतकम्, गता = याता भवेत् = स्यात्। हा हा = विस्मयहर्षसूचकमव्ययम्, शरत्कालनिर्मले = शरत्कालेन शीतसमये निर्मले स्वच्छे, अन्तरिक्षे = आकाशे, प्रसारितबलदेवबाहुदर्शनीयां = प्रसारितौ विस्तारितौ बलदेवस्य कृष्णाग्रजस्य बाहू भुजौ तौ इव दर्शनीयां मनोहराम्, समाहितम् गच्छतीं = चलन्तीम्, सुसङ्घटितम्, सारसपंक्तिः = सारसश्रेणिम्, भवान् = वत्सराजः, पश्यतु = विलोकयतु।

भावार्थः - पद्मावती कुत्र इति वितर्कयन् विदूषकः कथयति यत् सा लतानिकुञ्जं वा नानाविधसर्जकपुष्पाच्छन्नत्वेन व्याघ्रचर्मणावगुण्ठितं पर्वततिलकाभिधानं शिलापीठं वा

अत्यधिककटुगन्धसम्पन्नम् उद्यानं वा चित्रितविविधपशुपक्षिसङ्कीर्णं क्रीडापर्वतं गता भवेत्। तावत् शरत्कालनिर्मले आकाशे समुत्पतन्तीं श्रेणीबन्धमनोहराम् सारसश्रेणिं भवान् विलोकयतु।

(१०) इदानीं श्रृणोतु भवान्। तत्रभवती वासवदत्ता मे बहुमता। तत्रभवती पद्मावती तरुणी दर्शनीय अकोपना अनहङ्कारा मधुरवाक् सदाक्षिण्या। अयं चापरो महान् गुणः स्निग्धेन भोजनेन मां प्रत्युद्गच्छति वासवदत्ता कुत्र नु खलु गत आर्यवसन्तक इति।

व्याख्या - भवान् = राजा, इदानीं = सम्प्रति, श्रृणोतु = आकर्णयतु। मे = मम विदूषकस्य, तत्रभवती = आदरणीया, वासवदत्ता = अवन्तिराजदारिका, बहुमता = सम्मानपात्रा। तत्रभवती = आदरणीया पद्मावती = मगधराजकुमारी, तरुणी = युवती, दर्शनीया = सुन्दरी, अकोपना = क्रोधशून्या, अनहङ्कारा =निराभिमाना, मधुरवाक् = मधुरभाषिणी, सदाक्षिण्या = समानमृदुलोदारव्यवहारा, च वर्तते इति शेषः। अयम् = एषः, च, अपरः = अन्यः, महान्, गुणः = वैशिष्ट्यम् (आसीत्), यत् सा वासवदत्ता, स्निग्धेन = घृतपूरितेन, भोजनेन = खाद्यान्नेन, मां =विदूषकम्, प्रत्युद्गच्छति = अन्वेषयति, (यत्) आर्यवसन्तकः = पूजनीयः। विदूषकः, कुत्र = कस्मिन्, स्थाने, गतः = यातः।

भावार्थः - पद्मावतीवासवदत्तयोः वासवदत्ता विदूषकस्य अत्यधिकसम्मानपात्रा आसीत्। यद्यपि वासवदत्ता इव पद्मावती अपि युवती सुन्दरी क्रोधशून्या निराभिमाना मधुरभाषिणी चास्ति। परञ्च वासवदत्तायामेकोऽन्यं वैशिष्ट्यमासीत् यत् सा घृतपूरितं भोजनमादाय विदूषकमन्वेषयति स्म।

(११) अहो अकरुणाः खल्वीश्वरा मे। विरहपर्युत्सुकस्यार्यपुत्रस्य विश्रामस्थान-भूतेयमपि नाम पद्मावत्यस्वस्था जाता। यावत् प्रविशामि। अहो! परिजनस्य प्रमादः। अस्वस्थां पद्मावतीं केवलं दीपसहायां कृत्वा परित्यजति। इयं पद्मावत्यवसुप्ता। यावदुपविशामि। अथवान्यासनपरिग्रहेणाल्प इव स्नेहः प्रतिभाति। तदस्यां शय्यायामुप-विशामि। किन्नु खल्वेतया सहोपविशन्त्या अद्य प्रह्लादितमिव मे हृदयम्। दिष्ट्याविच्छिन्नसुखनिःश्वासा। निवृत्तरोगया भवितव्यम्। अथवैकदेशसंविभागतया शय-नीयस्य सूचयति मामालिङ्गेति। यावच्छयिष्ये।

व्याख्या - अहो = इति खेदसूचकमव्ययम्। मे = मम, ईश्वराः = देवाः, खलु = निश्चयेन, अकरुणाः = निष्ठुराः, वर्तन्ते इति शेषः, विरहपर्युत्सुकस्य = मम वियोगेन उत्कण्ठितस्य, आर्यपुत्रस्य = स्वामिनः, विश्रामस्थानभूता = विनोदपात्रजाता, इयम् = एषा, पद्मावती = मगधराजदुहिता, अपि, अवस्था = शिरोवेदनया पीडिता, जाता। यावत्, प्रविशामि = अन्तर्गच्छामि। अहो = खेदे! परिजनस्य = सेवकजनस्य, प्रमादः = असावधानत्वम्, अस्वस्थां = शिरोवेदनया पीडिताम्, पद्मावतीं = मगधराजपुत्रीम्, केवलम्, दीपसहाय्यां = दीपः एव सहचरः यस्याः तादृशीम्, कृत्वा = विधाय, परित्यजति। इयम् = एषा, पद्मावती, अवसुप्ता = निद्रिता। यावत्, उपविशामि = तिष्ठामि। अथवा = वा, अन्यासनपरिग्रहेण = अन्यत्रोपवेशनेन, स्नेहः = प्रेम, अल्प इव = न्यूनमिव, प्रतिभाति = प्रतीयते। तत् = तस्मात्, अस्यां शय्यायाम्, उपविशामि = तिष्ठामि। एतया = पद्मावत्या, सह,

उपविशन्त्याः = तिष्ठन्त्याः, अद्य = अस्मिन्दिवसे, मे = मम, हृदयं = चित्तम्, प्रह्लादितम् इव = हर्षोत्फुल्लमिव, सञ्जातः इति शेषः। दिष्ट्या = सौभाग्येन, अविच्छिन्नसुखनिःश्वासा = अविच्छिन्नः सतत सुखः सुखपूर्वकः निःश्वासः यस्याः तादृशी, निवृत्तरोगया = रोगनिर्मुक्तया, भवितव्यम् = भवनीयम्। अथवा = वा, एकदेशसंविभागतया = एकदेशस्य संविभागो यस्याः तस्याः भावः तया, शयनीयस्य = शय्यायाः, सूचयति = बोधयति (यत्) मां = पद्मावतीम्। आलिङ्ग = परिष्वजष्व। यावत्, शयिष्ये = शयनं करोमि।

भावार्थः - दैवाः निष्ठुराश्च भवन्ति। यतो हि वासवदत्तायाः विरहेण खिन्नचित्तस्य राजोदयनस्य पद्मावती एव विश्रामभूमिरासीत्, सापि इदानीं शिरोवेदनया पीडिता जाता। इत्थं विचिन्तयन्ती वासवदत्ता समुद्रगृहं प्रविश्य तत्र एकलामेव शयानां पद्मावतीं दृष्ट्वा सेवकजनं निन्दयति। रुगणस्य जनस्य शय्यां विहाय दूरं उपवेशनेन स्नेह-विघातकः भवति अत एव तस्यामेव शय्यायाम् उपविशतुम् अभिलषति। पद्मावत्याः निःश्वासेन तां रोगनिर्मुक्तां अवबोधयति, जनान्तरशयनपर्याप्तभागस्य रिक्तया पद्मावती-मालिङ्ग्य तया सह एव शयनं करोति।

(१२) जयत्वार्यपुत्रः। अस्माकं महाराजो दर्शकः भवन्तमाह - एषः खलु भवतोऽमात्यो रुमण्वान् महता बलसमुदायेनोपयातः खल्वारुणिमभिघातयितुम्। तथा हस्त्यश्वरथपदातीनि मामकानि विजयाङ्गानि सन्नद्धानि। तदुत्तिष्ठतु भवान्।

व्याख्या - आर्यपुत्रः = आदरणीयः भवान्, जयतु = विजयतु। अस्माकं = काञ्चुकीयादीनाम्, महाराजः = स्वामी, दर्शकः = तदभिधानः, भवन्तं = राजोदयनम्, आह, एषः = अयम्, भवतः = वत्सराजस्य, अमात्यः = मन्त्री, रुमण्वान् = तदभिधानः, महता, बलसमुदायेन = सैन्यसमूहेन, आरुणिम् = एतदभिधानं वत्सराजस्य शत्रुम् अभिघातुम् = भिहतं कर्तुम्, उपयातः = उपस्थितः। तथा, मामकानि = मत्सम्बन्धिनी, हस्त्यश्वरथपदातीनि = गजहयरथारोहिपादचारिप्रभृतीनि, विजयाङ्गानि = सैन्यानि, सन्नद्धानि = गन्तुमुद्यतानि, सन्तीति शेषः। तत् = तस्मात् कारणात्, भवान् = राजोदयनः, उत्तिष्ठतु = सज्जः भवतु।

भावार्थः - महाराजदर्शकाज्ञानुसारं काञ्चुकीयः वत्सराजं सूचयति यत् भवतः मन्त्रिणारुमण्वता शत्रुमारुणिं भवता प्रमाथयितुमभिलषता महान्तं सैन्यसमूहं समादाय अत्रोपस्थितम्। सेनाचतुष्टयं सज्जीभूतम्। भवानपि सोत्साहं सज्जी भवतु।

(१३) भवति! निवेद्यतां निवेद्यताम् वत्सराज्यलाभप्रवृद्धोदयायोदयनाय एषः खलु महासेनस्य सकाशाद् रैभ्यगोत्रः काञ्चुकीयः प्राप्तः, तत्रभवत्या चाङ्गारवत्या प्रेषितार्या वसुन्धरा नाम वासवदत्ताधात्री च, प्रतीहारमुपस्थिताविति।

व्याख्या - भवति = हे श्रीमति! वत्सराज्यलाभप्रवृद्धोदयाय = वत्सराज्यस्य तदभि-धानस्य राज्यस्य लाभेन प्राप्तेन प्रवृद्धः = वृद्धिं गतः उदयः उन्नतिः यस्य तस्मै, उदयनाय = वत्सराजाय।

निवेद्यतां = सूच्यताम्, खलु = निश्चयेन, महासेनस्य उज्जयिनीनरेशस्य, सकाशात् पार्श्वात्, रैभ्यगोत्रः = रैभ्यः गोत्रोत्पन्नः, एषः = समीपस्थः, काञ्चुकीयः तत्रभवत्या = आदरणीयया, अङ्गारवत्या = उज्जयिनीराजमहिष्या, च, प्रेषिता, आर्या = पूज्या, वसुन्धरा नाम = एतदभिधाना, वासवदत्ताधात्री = वासवदत्तायाः उदयनस्य पत्न्याः धात्री धायमाता, च, प्रतीहारं = द्वारदेशम्, उपस्थितौ = आगतौ।

भावार्थः - वत्सराजस्य श्वसुरगेहात् महासेनेन प्रेषितं काञ्चुकीयस्य अङ्गारवत्या प्रेषितां वासवदत्ताधात्र्याः आगमनं सूचयितुम् उदयनस्य काञ्चुकीयः प्रतीहारीं निवेदयति।

(१४) आह भट्टिनी - उपरता वासवदत्ता। मम वा महासेनस्य वा यादृशौ गोपालकपालकौ, तादृश एव त्वं प्रथममेवाभिप्रेतो जामातेति। एतन्निमित्तमुज्जयिनी-मानीतः। अनग्निसाक्षिकं वीणाव्यपदेशेन दत्ता। आत्मनश्चपलतयाऽनिर्वृत्तविवाहमङ्गल एव गतः। अथा चावाभ्यां तव च वासवदत्तायाश्च प्रतिकृतिं चित्रफलकायामालिख्य विवाहो निर्वृत्तः। एषा चित्रफलका तव शकाशं प्रेषिता। एतां प्रेक्ष्य निर्वृत्तो भव।

व्याख्या - भट्टिनी = राजमहिषी, आह - वासवदत्ता = तदभिधाना महासेनस्य राजदुहिचा, उपरता = मृता। मम = अङ्गारवत्याः, महासेनस्य वा = अवन्तिनरेशस्य वा, यादृशौ = यथा प्राणप्रियौ, गोपालकपालकौ = गोपालः च कपालकः च, त्वं = वत्सराजः, तादृशः = तथा एव प्राणप्रियः, प्रथममेव = उज्जयिन्यां तवानयनात् पूर्वमेव, अभिप्रेतः = अभिलषितः, जामाता = दुहिताभर्ता। एतन्निमित्तं = वासवदत्तया सह विवाहार्थम्, उज्जयिनीम् = अवन्तीम्, आनीतः = प्रापितः। अनग्निसाक्षिकं = अग्निसाक्ष्येण विना, वीणाव्यपदेशेन = वीणाया वीणावादनकलाशिक्षायाः व्यपदेशेन छलेन, दत्ता = तुभ्यमर्पिता। आत्मनः = स्वस्य, चपलतया = अधीरतया, अनिर्वृत्तविवाहमङ्गलं = न निर्वृत्तं न सञ्जातं विवाहमङ्गलं विवाहरूपः मङ्गलसंस्कारो यस्य तादृशः एव, गतः = यातः। अथ = तदनन्तरम्, च आवाभ्याम् अङ्गारवतीमहासेनाभ्याम्, च, तव = उदयनस्य, वासवदत्तायाः = आवयोः पुत्र्या च, प्रतिकृतिम् = आकारचित्रम्, चित्रफलकायाम्, आलिख्य = चित्रयित्वा विवाहः = पाणिग्रहणम्, निर्वृत्तः = सम्पादितः। एषा = मम धात्र्या पार्श्वे विद्यमाना, चित्रफलका, तत्र = उदयनस्य, सकाशं = पार्श्वम्, प्रेषिता = दत्ता, एतां = चित्रफलकाम्, दृष्ट्वा = विलोक्य, निर्वृत्तः भव = सुखीभव।

भावार्थः - वासवदत्ताधात्री अङ्गारवत्याः सन्देशं कथयति - यद्यपि वासवदत्ता मृता तथापि भवान् अङ्गारवतीमहासेनयोः पुत्रौ गोपालकपालकौ इव प्रियः अस्ति। भवान् तयोः पूर्वाभिमतः जामाता आसीत्। परञ्च तौ वासवदत्तया सह भवन्तं परिणेतुम् अशक्यौ। अत एव वासवदत्ता शिष्यारूपेण भवते समर्पिता। विवाहे असम्पन्ने जाते एव स्वस्य अधीरत्वेन गतः। अत एव चित्रफलके चित्रयित्वा भवान् वासवदत्तायाः भवता सह परिणीतः। भवान् तं चित्रफलकं दृष्ट्वा खिन्नं चित्तं प्रसादयतु।

(१५) आर्यपुत्र! मम कन्याभावे केनापि ब्राह्मणेन मम भगनिकेति न्यासः निक्षिप्तः। प्रोषिचभर्तृका परपुरुषदर्शनं परिहरति। तदार्यां मया सहागता प्रेक्ष्य जानात्वार्यपुत्रः।

व्याख्या - आर्यपुत्र = हे स्वामिन्! मम = पद्मावत्याः, कन्याभावे = कुमारीत्वे, केनापि = अज्ञातेन, ब्राह्मणेन = द्विजेन, मम = ब्राह्मणस्य भगनिका = सहोदरा, इति, न्यासः = निक्षेपः, निक्षिप्तः = न्यासितः। प्रोषितभर्तृका = प्रोषितः परदेशं गतः भर्ता स्वामी यस्याः, सा, परपुरुषदर्शनम् = अन्यजनावलोकनम्, परिहरति = परित्यजति। तदार्यां = ताम्, पूर्वोक्ताम् आर्यां मान्याम्, मया = पद्मावत्या, सह, आगताम् = आयाताम्, कन्याम्, प्रेक्ष्य = दृष्ट्वा, आर्यपुत्रः = स्वामी, जानातु = वेत्तु।

भावार्थः - हे स्वामिन्! यदा अहं पद्मावती कन्या तदैव केनापि अविज्ञातेन ब्राह्मणा एषा कन्या मम पद्मावत्याः पार्श्वे निक्षिप्ता। तामहं तव समक्षमानयिष्यामि यां दृष्ट्वा भवान् अवबोधयतु यत् सा वासवदत्ता अस्ति न वा।

## वाक्यानाम् आशयं सन्दर्भं च

'एवमनिर्ज्ञातानि दैवतान्यवधूयन्ते'।

भासप्रणीतस्य स्वप्नवासवदत्ताख्यस्य नाटकस्य प्रथमाङ्के विद्यमानमिदं वाक्यम्।

सूत्रधारप्रवेशनानन्तरं द्वौ भटौ रंगं प्रविश्य उत्सारणां कुरुतः। यौगन्धरायणेन साकं तत्रागता वासवदत्ता भटयोरुत्सारणामधिगत्य, 'अहमपि नामोत्सारयितव्या भवामी'ति यौगन्धरायणं वदति। खिन्नमानसां तां समाश्वासयितुं यौगन्धरायणेनोक्तं वाक्यमिदम् 'एवमनिर्ज्ञातानि दैवतान्यवधूयन्ते' इति।

अर्थात् दैवतान्यरि अनिर्ज्ञातानि ईश्वरभावेन प्रत्यनभिज्ञातानि - अवधूयन्ते - निन्दया गृह्यन्ते पामरैः। तन्न दैवतानां किमपि अपकर्षमातनोति। इति अस्य वाक्यस्याशयः।

'चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः।'

भासेन विरचितस्य स्वप्नवासवदत्तनामकस्य नाटकस्य प्रथमाङ्कादुद्धृतः अयं पद्यभागः।

अज्ञातवासदुःखवशगास्ति वासवदत्ता। तां प्रत्युज्जीवयितुं यौगन्धरायणः अभिलषति। अतः सः भाग्यपरिवृत्तिं प्रदर्शयन् एवं निदर्शनेन समाश्वासयति।

चक्रस्य आरपङ्क्तिरिव भाग्यपङ्क्तिरपि कालक्रमेण परिवर्तमाना सञ्चरति। तथा हि यदुन्नतमारं तद् अनन्तरचंक्रमणे अधस्थाद्भवति। अधस्थितमपि उन्नतं स्थानमारोहति। निस्वोऽपि कालक्रमेण श्रीमान् भवेत्। श्रीयुतोऽपि दरिद्रः स्यात्। तथा तल्पशायी शिलाशायी भवेत्। घोषवासी सिंहासनस्थो भवेत्। अतः तत्कालिकीम् अवस्थाम् अनुचिन्त्य त्वया शोको न कार्य इत्यर्थः।

'अपरिचयात्तु न श्लिष्यते मे मनसि।'

महाकविः भासः कालिदासस्यापि माननीयः तस्य प्रशस्तं नाटकं भवति स्वप्नवासवदत्तम्। नाटकस्यास्य प्रथमाङ्के विद्यमानमिदं गद्यशकलम्।

स्थापनानन्तरं भटयोरुत्सारण वाक्यानि श्रूयन्ते। श्रुत्वा च तत् किमर्थमिति यौगन्धरायणः काञ्चुकीयं पृच्छति। काञ्चुकीयः प्रतिवदति। भोः तपस्विन्निति सः यौगन्धरायणं संबोधयति। श्रुत्वैतत् यौगन्धरायणस्य आत्मगतमेवेतद्वाक्यम्।

वस्तुतः केवलं तापसवेषधारी यौगन्धरायणः। सः तु उदयनस्य मन्त्रिसत्तमः। इदं-प्रथमतया स एतादृशं वाक्यं श्रृणोति। अपरिचयात् तत् सोढुमशक्तः सन् एवं वदति स्वगतरूपेण। कार्यवशात् तापसवेषधारी यौगन्धरायणः ततः तपस्विन्नित्याह्वानं तन्त्रकुशलस्य तस्मै न रोचते इति तस्य वाक्यस्याशयः। तच्च संबोधनं यद्यपि बहुमानादरसूचकं तथाप्यपरिचयात् न मे रोचत इति भावः।

'प्रद्वेषो बहुमानो वा सङ्कल्पादुपजायते।'

भासेन विरचितं नाटकं भवति स्वप्नवासवदत्तम्। अङ्कारम्भे भटयोरुत्सारणानन्तरं काञ्चुकीयः प्रविशति। सः पद्मावतीदेव्याः आश्रमागमनं तस्याः अत्रागमनोद्देश्यं च वदति। तदा यौगन्धरायणस्य आत्मगतमेवेदं वाक्यम्।

पद्मावती दर्शकस्य भगिनी बहुशः मया श्रुता। सा स्वामिनो देवी भविष्यतीति पुष्पकभद्रादिभिः दैवज्ञैः आदिष्टम्। सा अद्याकस्मादत्रावतीर्णा। सा भर्तुः उदयनस्य पत्नी भविष्यतीति सिद्धैरादिष्टम्। तस्मात् पद्मावत्यां मे अनल्पा ममता समुत्पन्ना।

विद्वेषः अत्यादरो वा मनोव्यापारात् उत्पद्यते। तिरस्कारे अत्यादरे वा सर्वथा मनोव्यापार एव कारणम्। एकमेव वस्तु संकल्पभेदात् त्याज्यं ग्राह्यं वा भवतीति भावः।

'तपोवनानि नामातिथिजनस्य स्वगेहम्'।

स्वप्नवासवदत्तं भासस्य विख्यातं नाटकं भवति। नाटकस्यास्य प्रथमाङ्कादुद्धृतोऽयं गद्यभागः।

तपोवनं प्रविष्टा पद्मावती तत्रस्थां तापसीं सप्रश्रयम् अभिजातं च अभिवादयति। तदा प्रत्यभिवादनानन्तरं तापस्याः वचनमिदम् 'तपोवनानि नामातिथिजनस्य स्वगेह'मिति।

निस्वार्थमतीनां तपोवनवासिनाम् आगन्तुकाः सर्वेऽपि अतिथयः। परन्तु अतिथीनां तेषां तपोवनानि नान्येषां केषाञ्चित् गृहम्। अपि तु स्वकीयमस्ति। तापसानां समत्वबुद्धरेवात्र कारणम्।

'दुःखं न्यासस्य रक्षणम्' ।

कविकुलकूटस्थस्य महाकविभासस्य विश्वविश्रुतानां त्रयोदशानां नाटकानां मध्ये अद्वितीयं भवति स्वप्नवासवदत्तम् । अस्य नाटकस्य प्रथमाङ्के विद्यमानमिदं पद्यखण्डम् ।

परिव्राजकवेषो यौगन्धरायणः आवन्तिकावेषधारिण्या वासवदत्तया साकं तपोवनं प्रविश्य पद्मावतीमेव प्रार्थयते 'इयं मे स्वसा, अस्याः भर्ता देशान्तरं गतः । तस्मादिमां कञ्चित्कालमत्रभवत्या परिपाल्यमानामिच्छामीति । तच्छ्रुत्वा काञ्चुकीयः पद्मावतीं प्रति एवं वदति -

सुखमर्थो भवेद्दातुं सुखं प्राणाः सुखं तपः ।
सुखमन्यद्भवेत्सर्वं दुःखं न्यासस्य रक्षणम् ।। इति ।

अर्थात् धनानि तपांसि प्राणान् च दातुं सुखकरं भवेत् । अन्यत्सर्वमपि दातुं सुखकरमेव । किन्तु न्यासस्य निक्षेपस्य रक्षणं दुष्करं भवति । प्राणादि दानादेरपि न्यासस्य संरक्षणं कष्टतरं भवति । तस्मात् तस्य अभ्यर्थना महती खल्विविभावः ।

'अविचार्यं क्रमं न करिष्यति ।'

महाकविना भासेन कृतं नाटकं भवति स्वप्नवासवदत्तम् । नाटकस्यास्य प्रथमाङ्कादुद्धृतमिदं वाक्यम् ।

वासवदत्तया सह तपोवनं प्रविश्य यौगन्धरायणः पद्मावतीं प्रति एवं प्रार्थयते 'प्रोषितभर्तृकामिमां मे स्वसारं अत्र भवत्या कञ्चित्कालं परिपाल्यमानामिच्छामी'ति । यौगन्धरायणस्य इमामपेक्षां श्रुत्वा वासवदत्तायाः चिन्तेयम् 'अविचार्यं क्रमं न करिष्यती'ति ।

मेधावी यौगन्धरायणः प्रयोजनमनुद्दिश्य कदापि न प्रवर्तेत । दीर्घदृष्टिरयं सहसा किमपि कार्यं नाङ्गीकरोति । अत्र कोऽपि हेतुस्तस्य भवेदेव । अतो न मया विषादः कार्य इति भावः ।

'नहि सिद्धवाक्यान्युत्क्रम्य गच्छतिविधिः सुपरीक्षितानि ।'

भासविरचिते स्वप्नवासवदत्ते विद्यमानोऽयं पद्यभागः । वासवदत्तां पद्मावती सकाशे न्यासरूपेण निक्षिप्य चित्तलाघवमनुभवति यौगन्धरायणः । तदा तस्य चिन्ता भवत्येवम् ।

सिद्धैरादिष्टप्रकारेणैव राज्यविपत्तिरुपपन्ना दृष्टा । तत्प्रत्ययाद्धेतोः तेषां द्वितीयोऽपि आदेशः सत्यः स्यादिति विस्रम्भात् मया इयं क्लेशभूयिष्ठा सरणिरनुवर्त्यते । तथा हि पद्मावती नरपतेः महिषी भवित्री, तदनन्तरमुदयनवेन्दुवत् क्रमप्रवृद्धो राजा उदयनः सार्वभौमो भविष्यति ।

सुपरीक्षितानि त्रैकालिकज्ञानां वाक्यान्युल्लङ्घ्य विधिः न प्रवर्तते । विधेः पद्धतिः सिद्धानां करबदरसमाना स्फुटा प्रत्यक्षविषयास्यादित्यर्थः ।

'सर्वजनसाधारणमाश्रमपदं नाम।'

भासकृतस्य स्वप्नवासवदत्ताख्यस्य नाटकस्य प्रथमाङ्कादुद्धृतमिदं गद्यशकलम्।

वासवदत्तायौगन्धरायणयोः प्रवेशनानन्तरं कश्चिद्ब्रह्मचारी तपोवनं प्रविशति। अध्वश्रमातुरः स परिक्रम्यावलोकयति। तदा तत्रस्थितान् स्त्रीजनान् दृष्ट्वा अये स्त्रीजन इति शङ्कते। ब्रह्मचारिणः तद्वचनं श्रुत्वा काञ्चुकीयस्य प्रतिवचनमिदम् 'स्वैरं स्वैरं प्रविशतु भवान्। सर्वजनसाधारणमाश्रमपदं नाम।' इति।

अर्थात् सर्वेषां जनानां प्रवेशयोग्यं भवति तपोवनम्। तत्र शङ्का न कार्या। अत्र स्त्रीजनाः भटाः काञ्चुकीय इत्येतेषां भेदबुद्धिर्नास्ति। आश्रमपदानि नाम सर्वजनप्रवेशयोग्यानि भवन्तीति भावः।

'अलीकमलीकं खल्वेतत्। जीवामि मन्दभागा।'

महाकविभासविरचिते स्वप्नवासवदत्ते विद्यमानोऽयं गद्यभागः। अध्वपरिश्रान्ति परिहाराय तपोवनं प्रविष्टः कश्चिद्ब्रह्मचारी परिश्रमं निवर्त्य यौगन्धरायणं प्रति स्ववृत्तान्तं वदति। 'अहं तावत् वेदानधिकृत्य अवगाहमधिगन्तुं वत्सभूमौ लावाणकं नाम ग्राममुषितवानस्मि। तत्रैकः महानर्थः संवृत्तः। स ग्राम अग्निना दग्धः। तस्मिन्नेवाग्नौ वासवदत्ता नाम अवन्ति-राजपुत्री दग्धा।' ब्रह्मचारिणः एतादृशमालापं श्रुत्वा वासवदत्तायाः मनोगतमेवेदम् 'अलीकमलीकं खल्वेतत्। जीवामि मन्दभागा' इति।

'सः सत्यं न जानाति मन्दभागा अहं जीवामि'। एवं सा वासवदत्ता। आत्मगतं करोति। श्रजुमतिः सा एतदलीककथनं न कदापि सोढुं प्रभवति। कार्यवशात्त्वधुना सत्यं प्रकाशयितुमपि सा अशक्ता भवति। तदेव अस्याः वैषम्यम्।

'मोहं गत इति श्रुत्वा शून्यमिव मे हृदयम्'।

भासेन विरचितस्य स्वप्नवासवदत्ताख्यस्य नाटकस्य प्रथमाङ्के विद्यमानमिदं वाक्यम्।

अध्वपरिश्रान्तपरिहाराय तपोवनं प्रविष्टो ब्रह्मचारी अतिथिसत्कारस्वीकारानन्तरं लावाणकग्रामस्य कथां वर्णयति। लावाणकग्रामे वासवदत्ताख्यया प्रियतमया सह प्रतिवसति उदयनो राजा। एकदा तस्मिन् मृगयार्थं निष्क्रान्ते ग्रामदाहेन सा दग्धा। प्रतिनिवृत्तो राजा तद्वृत्तान्तं श्रुत्वा तद्वियोगजनितसन्तापेन तस्मिन्नेवाग्नौ प्राणान् परित्यक्तुकामोऽभवत्। तदा मन्त्रिभिः महता यत्नेन प्रतिनिवर्तितः स तया विधृतानि दग्धशेषाण्याभरणानि आलिङ्ग्य मूर्च्छितः। ततः शनैः शनैः प्रतिलब्धसंज्ञः संवृत्तः। ब्रह्मचारिणः एतद्वाक्यं श्रुत्वा पद्मावत्या आत्मगतमिदम्।

'भाग्येन स जीवतीत्यस्मात् सन्तुष्टोऽस्मि। मोहं गत इति श्रुत्वा स्तब्धमिव मे हृदयम्'। राजानं प्रति पद्मावत्याः सहानुभूतिः तद्वारा प्रेमाङ्कुरश्चव्यज्यते।

‘भर्तृस्नेहात्साहि दग्धाप्यदग्धा।’

महाकवि भासविरचितं नाटकं भवति स्वप्नवासवदत्तम्। नाटकस्यास्य प्रथमाङ्के ब्रह्मचारिणा उक्तमिदं पद्यशकलम्।

आश्रमं प्रविष्टो ब्रह्मचारी अग्निदग्धस्य लावाणकग्रामस्य कथां वर्णयति। राज्ञि मृगयार्थं निष्क्रान्ते ग्रामदाहेन तस्य पत्नी वासवदत्ता दग्धा। तां रक्षितुकामो यौगन्धरायणो नाम सचिवोऽपि तस्मिन्नेवाग्नौ पतितः प्रनष्टश्च। प्रतिनिवृत्तो राजा तद्वृत्तान्तं श्रुत्वा वासवदत्तावियोगजनितसन्तापेन तस्मिन्नेवाग्नौ प्राणान् परित्यक्तुमैच्छत्। ततोऽमात्यैः महता यत्नेन वारितः सः तस्याः शरीरोपभुक्तानि दग्धशेषाण्याभरणानि आलिङ्ग्य मूर्च्छितोऽभवत्, चिरेण प्रतिलब्धसंज्ञः स राजा सहसोत्थाय, हा प्रिये! हा प्रियशिष्ये! इति बहुप्रलपितवान्।

वासवदत्ता यद्यप्यग्निना दग्धा तथापि भर्तुः स्नेहाधिक्येन सा अदग्धा इति मे प्रतिभाति। अत एव धन्या खलु सा इति वटोराशयः।

‘तस्मिन्सर्वमधीनं हि यत्राधीनो नराधिपः’।

भासनाटकचक्रे प्रथमगणनामर्हति स्वप्नवासवदत्तम्। अस्य नाटकस्य प्रथमाङ्के यौगन्धरायणेनोक्तं पद्यखण्डमिदम्।

तपोवनं प्रविष्टो यौगन्धरायणः पद्मावती सकाशे वासवदत्तां न्यासरूपेण निक्षिप्य विश्राम्यति। तदा तत्रागतः कश्चिद्ब्रह्मचारी कथाप्रसङ्गे उदयनस्यावस्थां वर्णयति। वासवदत्तावियोगसन्तप्तो राजा शोकार्तः मृत्युमाश्लेष्टुमिच्छति। मन्त्रिभिर्नियुक्तो रुमण्वान् नामामात्यः राजानं परिरक्षति। तच्छ्रुत्वा यौगन्धरायणस्य चिन्ता भवत्ययं पद्यभागः ‘तस्मिन्सर्वमधीनं हि यत्राधीनो नराधिप’ इति।

अयं मे कार्यभारः सविश्रमः। रुमण्वतस्तु श्रमः प्रसक्तः भवति। इतोऽपि बहुतरः क्लेशः तेनोहयो भवेत्। यतः नराधिपः यस्याधीनः तस्य सर्वमप्यधीनं भवति। स धुरन्धरो भवितुमर्हतीत्यर्थः।

‘सर्वजनमनोभिरामं खलु सौभाग्यं नाम’।

भासविरचितस्य स्वप्नवासवदत्ताख्यस्य नाटकस्य द्वितीयाङ्के विद्यमानमिदं गद्यशकलम्।

प्रवेशकानन्तरं सपरिवारा वासवदत्तया सह कन्दुकेनक्रीडन्ती प्रविशति पद्मावती। तयोः संभाषणान्तरे उदयनस्य वृत्तान्तोऽपि वर्ण्यते। ‘किं स राजा विरूपो भवेत्’? इति चेट्याः प्रश्ने, ‘नहि नहि दर्शनीय एव’ इति वासवदत्ता प्रतिवदति। तच्छ्रुत्वा ‘कथं त्वं जानासि’ इति पद्मावती पृच्छति। उदयनपक्षपातेन समुदाचारमतिक्रान्ता वासवदत्ता स्वचरितमाच्छादयितुम् ‘उज्जयिन्यां जन एवं मन्त्रयते’ इति सा प्रत्युत्तरयति। तदा पद्मावत्याः प्रतिवचनमिदम्।

दर्शनीयोऽयमिति तेषां यदि मतं कर्णाकर्णिकया स्वजनगोचरं भवति तर्हि कोऽत्र विस्मय इति। अलौकिकं सौन्दर्यं सर्वेषां जनानां मनांस्याकर्षतीति भावः।

'आगमप्रधानानि सुलभपर्यवस्थानानि महापुरुषहृदयानि भवन्ति'।

महाकवि भासविरचिते स्वप्नवासवदत्ते द्वितीयाङ्कं धात्र्या उक्तमिदं वाक्यम्।

कन्दुकक्रीडान्तरे सपरिवारा पद्मावती वासवदत्तया सह नर्मभाषणं करोति। तदा तत्रागता धात्री वत्सराजाय उदयनाय पद्मावत्याः दानस्य वृत्तान्तं कथयति। तच्छ्रुत्वा वासवदत्ता तथाविधव्यसनाक्रान्तोऽपि शीघ्रमेवं कथमयमेवमन्यां प्रति, समसक्तः संबभूव इत्यभिप्रायेण अत्याहितमिति वदति। तदा धात्री एवं समर्थयामास 'आगमप्रधानानि सुलभपर्यवस्थानानि महापुरुषहृदयानि भवन्ती'ति।

अर्थात्, शास्त्राभ्याससंस्कृतचित्ताः महापुरुषः नैमिषिकान् व्यसनहेतून् निरस्य प्रत्याशावलम्बितजीविताः सन्तः शीघ्रमेव प्रकृतिं प्रतिपद्यन्ते। महापुरुषाणां विकृतमपि चित्तं तेषां शास्त्राभ्यासादिना अचिरादेव पर्यवस्थाप्यत इति भावः।

'धन्या खलु चक्रवाकवधूः यान्योन्यविरहिता न जीवति' अथवा 'न खल्वहं प्राणान्परित्यजामि' अथवा आर्यपुत्रं पश्यामीत्येतेन मनोरथेन जीवामि मन्दभागा।

भासविरचिते स्वप्नवासवदत्ते तृतीयाङ्कारम्भे वासवदत्तया उक्तं वाक्यमिदम्।

विवाहमोदसङ्कुले अन्तःपुरचतुश्शाले पद्मावतीं परित्यज्य प्रमदवनं प्रविष्टा वासवदत्ता तस्याः दौर्भाग्यं स्मृत्वा सन्तपति। अथ भर्तृविरहकातरा सा एवं चिन्तयति 'यावदिदानीं भागधेयनिर्वृत्तं दुःखं विनोदयामि। आर्यपुत्रोऽपि परकीयः संवृत्तः। धन्या खलु चक्रवाकवधूः। यान्योन्यविरहिता न जीवति। न खल्वहं प्राणान् परित्यजामि। आर्यपुत्रं पश्यामीत्येतेन मनोरथेन मन्दभागा अहं जीवामी'ति।

चक्रवाकवधूः प्रियविरहं क्षणमपि न सहते, अहं तु न तथा। पुनरपि प्रियतमं द्रष्टुकामा जीवामि। एतादृश विरहवैवश्यात् मरणं वरमिति तस्याः भावः।

'अहो अकरुणाः खल्वीश्वराः'।

भासकृतस्य स्वप्नवासवदत्ताख्यस्य नाटकस्य तृतीयाङ्के विद्यमानोऽयं गद्यभागः।

प्रियविरहकातरायाः प्रमदवनमुपविष्टायाः वासवदत्तायाः समीपे काचिच्चेटी पुष्पाणि गृहीत्वा आगच्छति। सा वासवदत्तामेवं वदति 'अस्माकं भट्टिनी भणति, भर्तृदारिकायै पद्मावत्यै इमां तावत्कौतुकमालिकां गुम्फतु आर्या इति। तदा वासवदत्तायाः आत्मगतमिदं वाक्यम् 'अहो अकरुणाः खल्वीश्वरा' इति।

वासवदत्ता तु उदयनस्य पट्टमहिषी भवति। राज्ञः श्रद्ध्यर्थं सा आवन्तिकायाः वेषं धृत्वा सैरन्ध्रीभावेन पद्मावत्या अन्तःपुरे प्रतिवसति। एतदपि सोढुमशक्ता वासवदत्ता वरणमाल्यगुम्फनवृत्तान्तञ्चापि श्रुत्वा अतीव दुःखिता अभवत्। स्वस्याः भर्तुः अन्यया साकं विवाहस्य माल्यं गुम्फनीयमिति नूनम् अतिविचित्रम्। तदेवेदमुक्तं तया निर्दयाः खलु देवताः इति।

'कथमयं षष्ठः शरः पातितः।'

स्वप्नवासवदत्ताख्यस्य भासनाटकस्य चतुर्थे अङ्के राज्ञा उदयनेनोक्तां पद्यशकलमिदम्।

विदूषकेण साकं प्रमदवनं प्रविष्टस्य राज्ञः चिन्तांशो भवति अयं पद्यभागः। पुरा किल उज्जयिन्यां अवन्तिराजतनयां दृष्टवतः ममोपरि मदनः पञ्चेषून् पातितवान्। सः शून्यतूणीरश्च बभूव ते च बाणा अद्यापि मम हृदयान्नापगताः। अधुनापि प्रमदवनं प्रविष्टस्य मम मदनौत्सुक्यं संजायते इति अहो महदाश्चर्यं भवति।

पञ्चेषुर्मदनः इति प्रसिद्धिः। तर्हि एतत्कथं संगच्छेत्? तथा हि षष्ठं शरं स कथं प्रयोक्तुं शक्तोऽभूत्। षष्ठः शर इत्यनेनोपरतायामपि वासवदत्तायां भृशमनुरक्तस्य तस्य पद्मावतीमुद्दिश्य रागोदयो ध्वन्यते। पद्मावतीं प्रति कौतूहलाविष्टस्य एतादृश चिन्ता युज्यत एव।

'अहो अज्ञातवासोऽप्यत्र बहुगुणः सम्पद्यते।'

भासप्रणीतस्य स्वप्नवासवदत्ताख्यस्य नाटकस्य चतुर्थे अङ्के विद्यमानमिदं गद्यखण्डम्।

राज्ञा उदयनेन साकं प्रमदवनं प्रविशति विदूषकः। तत्र न कोपि इति मत्वा 'का भवतः प्रिया, तदानीं तत्र भवती वासवदत्ता, इदानीं पद्मावती वे'ति राजानं पृच्छति। प्रत्युत्तरं दातुमशक्तो राजा विदूषकस्य वयस्यभावेन अपेक्षामधिकृत्य गत्यन्तरं विना एवं वदति 'यद्यपि रूपेण शीलेन माधुर्येण च पद्मावती मे अत्यर्थं बहुमता, तथापि वासवदत्तायामासक्तं मे मनः तावत् न हरती'ति। राज्ञः मुखादेव एतद्वाक्यं श्रुत्वा वासवदत्तायाः आत्मगतमिदम् 'अहो अज्ञातवासोऽप्यत्र बहुगुणः सम्पद्यते' इति।

चेटीरूपेण अत्र अज्ञातवास असहनीय एव। किन्तु आर्यपुत्रस्य मुखादेव स्नेहमसृणत्वं सूचयन्ति एतानि वाक्यानि निर्जग्मुः। तान्येवं स्वयं श्रोतुं अज्ञातवास उपकृत इति तस्याः चिन्तायाः तात्पर्यम्।

'आर्यपुत्रोऽपि वसन्तकः संवृत्तः'

भासेन विरचितं नाटकं भवति स्वप्नवासवदत्तम्। नाटकस्यास्य चतुर्थाङ्के विद्यमानमिदं भाषणशकलम्।

राज्ञा उदयनेन साकं प्रमदवनं प्रविष्टो विदूषकः, 'का भवतः प्रिया तदानीं तत्र भवती वासवदत्ता, इदानीं पद्मावती वे'ति पृच्छति। प्रत्युत्तरं दत्त्वा उदयनः 'उक्तं मया, इदानीं भवान्

कथयतु, का भवतः प्रिया' इति विदूषकं पृच्छति राज्ञः उदयनस्य एतादृशं वचनं श्रुत्वा पद्मावत्याः चिन्तावचनमिदम् 'आर्यपुत्रोऽपि वसन्तकः संवृत्त' इति।

वसन्तकस्य इव राज्ञोऽपि मनः चपलं संजातम्। विदूषकस्य चापल्यं स्वभावसिद्धं भवति। राज्ञः तु तादृशं चापल्यं नोचितमिति पद्मावत्याः मतम्।

'अनतिक्रमणीयो हि विधिः।'

महाकवि भासस्य प्रख्यातं नाटकं भवति स्वप्नवासवदत्तम्। नाटकस्यास्य चतुर्थे अङ्के विदूषकेणोक्तं वाक्यमिदम्।

प्रमदवनं प्रविष्ट उदयनो विदूषकं प्रति 'कथयतु भवान् का भवतः प्रिया तदानीं तत्र वासवदत्ता इदानीं पद्मावती वा इति पृच्छति। तदा विदूषकः पद्मावत्याः गुणान् बहुवारं प्रशंसति। तच्छ्रुत्वा राजा, भवतु भवतु वसन्तक! मया पृष्टेन यत्त्वयोक्तं तदखिलं वासवदत्तायै कथयिष्ये इति वदति। तदा सः कुत्र वासवदत्ता चिरात्खलूपरता सा इति वदन्, राज्ञः वचनं प्रतिक्षिपति। झटिति भग्नविनोदो राजा, चिरपरिचयात् सखे मन मुखादेवं विनिर्गतम्' इति उक्त्वा सन्तपति। तदा विदूषकेणोक्तं सान्त्वनवचनमिदम् धारयतु धारयतु भवान्। अनतिक्रमणीयो हि विधिः' इति।

अर्थात् विधिस्तु अलङ्घ्यः तस्मात्समाश्वसितुं भवान्। यत्खलु भवितव्यं तद्भवत्येव। दैवायत्ते वस्तुनि न कोऽपि परिहारः, मनुष्यस्तत्र नितरामशक्त इति विदूषकस्य वाक्यस्याशयः।

'दुःखं त्यक्तुं बद्धमूलोऽनुरागः।'

भासमहाकवेः प्रसिद्धं नाटकं भवति स्वप्नवासवदत्तम्। तस्मिन् नाटके चतुर्थे अङ्के विद्यमानमिदं पद्यशकलम्।

प्रमदवनं प्रविशतः उदयनविदूषकौ। तयोः संभाषणमध्ये, कुत्र वासवदत्ता चिरात्खलू-परता सा इति विदूषको वदति। तच्छ्रुत्वा उदयनो अत्यन्तं दुःखितो भूत्वा, पूर्वपरिचयादेवं मम मुखाद्बहिर्गतमिति वदति। विषीदन्तं तं परिसान्त्वयितुं विदूषको वदत्येवम्। विधिः अलङ्घ्यः। यत्खलु भवितव्यं तद्भवत्येव इति। तदा राज्ञः उक्तिरियम् 'दुःखं त्यक्तुं बद्धमूलोऽनुराग' इति।

मनसि रूढमूलोऽनुरागः त्यक्तुं दुःशकमिति भावः। वासवदत्तां विस्मृतं स न शक्त इति भावः।

'अहो सदाक्षिण्यस्य जनस्य परिजनोऽपि सदाक्षिण्य एव भवति।'

भासविरचितेषु त्रयोदशनाटकेषु प्रथमं प्रधानं च भवति स्वप्नवासवदत्तम्। नाटकस्यास्य चतुर्थे अङ्के विद्यमानमिदं वाक्यखण्डम्।

विदूषकेण साकं प्रमदवनं प्रविष्टो राजा वासवदत्तां स्मृत्वा अश्रुपूर्णाकुलेक्षणोऽभूत्। राज्ञः मुखप्रक्षालनार्थं जलमादायागतो विदूषकः पथि पद्मावतीं पश्यति। वातानीतेन काशपुष्परेणुना साश्रुपातः तत्र भवतः उदयनस्य मुखं, तस्मात् भवत्येव उपनयतु तस्मै इदं मुखोदकमिति सः वदति। प्रत्युत्पन्नमतेः, विदूषकस्य एतद्वचनं श्रुत्वा पद्मावत्याः विचारोऽयम् 'अहो सदाक्षिण्यस्य जनस्य परिजनोऽपि सदाक्षिण्य एव भवति' इति। दक्षिणस्य जनस्य उदयनस्य परिजनः वसन्तकः अपि दक्षिण इति युक्तमेव। यतो यः खलु स्वेनैवोपनेतव्ये मुखोदके अवसरं लब्ध्वा मामेव तत्रोचितामुत्प्रेक्षमाणो नियोजयतीति भावः।

'कामं धीरस्वभावेयं स्त्रीस्वभावस्तु कातरः।'

भासविरचिते स्वप्नवासवदत्ते चतुर्थाङ्के राज्ञा उदयनेनोक्तं पद्यशकलमिदम्।

प्रमदवनं प्रविष्टो राजा वासवदत्तां स्मृत्वा दुःखबाष्पपरिविलन्नवदनोऽभूत्। तदा विदूषक हस्तात् जलं गृहीत्वा राजान्तिकमागच्छति पद्मावती। तां दृष्ट्वा राजा वायुनाक्षिप्तेन काशपुष्परेणुना साश्रुपातं मुखं ममेति वदति। अलीकोक्त्या स्वयमेव लज्जितः स एवं चिन्तयति -

> इयं बाला नवोद्वाहा सत्य श्रुत्वा व्यथां व्रजेत्।
> कामं धीरस्वभावेयं स्त्रीस्वभावस्तु कातरः।। इति।

वासवदत्तां स्मृत्वा दुःखितेऽहमिति यदीयं ज्ञास्यति तर्हि मुग्धेयं पर्याकुला भवेत्। धीरापि चञ्चलचित्ता भवेत्। यतः स्त्रीणां स्वभावस्तु स्वयं कातर इति तस्य वाक्यस्याशयः।

'कर्तारः सुलभा लोके विज्ञातारस्तु दुर्लभाः।'

भासविरचितस्य स्वप्नवासवदत्ताख्यस्य नाटकस्य चतुर्थेऽङ्के विद्यमानमिदं पद्यखण्डम्।

प्रमदवनं प्रविष्टो राजा वासवदत्तां स्मृत्वा अश्रुक्लिन्ननयनोऽभूत्। तदा यदृच्छया तत्रागतां पद्मावतीं दृष्ट्वा राजा, काशपुष्परेणुना साश्रुपातं मे मुखमिति वदति। एव-मलीकोक्त्या स्वयमेव लज्जितः किंकर्तव्यतामूढो भवति राजा। समर्थो विदूषकः मगधराजस्यापराह्णकाले भवन्तमग्रतः कृत्वा सुहृज्जनदर्शनम् उचितम्। तदुत्तिष्ठतु इति वदति। तच्छ्रुत्वा राज्ञः प्रतिवचनमिदम् 'कर्तारः सुलभा लोके विज्ञातारस्तु दुर्लभा' इति।

गुणानां सत्काराणां च कर्तारः इह बहुलमुपलभ्यन्ते। किन्तु तयोः तत्त्वं ज्ञातुमुत्सुकाः जना दुर्लभा इति तस्याभिप्रायः।

'हस्तेन स्रस्तकोणेन कृतमाकाशवादितम्।'

भासमहाकवेः अतिप्रशस्तं नाटकं भवति स्वप्नवासवदत्तम्। नाटकस्यास्य पञ्चमाङ्के विद्यमानमिदं

श्लोकशकलम्।

शीर्षवेदनया दुःखितां पद्मावतीम् अन्वेष्टुं विदूषकेन साकं राजा समुद्रगृहं प्रविशति। तत्र पद्मावतीमदृष्ट्वा, निद्रा मां बाधते कथ्यतां काचित्कथा इति राजा विदूषकं वदति। उदयनस्याभ्यर्थनामनुसृत्य विदूषक, उज्जयिनी नाम नगरी अस्तीति काञ्चित्कथां कथयितुमारभते। तदा उज्जयिनीति नामश्रवणेन उज्जयिन्याम् अनुभूतं पूर्ववृत्तान्तं स्मृत्वा राजा एवं वदति -

> बहुशोऽप्युपदेशेषु यया मामीक्षमाणया।
> हस्तेन स्रस्तकोणेन कृतमाकाशवादितम्।। इति।

वीणावादनशिक्षायां मत्कृतमुपदेशं मनसि न कृत्वा हस्तात्परिभ्रष्टो कोण इत्यजानन्ती सा वासवदत्ता शून्य एव आकाशे वादनं कृत्वा चिरमवस्थिता इति भावः। एतेन इदानीन्तन उदयनगत रतिविषयको वासवदत्ताया अनुभावः तया सम्यक् प्रदर्शित इति विज्ञेयम्।

'अहो अकरुणाः खल्वीश्वराः मे।'

संस्कृतनाटकेषु स्वप्नवासवदत्तं नाम भासकृतं नाटकं अद्वितीयं स्थानमलङ्करोति। अस्य नाटकस्य पञ्चमाङ्के विद्यमानमिदं वाक्यम्।

पद्मावती शीर्षवेदनया दुःखिता इति श्रुत्वा वासवदत्ता तां द्रष्टुं समुद्रगृहं गच्छति। तदा वासवदत्तया उक्तमिदं वाक्यम् 'अहो अकरुणाः खलु ईश्वराः मे' इति।

वासवदत्तायाः वियोगेन उत्कण्ठितस्य आर्यपुत्रस्य विश्रामस्थानभूता-सुखहेतुतामाप्ना- इयमपि पद्मावती शीर्षवेदनया पीडिता संवृत्ता। तां एवं पीडितां ज्ञात्वा राजापि तत्प्रेम्णा वशीकृतो दुःखातिरेकव्याकुलो भवेत्। एतादृशानि अतिनिष्ठुराणि कृत्यानि घटयितारो देवा अनुकम्पालेशमप्यभजमाना वाच्यतां यान्तीति भावः। उदयनं प्रति वासवदत्ताया अकृत्रिमप्रेम्णः उत्तमोदाहरणं भवति एतद्वाक्यम्।

'कलत्रदर्शनार्हं जनं कलत्रदर्शनात्परिहरतीति बहुदोषमुत्पादयति।'

भासविरचितस्य स्वप्नवासवदत्ताख्यस्य नाटकस्य षष्ठाङ्के मिश्रविष्कम्भानन्तरं राज्ञा उदयनेनोक्तं वाक्यमिदम्।

महासेनस्य सकाशात् रैभ्यसगोत्रः प्राप्तः काञ्चुकीयः तत्र भवत्या च अङ्गारवत्या प्रेषिता आर्या वसुन्धरा नाम वासवदत्ताधात्री च प्रतिहारमुपस्थितौ। तस्मात् भवत्यासहितः वासवदत्तायाः बन्धुजनान् द्रष्टुमिच्छामीति उदयनः पद्मावतीं वदति। तच्छ्रुत्वा पद्मावती, अहं च ते द्वितीया भार्या। तौ च जनौ पुनः प्रथमपत्नी पितृभ्यां प्रेषितौ। एवञ्च यत्खलु वाच्यं तयोः तत् मत्पुरतः तौ स्पष्टं नैव ब्रूयताम्, प्रत्युत तौ तटस्थौ सञ्जातौ त्वामपि तथैव कुर्यातामिति मत्सन्निधानं कथमप्यत्रास्वरसमेवेति प्रतिवदति। तदा उदयनस्य प्रतिवचनमिदम् 'कलत्रदर्शनार्हं जनं कलत्रदर्शनात्परिहरतीति

बहुदोषमुत्पादयतीति।'

तादृशो जनः कलत्रदर्शनात् न हि परिहर्तव्यः। परिहृते तत् अधिकं दोषं जनयति। तस्मात् नूनं कलत्रेण सहैव तौ द्रष्टव्यौ इति भावः।

'रज्जुच्छेदे के घटं धारयन्ति।' अथवा 'काले काले छिद्यो रुह्यते च।'

भासमहाकवेः स्वप्नवासवदत्ताख्यस्य नाटकस्य षष्ठाङ्के विद्यमानमिदं श्लोकशकलम्।

महासेनस्य अङ्कारवत्याः च सन्देशं श्रुत्वा राजा, सर्वविषयकं कुशलमिति वदति। एवमुक्त्वा सन्तप्तं तं सान्त्वयितुं काञ्चुकीयेनोक्तं पद्यमिदम् -

कः कं शक्तो रक्षितुं मृत्युकाले
रज्जुच्छेदे के घटं धारयन्ति।
एवं लोकस्तुल्यधर्मा वनानां
काले काले छिद्यते रुह्यते च।। इति।

मृत्युकाले प्राप्ते सति कः कं परित्रातं शक्तः। मृत्योः रक्षितुं शक्तो नकोऽपि इति भावः। अत्रैव दृष्टान्तः - रज्ज्वाः छेदे सति घटं के धारयन्ति। रज्ज्वा हि घटं बद्ध्वा घटीयन्त्रसाहाय्येन वयं जलं कूपादुद्धरामः। तस्यां रज्ज्वां छिन्नायां के पुनर्वयं, किं च घटीयन्त्रमिति। एवं प्राणी वनानां समानधर्मा समये समये छिद्यते रुह्यते च। काष्ठानयार्थं वनं गतैः लोकैः तदहर्निशं छिद्यत इति दृश्यते च। च्छिन्नमपि पुनः तत् कालान्तरेण वर्धत एव। एवं यथाच्छेदेऽपि वनं तद्वर्धने वा अदृष्टमेव कारणम्। तथैव अत्रापि विषये इति न खलु सन्तापः कार्य इति तदाशयः।

'अपराद्धेष्वपि स्नेहो यदस्मासु न विस्मृतः।'

भासविरचितस्य स्वप्नवासवदत्त नाटकस्य षष्ठाङ्के राजा उदयनेनोक्तं पद्यशकलमिदम्।

महाराजस्य उदयनस्य दर्शनार्थमागता वासवदत्ताधात्री, अङ्गारवती देव्याः सन्देशं उक्त्वा उदयनवासवदत्तयोः प्रतिच्छायाचित्रफलकं राजाः दर्शयति। तदा राज्ञः उदयनस्य प्रतिवचनमिदम्।

अहो स्वयोग्यता सदृशं तत्र भवत्या अङ्गारवत्या अभिहितम्। अत्र सन्देशो राज्यशतलाभादप्यधिकं प्रियतरो मे भवति। वासवदत्ताविनाशस्वप्रमादस्वरूपः। अपराद्धेषु जनेष्वपि एतादृशः स्नेहः तयोः महत्त्व सूचः इति भावः।

'परस्परगता लोके दृश्यते तुल्यरूपता।'

भासमहाकवेः स्वप्नवासवदत्ते षष्ठाङ्के विद्यमानमिदं वाक्यम्।

वासवदत्ताछात्र्या समानीते चित्रफलके वासवदत्तायाः चित्रं दृष्ट्वा पद्मावती, आर्यपुत्र! अस्याः

प्रतिकृत्याः सदृशी इहैव एका तरुणी प्रतिवसति मम विवाहकालात्प्राक् केनचिद्ब्राह्मणेन तस्य भगिनिकेति न्यासरूपेण निक्षिप्त इति वदति। तच्छ्रुत्वा राज्ञः प्रतिवचनमिदम् 'परस्परगता लोके दृश्यते तुल्यरूपता।' इति।

यदि ब्राह्मणस्य भगिनी तर्हि सा अन्या भविष्यति। लोके जनेषु परस्परगता रूपसदृशता दृश्यते। जगति हि कस्यचिज्जनस्य आकृतिः अन्यस्यकस्यापि जनस्य स्यादिति। वासवदत्ता सदृशी सा स्त्री अन्यैव स्यादिति भावः।

लघूपन्यासविभागः।

नान्दी।

नन्दयति देवान् आनन्दयतीति नान्दी। स्तवेन देवद्विजनृपादीनां आशीर्वादेन सभ्यादीन् वा आनन्दयतीति नान्दी।

आशीर्वचनसंयुक्ता स्तुतिर्यस्मात्प्रयुज्यते।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता (कीर्तिता)।।

इति तल्लक्षणम्।

नाटकादीनां रूपकाणामादौ निर्विघ्नपरिसमाप्त्यर्थं कृतः श्लोको भवति नान्दी। स एव मङ्गलश्लोक इति च कथ्यते। आशीर्नस्क्रिया वस्तुनिर्देशान्यतमात्मकं मङ्गलम्। श्लोकेऽस्मिन् नाटकांशसूचनमप्यस्ति।

अर्थतः शब्दतोवापि मनाक् कार्यार्थसूचनम्।
यत्राष्टाभिर्द्वादशभिरष्टादशभिरेव वा।।

द्वाविंशत्या पदैः वा अपि स नान्दी परिकीर्तिता।

उदयनवेन्दुसवर्णावासवदत्ता बलौ बलस्य त्वाम्।
पद्मावतीर्णपूर्णा वसन्तकम्रौ भुजौ पाताम्।।

इति अष्टाभिः पदैः भासेन स्वप्नवासवदत्ते नाम नाटके बलभद्रदेवस्तुतिरूपेण नान्दीश्लोकः सम्यक् कृतः, तत्र 'उदयनः' 'वासवदत्ता' 'पद्मावती' 'वसन्तक' पदैः नाटकप्रतिपादित कथापात्राणां सूचनमस्ति।

स्थापना।

स्थापयति अभिनेयमर्थमवतारयति या सा स्थापना। नटी विदूषकः पारिपार्श्विको वा सूत्रधारेण सह स्वकार्यवस्तुताक्षेपकथनं विचित्रैः वाक्यैः यत्र निर्वहति सा प्रस्तावना।

नटी विदूषकोवापि पारिपार्श्विक एव वा
सूत्रधारेण सहितः संलापं यत्र कुर्वते।
चित्रैर्वाक्यैस्वकार्योत्थः प्रस्तुताक्षेपिभिर्मिथः
आमुखं तरतुविज्ञेयं नाम्ना प्रस्तावनापि सा।।इति लक्षणम्।

सर्वेषु नाटकेषु नान्दीश्लोकात्परमेव प्रस्तावना विद्यते। भासेन स्थापन इति पदेन व्यवह्रियते। अस्मिन् नाटके सूत्रधारः तस्य विज्ञापनसमये नेपथ्ये शब्दं श्रुत्वा मगधराजस्य कन्यकायाः प्रवेशनम् सूचयन् निष्क्रामति। नाटकेऽस्मिन् तदेव स्थापना।

प्रवेशकः।

विष्कम्भवत् भूतभाविकथासूचक एव प्रवेशकः। अत्र नीचकथापात्रः प्रवेशकं प्रयुक्तम्।

वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः

संक्षेपार्थस्तु विष्कम्भो मध्यपात्रप्रयोजितः।

नीचपात्रैः प्रयुक्तश्च प्रवेशक इतीर्यते।

उक्तं च -

प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः।

अङ्कद्वयान्तर्विज्ञेयः शेषं विष्कम्भके यथा।। इति।

स्वप्नवासवदत्ते द्वितीयाङ्कारम्भे, चतुर्थाङ्कारम्भे, पञ्चमाङ्कारम्भे प्रवेशकं प्रयुक्तम्।

मिश्रविष्कम्भः।

नाटयति, विचित्रं रञ्जनाप्रवेशेन सभ्यानां हृदयं नर्तयतीति नाटकम् दशरूपकेषु नाटकं प्रधानं भवति। प्रख्यातेतिवृत्तयुक्तं मुखादि पञ्चसन्धिसमन्वितं च भवति नाटकम्। इतिवृत्तं तावत् सूच्यमसूच्यं चेति द्विविधम् सूच्येतिवृत्तं तावत् पञ्चभिः अर्थोपक्षेपकैः प्रतिपाद्यते। ते तावत् विष्कम्भचूलिका, अङ्कास्यं, अङ्कावतारः, प्रवेशकः च इति। तेषु प्रधानं भवति विष्कम्भः। तल्लक्षणं यथा -

वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः।<br>
संक्षिप्तार्थवस्तु विष्कम्भ आदावङ्कस्य दर्शितः।।<br>
मध्येन मध्यमाभ्यां वा पात्राभ्यां संप्रयोजितः।<br>
शुद्धः स्यात् स तु सङ्कीर्णो नीचमध्यम कल्पितः।।

अङ्कस्यादो विष्कम्भो दर्शनीयः। स शुद्धो मिश्रो अथवा सङ्कीर्णश्चेति द्विविधः। मध्यपात्रेण मध्यमपात्राभ्यां वा प्रयुक्तः शुद्धः नीचमध्यमकल्पितनिबद्धो मिश्रः। स्वप्नवासवदत्ते षष्ठांङ्कारम्भे काञ्चुकीयेन संस्कृतभाषायां प्रतीहारिण्या प्राकृतभाषायां च कृतं मिश्रभाषणं भवति अस्मिन् नाटके प्रवृत्तो मिश्रविष्कम्भः।

भरतवाक्यम्।

सर्वाणि संस्कृतनाटकानि भरतवाक्येन परिसमाप्यन्ते। भरतवाक्ये तावत् राजादीनामाशंसैव दृश्यते। नाटकान्ते प्रधानकथापात्रं नटभावं विहाय श्लोकं गायति। तदेव भरतवाक्यम्।

अस्मिन् नाटके यौगन्धरायणः परिव्राजकभावं विहाय स्वधर्मनिर्वहणं विवृत्य -

इमां सागरपर्यन्तां हिमवद्विन्ध्यकुण्डलाम्।
महीमेकातपत्राङ्कां राजसिंहः प्रशास्तु नः।।

इति भरतवाक्यं पठति। एतेन भरतवाक्यश्लोकेन स्वप्नवासवदत्तं नाम नाटकं पर्यवसति।

चरित्रचित्रणम्।

उदयनः

महाकवेर्भासस्य विख्यातं नाटकं भवति स्वप्नवासवदत्तम्। वत्सेश्वरस्योदयनस्य वासवदत्ताप्रणयः पद्मावतीपरिणयश्च नाटकस्यास्य मुख्यं कथावस्तु। अत एव राजा उदयनः स्वप्नवासवदत्ते नायकः।

अर्जुनपुत्रस्य अभिमन्योर्वंशे जातः संगीतप्रवीणः उदयनः वीणावादने समर्थो भवति। रूपयौवनसम्पन्नः शरचापरहितो मन्मथो भवति सः। वासुकिना दत्तां घोषवतीं नाम वीणां वादयित्वा वनगजाकर्षणे तस्य सामर्थ्यं प्रख्यातमेव। धीरललितोऽयं नायकः विलासप्रियः मृदुलकोमलः सुखलोलुपश्च भवति। राज्यकार्ये उदासीनः स सचिवायत्तसिद्धिर्भवति।

ललितकलालोलहृदयः उदयनः स्नेहनिधिर्भवति। उदयनस्य वासवदत्तायामनुरागः चक्रवाकयोरनुरागमपि अतिवर्तते। वासवदत्ता अग्निना दग्धेति श्रुत्वा स हताशो भूत्वा स्वप्राणान् परित्यक्तुमपि यतते 'भर्तृस्नेहोत्साहि दग्धाप्यदग्धा' इति ब्रह्मचारिणः वचनात् तां प्रति तस्य स्नेहाधित्यं स्पष्टं भवति। वासवदत्ताबद्धं स्वस्य मनः पद्मावत्याः विषये कथमुत्सुकं भवति इति विचारयत्येवम् -

कामेनोज्जयिनीं गते मयि तदा कामप्यवस्थां गते
दृष्ट्वा स्वैरमवन्तितनयां पञ्चेषवः पातिताः।
तैरद्यापि सशल्यमेवहृदयं भूयश्च विद्धा वयं
पञ्चेषुर्मदनो यदा कथमयं षष्ठः शरः पातितः।।

स गुणवान् अनपराद्धः कारुण्यशाली च भवति। कार्यान्तरहेतुना राजगृहमागतस्य तस्य कुलं,विज्ञानं, शिल्पादिपारदर्शित्वं च ज्ञात्वा महाराजदर्शकेन तस्मै पद्मावती दत्तेति धात्र्या संभाषणात् तस्य स्वभाववैशिष्ट्यं ज्ञातुं शक्यते।

मधुमदकला मधुकरा मदनार्ताभिः प्रियाभिरुपगूढाः।
पादन्यासविषण्णाः वयमिव कान्तावियुक्ताः स्युः।।
दुःखं त्यक्तुं बद्धमूलोऽनुरागः
स्मृत्वा स्मृत्वा याति दुःखं नवत्वम्।
यात्रां त्वेषा यद्विमुच्येह बाष्पं
प्राप्तानृण्या याति बुद्धिः प्रसादम्।।

इति श्लोकद्वयेन उदयनस्य वासवदत्ताबद्धं प्रेमाधिक्यं स्पष्टं ज्ञायते। तथापि पद्मावतीं प्रति स्नेहमसृणोऽयं राजा। अत एव स पद्मावत्याः शीर्षवेदनामन्वेष्टुं समुद्रगृहं गच्छति।

विदूषकस्य निरन्तरप्रेरणया स पद्मावत्याः करं गृह्णाति। वासवदत्तायां पद्मावत्यां च तस्य मनः कीदृशमिति अस्माद्वाक्याज्ज्ञातुं शक्यम् - 'रूपशीलमाधुर्यैः पद्मावती मे बहुमता, तथापि वासवदत्ताबद्धं मे मनो न हरति' इति। स्वप्ने स वासवदत्तां दृष्ट्वा, 'हा प्रिये! हा प्रियशिष्ये' इति विलपति। स्वप्नेऽपि तस्य मनोभावस्योत्तमोदाहरणमेवेदम्। आरुणि नाम्नः शत्रोराक्रमणं श्रुत्वा -

उपेत्य नागेन्द्रतुरङ्गतीर्णे
तमारुणिं दारुणकर्मदक्षम्।
विकीर्णबाणोग्रतरङ्गभङ्गे
महार्णवाभे युधि नाशयामि।।

इति सः दृढां प्रतिज्ञां करोति। अनेन राज्ञः उदयनस्य पराक्रमशौण्डता राष्ट्रमीमांसावैदग्ध्यं च द्योत्यते। एवं राज्ञः उदयनस्य वैभवमस्मिन् नाटके सर्वत्र परिलसति। संस्कृतनाटकेषु ये ये नायकाः सन्ति तेषु स्वभावेन स्वरूपेण सौभाग्येन च उदयनः प्रामुख्यमर्हति।

वासवदत्ता।

महाकविभासविरचितस्य स्वप्नवासवदत्ताख्यस्य नाटकस्य नायिका भवति वासवदत्ता। अवन्तिराजस्य महासेनस्य पुत्री भवति सा। वासवस्य-इन्द्रस्य-प्रसादेन लब्धा इत्यतः अस्याः वासवदत्तेति अन्वर्थं नाम।

सा राजकुमारी राज्ञा उदयनेन परिणीता। उदयनस्यात्यन्तं प्रियास्ति सा। सा च तस्मिन् अत्यन्तमनुरक्ता। राज्ञः उदयनस्य अभिवृद्ध्यर्थं प्राणानपि परित्यक्तुं बद्धकङ्कणा पतिव्रतास्ति सा। अत एव यौगन्धरायणेनासूत्रिते नाटके मुख्यां भूमिकां निर्वर्तयितुं सन्नद्धा अभूत्। सा प्रकृत्या सुन्दरी एव। तस्याः आकृतिवैशिष्ट्यमत्रविज्ञायते तापसीवाक्यात् - 'यद् ईदृशी अस्याः आकृतिः इयमपि राजदारिकेति तर्कयामी'ति। सा अवन्तिकायाः वेषं धृत्वा पद्मावत्याः सखीभूता प्रतिवसति। भर्तुः राज्यस्य च अभिवृद्ध्यर्थं उदयनस्य पद्मावत्या सह परिणयं सा दुःखेन सहते। 'अहो अकरुणाः खल्वीश्वराः' इति दुःखिता सा पद्मावत्याः कृते वरणमाल्यगुम्फनमपि करोति। काचित् भर्तुर्विवाहे कन्यावरणमाल्यं गुम्फतीति अतिविचित्रः खलु वृत्तान्तः। तस्याः स्वभाव, स्थैर्यं, भर्तुरुत्कर्षतत्परता चात्र द्रष्टुं शक्यम्।

वासवदत्तायाः हृदयनैर्मल्यम् अस्मिन् नाटके सर्वत्र प्रतिभाति। सोदरीनिर्विशेषोऽस्ति तस्याः पद्मावतीं प्रति स्नेहः। तां प्रति तस्याः नेषदप्यसूया। पद्मावत्याः स्वभाव सौन्दर्यं च सा सादरं वीक्षते। पद्मावती स्वापराधमर्षणाय यदा तां प्रार्थयते तदा वासवदत्ता, भर्तुरुदयनस्य कृते न केवलं तदेव ततोप्यधिकं मर्षयितुं प्रसन्ना भवतीति वदति।

राज्ञा उदयनेन सह पुनस्समागमं प्रतीक्ष्यैव वासवदत्ता यौगन्धरायणेनासूत्रितं सर्वं नाटकं फलपर्यन्तं नयति। सा प्रतीक्षा अन्ते सफला भवति। तपोवनप्रवेशनसमये भटयोः धाष्ट्र्यरूपेणोत्सारणं श्रुत्वा खिन्नापि सा यौगन्धरायणस्य 'चक्रारपङ्क्तिरिवि गच्छति भाग्यपङ्क्तिः' इति लोकोक्तिसहितोपदेशेन सर्वं सहते।

अस्याः प्रत्युत्पन्नमतित्वं नाटके स्पष्टं भवति। वासवदत्तायाः सन्निधौ चेटी पद्मावतीं प्रति कथयति, यदि राजा उदयनो विरूपो भवेदिति। तच्छ्रुत्वा आर्यपुत्रपक्षपातेन समुदाचारमतिक्रान्ता सा, उदयनो दर्शनीय एवेति वदति। तदानीं पद्मावती तां पृच्छति, कथं सा तत् जानातीति। स्वकृतमनर्थं ज्ञात्वा झटिति सा स्वस्याः प्रत्युत्पन्नमतित्वात् 'एवमुज्जयिनीयो जनो मन्त्रयते' इत्युक्त्वा तत्सयुक्तिकं परिहरति।

वासवदत्तासदृशी भर्तृपरायणा नायिका विरला भवति। तस्याः धैर्यं, स्थैर्यं, प्रागल्भ्यं, प्रतिभा भर्तुरुत्कर्षेच्छेत्यादि गुणाः अस्मिन् नाटके सर्वत्र प्रतिभान्ति। स्वप्नवासवदत्तमिति नामैवास्मिन् नाटके वासवदत्तायाः स्थानं स्पष्टीकरोति। वासवदत्तां विना नास्ति स्वप्नवासवदत्तम्।

पद्मावती।

स्वप्नवासवदत्ताख्यस्य नाटकस्य उपनायिका भवति मगधराजस्य दर्शकस्य भगिनी पद्मावती। सा अतीव चारुतया उपवर्णिता कविना भासेन।

अत्यन्तसुकुमारा, निरहङ्कारा, निर्मलहृदया च भवति सा। तदेवोक्तं विदूषकेण 'तत्रभवति पद्मावती तरुणी, दर्शनीया, अकोपना, अनहङ्कारा, मधुरवाक् सदाक्षिण्या' इति।

तीर्थोदकानि समिधः कुसुमानि दर्भान्
स्वैरं वनादुपनयन्तु तपोधनानि।
धर्मप्रिया नृपसुता नहि धर्मपीडा-
मिच्छेत् तपस्विषु कुलव्रतमेतदस्याः।।

इति काञ्चुकीयोक्तेन श्लोकेन सा धर्माभिरामप्रियेति स्पष्टं भवति।

'प्रोषितभर्तृकामिमां मे स्वसारं भवत्या कञ्चित्कालं परिपाल्यमानामिच्छामी'ति यौगन्धरायणस्यापेक्षां श्रुत्वा, महतीखल्वस्य व्यपाश्रयणा इति वदति काञ्चुकीयः। किन्तु पद्मावती, 'प्रथममुद्घोष्य अधुना प्रतिनिवर्तनं न योग्यं तस्मात्तदनुतिष्ठतु' इति वदन्ती वासवदत्तां स्वीकरोति। पद्मावत्याः दृढनिश्चयस्य उत्तमोदाहरणां भवत्ययं सन्दर्भः।

'न हि रूपमेव वागपि खल्वस्या मधुरा' इति वासवदत्तापि तां श्लाघते। उदयनं प्रति पद्मावत्याः स्नेहः अनितरसाधारणो भवति। 'भर्तृनाथा हि नार्यः' इति यत्कथ्यते तत् तस्याः विषये सत्यं भवति।

पद्मावती बहुमता मम यद्यपि रूपशीलमाधुर्यैः।
वासवदत्ताबद्धं न तु तावन्मे मनो हरति।।

इति उदयनस्य वासवदत्तासङ्कीर्तनवचनं श्रुत्वा 'अदाक्षिण्यः खलु भर्ता' इत्युक्तवतीं चेटीं मा मैवं सदाक्षिण्य एव आर्यपुत्रः, य इदानीमप्यार्यायाः वासवदत्ताया गुणान् स्मरति' इति सा राजानं स्तौति।

गुरुजनपूजने सा दत्तश्रद्धा भवति। तदर्थमेव सा आश्रमवाटीमायाति। तत्र मातरं महादेवीमभिवन्द्य अनुज्ञाता च। भर्तुः हितमनुष्ठातुं जागरूका सा उदयनस्य वासवदत्ता ज्ञातिकुलसन्दर्शनसमये स्वसान्निध्यं परिहर्तुमिच्छति। यतः राज्ञः अन्य कलत्रमस्तीति सा प्रकाशयितुं नाभिलषति। विवाहमुहूर्ते अपि उदयनः वासवदत्तालीनचित्त इति ज्ञात्वा सा न परिभवति। नाटकान्ते वासवदत्ता उदयनस्य पत्नीति ज्ञात्वा 'आर्ये सखीजनसमुदा-चारेणाजानन्त्यातिक्रान्तः समुदाचारः तच्छीर्षेण प्रसादयामीति सा वासवदत्तां प्रति क्षमां प्रार्थयते।

एतेन उदात्तस्वभावमाहात्म्येन, निरुपमसौन्दर्येण च पद्मावती स्वप्नवासवदत्तं नाम नाटके उद्वितीयं स्थानमलङ्करोति।

विदूषकः।

विविधप्रकारेण विवादेन दूषयतीति विदूषकपदस्य व्युत्पत्तिः। साधारणतया विदूषकः हास्यरसप्रियो भक्षणप्रियश्च भवति। सः नायकस्य प्रियवयस्यः सन्ततसहचारी इष्टानुवर्ती च। नर्मसचिव इत्यपि स प्रस्तूयते। अस्मिन् नाटके वसन्तक इति विदूषकस्य नाम। अयं हास्यरसप्रियो बुद्धिमान् राज्ञः इष्टानुवर्ती च भवति।

अयं वसन्तको विदूषकाणां मध्ये अनितरसाधारणो भवति। स नर्मसचिवः इत्येदपेक्षया कर्मसचिव इति ख्यापकाः सन्दर्भाः सन्त्यस्मिन् नाटके।

चतुर्थाङ्के प्रमदवनं प्रविष्टो राजा वासवदत्तां स्मृत्वा बाष्पाकुलनेत्रोऽभूत्। तदानीं तत्रागतां पद्मावतीं दृष्ट्वा 'वातानीतेन काशकुसुमरेणुनाक्षिनिपतितेन साश्रुपातं खलु तत्र भवतो मुखं' इति वदति विदूषकः। तस्य प्रत्युत्पन्नमतित्वम् अत्र स्पष्टं प्रकाशते। पञ्चमाङ्के राजा स्वप्ने स्वस्य वासवदत्तादर्शनं विदूषकं प्रति वदति। तच्छ्रुत्वा यौगन्धरायणेनासूत्रितं सर्वं निष्फलं भवेदिति मत्वा, 'अस्मिन् राजकुले अवन्तिसुन्दरी नाम काचित् यक्षिणी प्रतिवसति। सा त्वया दृष्टा भवेत्' इत्युक्त्वा सः राजानं चतुश्शालं नयति।

वासवदत्तादाहदग्धहृदयं राजानं शीतलोपचारेण जीविताभिमुखं नयन् अयं नर्मसचिवः कर्मभूमौ यौगन्धरायणमप्यतिशेते। राज्ञः उदयनस्योत्कर्षतत्परो विदूषकः, 'उचितं तत्र भवतो मगधराजस्यापराह्णकाले

भवन्तमग्रतः कृत्वा सुहृज्जनदर्शनम्। सत्कारो हि नाम सत्कारेण प्रतीष्टः प्रीतिमुत्पादयति। तदुत्तिष्ठतुतावद्भवान्' इत्येवं सदुपदेशेन राजनानं कृत्यनिर्वहणाय प्रेरयति। विदूषकस्य कर्मसचिवत्वमत्र स्पष्टं बोध्यम्। अत एव, 'कर्तारः सुलभा लोके विज्ञातारस्तु दुर्लभाः' इति राजा विदूषकं प्रशंसति।

राज्ञः सन्ततसहचारी विदूषकः तस्य आत्ममित्रं च भवति। वासवदत्ताविरहेण दुःखितं राजानं, 'अनतिक्रमणीयो हि विधिः' इति लोकोक्त्या सः समाश्वासयति। विदूषकस्य वसन्तकस्य निरन्तरप्रेरणया उदयनः पद्मावतीं परिणयति। 'कुत्र वासवदत्ता, चिरात्खलूपरता' इति विदूषकस्योक्तिः सत्यमिति मत्वा स पद्मावतीं परिणीतवान्। नाटकस्यास्य शुभपर्वसायित्वे उदयनपद्मावत्योः परिणये च विदूषकः स्वभागं समर्थतया अभिनयति। एवं वसन्तकस्य विदूषकस्य सृष्टिः कथावस्तु नितरां समाकर्षकमापादयति।

यौगन्धरायणः।

राज्ञः उदयनस्य महामन्त्री भवति यौगन्धरायणः। तस्य राष्ट्रतन्त्रपाटवं प्रतिज्ञायौगन्धरायणे सम्यगुपवर्णितम्। उज्जयिन्यां राज्ञः महासेनस्य कारागृहे अपतदुदयनः। तत्र वासवदत्ता तस्मात् वीणावादनमभ्यस्यति। यौगन्धरायणः तस्य बुद्धिवैभवेन राजानं बन्धनात् मोचयति। बन्धनविमुक्तः राजा शिष्यया वासवदत्तया सह उज्जयिनीमागच्छति। उज्जयिनीमागतस्योदयनस्य कथाशेषः स्वप्नवासवदत्ते वर्णितोऽस्ति।

अस्मिन् नाटके यौगन्धरायणः हि प्रथमतया रंगमञ्चं प्रविशति। अङ्कारम्भे सः परिव्राजकवेषं धृत्वा पद्मावतीसकाशं गत्वा वासवदत्तां न्यासरूपेण समर्पयति।

वासवदत्तापरिणयानन्तरं राज्यकार्येषु राज्ञः वैमुख्यं ज्ञात्वा यौगन्धरायणो अपरं तन्त्रमाविष्करोति। यदि उदयनो मगधराजस्य दर्शकस्य स्वसारं पद्मावतीं परिणेष्यति तर्हि तस्य बन्धुबलमपि सिद्ध्येत्। तस्मात् मन्त्रिभिः सह सम्मन्त्र्य यौगन्धरायणः तदर्थं यतते।

मृगयालोलुपः उधयनः मृगयार्थं यत्रकुत्रापि नेतुं शक्यः। एवं जानन् यौगन्धरायणः लावाणकं प्रति वासवदत्तासमेतं तं नयति। तत्र एखाकिनीं शिबिरवासिनी वासवदत्ता अग्निदग्धेति प्रवादं प्रचाल्य तस्माद्देशात्तामपनीय भगिनीरूपेण पद्मावतीसकाशे न्यासरूपेण समर्पयति। तदा तत्रागतस्य ब्रह्मचारिणः वाक्यात् राज्ञः सन्ततसहचारिणः रुमण्वतः क्लेशभूयिष्ठामवस्थां चिन्तयति। सर्वेष्वपि कार्येषु यौगन्धरायणस्य श्रद्धा अत्र व्यज्यते।

'अविचार्य क्रमं न करिष्यती'ति वासवदत्तायाः वाक्यं यौगन्धरायणस्य प्रतिभां सूचयति। सः वासवदत्ताया वस्त्राण्याभरणानि च अग्नौ निक्षिपति। अनन्तरं दग्धशेषाणि वस्त्राण्याभरणानि च प्रदर्श्य वासवदत्ताविनाशं प्रख्यापयति यौगन्धरायणः। अत्र तस्य सूक्ष्मदर्शनपटुत्वमपि प्रकाशते। 'एकमेवनीतिबीजमिति बहुफलता यस्य' इति प्रशंसां अयमप्यर्हति। तपोवने काञ्चुकीयस्य, तपस्विन्निति

संबोधनं श्रुत्वा तस्य दौत्यं विफलं भवेदित्याशङ्कया स न प्रतिषेधति कार्यनिर्वहणे तस्य निष्ठा अत्र स्पष्टं बोध्या।

'फलानुमेयाः प्रारम्भा' इति यौगन्धरायणस्य मन्त्रगुप्तिः। तपोवने वार्ताहारी भूत्वा प्रविशन्तं ब्रह्मचारिणं, तथा षष्ठाङ्कारम्भे बहिः घोषवत्याः केनापि वादनं च आविष्कुर्वन् यौगन्धरायणो मर्मज्ञः मन्त्रप्रयोक्ता इत्येतत् निस्सन्देहं भवति। नाटकान्ते स न्यासीकृतां स्वसारं प्रतिग्रहीतुं पुनःप्रविशति। वासवदत्तायाः संगोपनादिकं कार्यजातमवगत्य किं राजा तुष्टो वा क्रुद्धो वा भवेदिति आशङ्कते। किन्तु कार्यनिर्वहणे हितमेव प्रभोः कृतं सर्वदा इत्यतः स स्वात्मनि अभिमानभाक् च भवति।

अन्ते स राजान्तिकं गत्वा, देव्यपनयेन अपराधः कृतो मया, तत् क्षम्यतामित्युक्त्वा राज्ञः पादयोः पतति। तदा राजा उदयनो यौगन्धरायणस्य गुणान् स्वामिभक्तिं च मुक्तकण्ठं प्रशंसति। तस्य तथा तन्त्रकुशलता कार्यार्थं कार्यनिह्नवे सुप्रयुक्ता दृश्यते। अग्निदाहककथाप्रवादादिकं अस्य बुद्धिवैभवोत्पन्नं नाटकमध्ये नाटकान्तरप्रमितिं जनयति। वस्तुतः यौगन्धरायणः परमार्थतो नाटकस्यास्य सूत्रधारः। एतदेवपरं महाकवेर्भासस्य महत्त्वं यत् स्वकपोलकल्पितमपि पात्रं सजीवं पदं प्राप्नोति। एवं भासेन सृष्टः यौगन्धरायणो हृदयावर्जको भवति।

ब्रह्मचारिणः प्रवेशस्य नाटकीयं प्राधान्यम्।

स्वप्नवासवदत्तस्य पूर्वपीठिकायां वासवदत्ताया अग्निदाहप्रवादवृत्तान्तः प्रमुखो भवति। शिक्षाप्रत्यूहवशाल्लावाणकदेशात् पर्यटन् कश्चिद् ब्रह्मचारी आश्रमपदमायाति। तस्य मुखादेव लावाणके प्रवृत्तां अग्निबाधामधिकृत्य वयं श्रृणुमः।

प्रथमाङ्के आवन्तिकावेषधारिण्या वासवदत्तया सह परिव्राजकवेषधारी यौगन्धरायणः प्रविशति। स पद्मावतीसकाशे वासवदत्तां न्यासत्वेन समर्प्य विश्राम्यति। तदायं ब्रह्मचारी तत्रागच्छति। निवृत्तपरिश्रमः स सर्वं वृत्तान्तं चातुर्येण वर्णयति, 'श्रुतिविशेषणार्थं लावाणकग्रामे उषितवानस्मि। तत्रातिदारुणं व्यसनं संवृत्तम्। तत्र राज्ञि उदयने मृगयार्थं निष्क्रान्ते ग्रामदाहेन तस्य प्रिया वासवदत्ता दग्धा। तां रक्षितुमुद्युक्तो यौगन्धरायणो नाम सचिवः

तस्मिन्नेवाग्नौ पतितः प्रतिनिवृत्तो राजा वासवदत्तायाः दग्धशेषाणि वस्त्राण्याभरणानि च परिष्वज्य मोहमुपगतः। अथ प्रतिलब्धसंज्ञः सः बहुप्रलापं कृत्वा तस्मिन्नेवाग्नौ प्राणान् परित्युक्तुकामोऽभूत्। तदा सचिवैः महता यत्नेन वारितः।

ब्रह्मचारिण एतत्कथाकथनं भिन्नकथापात्रेषु विभिन्नान् विकारान् जनयति। उदयनस्य स्नेहातिरेकं, तस्य सुरक्षितस्थितिं च वासवदत्तां बोधयितुं ब्रह्मचारिण आगमनं समर्थं भवति। राज्ञोऽवस्थां रुमण्वतः प्रवृत्तिञ्च श्रुत्वा स्वस्योद्यमः सफलो भवतीति ज्ञात्वा यौगन्धरायणः चरितार्थोऽभूत्। किञ्च विभार्यमुदयनं प्रति पद्मावत्याः प्रणयस्य बीजावापोऽपि ब्रह्मचारिणः प्रवेशनेन संसाधितः। उदयनं प्रति पद्मावत्या

अनुरागस्योत्कर्षणाय प्रवृत्तोऽयं सन्दर्भोऽस्य नाटकस्य मुखसन्धिः।

एवं कथागात्रोत्कर्षणाय कथापात्रव्यक्तित्वपोषणाय च ब्रह्मचारिणः प्रवेशः प्रयोजकी भवति। तत्र भासस्य सूक्ष्मदर्शनपटुत्वमपि नितरां प्रकाशते।

*****

## Module III & IV

## Campū Literature and Rāmāyaṇacampū of Bhoja (Bālakāṇḍa)

चम्पूसमुदायः।

सामान्यतः काव्यस्य भेदद्वयं प्रथते - दृश्यं श्रव्यञ्चेति। श्रव्यकाव्यमपि द्विप्रकारम् - गद्यकाव्यं पद्यकाव्यञ्चेति। स्वीययाऽर्थप्रधानतया गद्यकाव्यं गौरवशालि, यतो हि पद्यकाव्यं कियतांशेन रागद्वारापि श्रोतृजनमनांस्याकर्षयति, गद्यकाव्यं तु स्वीयेनार्थगौरवेणैव श्रोतृजनहृदयान्यावर्जयेत्। गद्यकाव्यगतमर्तगौरवं पद्यकाव्यगतमर्थगौरवपुरस्कृतं रागमयत्वं चेत्युभयं मिलित सदधिकं चमत्कारं जयनेदिति भावनैव चम्पूकाव्यस्योत्पत्तौ कारणत्वेन सम्भाव्यते चम्पूरामायणप्रणेता भोजराजोऽपीममेवार्थमाह -

गद्यानुबन्धरसमिश्रितपद्यसूक्तिर्हृद्या हि वाद्यकलया कलितेव गीतिः।
तस्माद्दधातु कविमार्गजुषां सुखाय चम्पूप्रबन्धरचनां रसना मदीया।।

गद्यसम्बन्धेन पद्यानि तथैवानन्ददायकानि जायन्ते यथा वाद्ययन्त्रैरुपेतानि गायनानि। यथा केवलं गायतं न तथा चमत्कारकारि यथा वाद्योपस्कृतं, तथैव केवलं गद्यं न तथा चमत्कारकारि तथा पद्यमिश्रमिति भावयित्वैव कवयः चम्पूकाव्यान्यसृजन्।

चम्पूलक्षणम्।

सर्वप्रथममाचार्यो दण्डी 'गद्यपद्यमयी वाणी चम्पूरित्यभिधीयते' इति चम्पूलक्षण-मुक्तवान्। तदनन्तरभाविनोऽप्याचार्यास्तदेवान्ववदन्। 'गद्यपद्यमयं काव्यं चम्पूः' इति तल्लक्षणे वाणीस्थाने काव्यपदनिवेशेऽपि न कापि नवीनत -

क्वचिदत्र भवेदार्या क्वचिद् वक्त्रापवक्त्रके।
आदौ पद्यैर्नमस्कारः खलादेर्वृत्तकीर्त्तनम्।।

इति लक्षणानुसारेण कथाऽऽख्यायिकयोरपि गद्यपद्यमिश्रितत्वेन चम्पूलक्षणप्रसक्तिस्तु न शङ्कनीया, तयोर्गद्यस्यैव प्राधान्यात्, लक्षणानुरोधेनैव कतिपय पद्यानां तयोः प्रवेशाच्च।

चम्पूकाव्येषु तु गद्यपद्ययोर्मात्रा प्रायेण समा भवति किमप्येकमङ्गमति पृथुलं न जायेतेत्यस्मिन्नंशे कवयः सतर्कास्तिष्ठन्ति।

चम्पूकाव्यविकासः।

चम्पूकाव्यं गद्यकाव्यस्यैव परिमार्जितं रूपमिति कथनेन सत्यमपलप्यते यद्यपि यजुर्वेदे गद्यपद्ययोर्मिश्रणमुपलभ्यते तथापि नासौ चम्पूप्रकारः। पाली जातकमाला एव चम्पूकाव्यस्यादिमं स्रोत इति वक्तुं शक्यते। हरिषेणस्य प्रयागप्रशस्तौ गद्यपद्यमिश्रणमस्य प्राथमिकप्रयोगरूपं मन्तुं शक्यते। यद्यपि जातकमाला हरिषेणस्य प्रयागप्रशस्तिश्च गद्यपद्यमिश्रं प्राग्रूपभूतं शरीरं धारयतस्तथापि चम्पूकाव्येन वास्तविकं रूपं दशमशताब्यामेव प्रकटितं यदा नलचम्पूर्जनिमलभत।

त्रिविक्रमभट्टः।

त्रिविक्रमभट्टः 'नलचम्पू' इति संज्ञया प्रसिद्धं चम्पूग्रन्थं प्रणीय गद्ये पद्ये च समानभावेन काव्यगुणानुपस्थापयितुमयतत।

त्रिविक्रमभट्टः स्वीये ग्रन्थे -

शश्वद् बाणद्वितीयेन नमदाकारधारिणा।
धनुषेव गुणाढ्येन निश्शेषो रञ्जितो जनः।।

इति बाणभट्टं स्मरति। त्रिविक्रमभट्टस्य नलचम्पूगतं पद्यम् -

पर्वतभेदि पवित्र जैत्रं नरकस्य बहुमतङ्गहनम्।
हरिमिव हरिमिव हरिमिव सुरसरिदम्भः पतन्नमत।।

इति भोजराजेन सरस्वतीकण्ठाभरणे समुद्धृतम्। अयं त्रिविक्रमभट्टः राष्ट्रकूटवंश्य-कृष्णद्वितीयपुत्रस्य इन्द्रराजस्य नवसारीशिलालेखं लेखितवान्, तत्र -

श्रीत्रिविक्रमभट्टेन नेमादित्यस्य सूनुना।
कृता शस्ता प्रशस्तेयमिन्द्रराजाङ्घ्रिसेविना।।

इति पद्यं विद्यते।

एतेन सर्वेण त्रिविक्रमभट्टस्य बाणभोजमध्यवर्तित्वमिन्द्रराजाख्यनृपतिसमकालिकत्वं च प्रतिपन्नं भवति।

पूर्वोल्लिखितस्य नवसारीशिलालेखस्य समयः ९१५ ख्रीष्टीयो वर्तते, अतस्त्रिवि-क्रमभट्टः ख्रीष्टीयदशमशतकस्य पूर्वार्द्धे बभूवेति निश्चयेन वक्तुं शक्यते। स चायं दशम-शतकपूर्वभागोद्भवस्त्रिविक्रमः कविवरराजशेखरस्य समसामयिकः स्यादिति सम्भाव्यते।

त्रिविक्रमभट्टस्य कृतयः।

नलचम्पूः मदालसाचम्पूः नवसारीशिलालेखश्चेति त्रयः प्रबन्धास्त्रिविक्रमभट्टेन विरचिताः। त्रिष्वप्येषु शिलालेखरूपः प्रबन्धः 'एपिग्राफिका इण्डिया' इति नामके प्रकाशने नवमभागे ३२ तमे

पृष्ठे मुद्रितः। अस्य शिलालेखस्यैकं पद्यम् -

जयति विबुधबन्धुर्विन्ध्यविस्तारवक्षः-
स्थलविमलविलोलत्कौस्तुभः कंसकेतुः।
मुखसरसिजरङ्गे यस्य नृत्यन्ति लक्ष्म्याः
स्मरभरपरिताम्यत्तारकास्ते कटाक्षाः।। इति।

प्रशस्तेरस्याः कविताशैली नलचम्पूगतां काव्यशैलीं तुलयतीति सिद्ध्यत्यनयोः प्रबन्धयोरेककर्तृकत्वम्।

नलचम्पूः दमयन्तीचम्पूरिति नामान्तरेणापि प्रसिद्ध्यति। अत्र सप्तोच्छ्वासा विद्यन्ते। अस्य ग्रन्थस्य सर्वत्राप्युच्छ्वासान्ते हरचरणसरोजपददर्शनाद् माघस्य श्र्यङ्कत्वमिव किरातार्जुनीयस्य लक्ष्म्यङ्कत्वमिव वा अस्यापि ग्रन्थस्य हरचरणसरोजाङ्कत्वं कथ्यते।

अत्र ग्रन्थे कविः सर्वमपि श्लेषप्रकारं सरलतापुरस्कृतं तथा प्रयुक्तवान् येन पाठकानां हृदयानि माद्यन्ति। सुबन्धोः कवितायां श्लेषमयतासाधनार्थं यः प्रयत्नभरः कृतो दृश्यते, तादृशः प्रयाससाध्यः श्लेषोऽत्र दुरापः। अत्रत्यः सर्वोऽपि श्लेषः सुगमः सन्नपि हृद्यतमः -

सदूषणापि निर्दोषा सखरापि सुकोमला।
नमस्तस्मै कृता येन रम्या रामायणी कथा।।

आर्यावर्त्तवर्णने विपल्लवशब्दस्य कीदृशः स्पष्टोऽर्थः श्लेषेण गुम्फितः -

भवन्ति फाल्गुने मासि वृक्षशाखा विपल्लवाः।
जायन्ते न तु लोकस्य कदापि च विपल्लवाः।।

न कवलं श्लेषचमत्कार एव, अपि तु परिसङ्ख्याया विरोधाभावस्योत्प्रेक्षाया उपमाया वा साधूपन्यासे कविरयं सिद्धहस्तः। दृश्यताम् -

उदयगिरिगतायां प्राक्प्रभापाण्डुताया-
मनुसरति निशीथे श्रृङ्गमस्ताचलस्य।
जयति किमपि तेजः साम्प्रतं व्योममध्ये
सलिलमिव विभिन्नं जाह्नवं यामुनञ्च।।

'मदालसाचम्पू' नामकस्तु ग्रन्थो दुरापतया परिचाययितुं न पार्यते।

सोमप्रभसूरिः।

दिगम्बरजैनः सोमप्रभसूरि राष्ट्रकूटनरेशस्य कृष्णस्य राजत्वकाले सामन्तराजारिकेसरि-चालुक्यतृतीयस्य सभायां ९५९ तमेशवीयवर्षे 'यशस्तिलकचम्पू' नामकं ग्रन्थं लिखितवान्, यो ग्रन्थो जैनमतसिद्धान्तानामवगतये साधूपयुज्यते।

यशस्तिलके अष्ट उच्छ्वासाः सन्ति। अत्र अवन्तिराजो यशोधरः, तत्पत्न्यः कपटपटुता, राज्ञो मृत्युः, नानायोनिषु भ्रमणम्, अन्ततस्तस्य जैनधर्मप्रवेशश्चेत्यादयोऽर्था निपुणं वर्णिताः।

गुणभद्रकृतमुत्तरपुराणमाश्रित्य चम्पूग्रन्थोऽयं प्रणीतः। इमामेव यशोधरनृपतिकथामाश्रित्य पुष्पदन्तेन 'जसहरचरिउ' नामकमपभ्रंशकाव्यं वादिराजसूरिणा च यशोधरचरितं नाम संस्कृतकाव्यं व्यरचि।

यद्यप्यस्य चम्पूग्रन्थस्य शैली अलङ्कारपूर्णा प्राञ्जला च भाषा, तथापि नलचरित-चम्पूसमानं माधुर्याद्यत्र नोपलभ्यते। बाणमनुसरन्नयं कविः स्वीयेऽत्र ग्रन्थे जन्मान्तर-वृत्तमुपन्यस्तवान्।

हरिचन्द्रः।

धर्मशर्माभ्युदयनामकमहाकाव्यप्रणेता हरिचन्द्रो नाम दिगम्बरजैनः 'जीवन्धरचम्पू' नामकं ग्रन्थं प्रणीतवान्। अत्र उत्तरपुराणगता जीवन्धरस्य जीवनकथा एकादशभिर्लम्भकैः लिखिता। अस्य हरिचन्द्रस्य परिचयादिकं धर्मशर्माभ्युदयनामककाव्यस्य प्रसङ्गे निरूपितम्।

कतिपये भागवताधाराश्चम्पूग्रन्थाः।

भागवतचम्पूरिति नाम्ना अनेके चम्पूग्रन्थाः प्रथन्ते। चिदम्बरविरचितः एकः, रामभद्रविरचितोऽपरः, राजनाथरचितश्चैकोऽन्यः। सर्वेऽपीमे चम्पूग्रन्था भागवत आधारीकृत्य कृताः।

प्रह्लादचरितं नाम भक्तविवरणं नितान्तलोकप्रियमासीत्, अत एव 'नृसिंहचम्पू'संज्ञया कतिपये चम्पूग्रन्थाः श्रूयन्ते।

केशवभट्टकृतः नृसिंहचम्पूग्रन्थः षड्भिः स्तबकैः पूर्णः। दैवज्ञसूर्यकृतः नृसिंहचम्पूग्रन्थः पञ्चभिरुच्छ्वासैः समापितः। सङ्कर्षणकृतः नृसिंहचम्पूग्रन्थः चतुर्भिरेवोल्लासैः पूर्णः शेषश्रीकृष्णेन षोडशख्रीष्टषतके पारिजातहरणचम्पूग्रन्थः प्रणीतः।

महाभारताश्रयश्चम्पूग्रन्थः।

महाभारतीं कथामाश्रित्य अनन्तभट्टेन भारतचम्पूनामको विशालकायो ग्रन्थो विरचितो यत्र द्वादशस्तबकेषु महाभारतकथोपनिबद्धा।

दिगन्तरलुठत्कीर्तिरनन्तकविकुञ्जरः।
प्राणैः समं सरस्वत्याः प्राणैषीच्चम्पुभारतम्।।

इतीयदेवानन्तभट्टेन स्वीयचरितादिप्रसङ्गे कथितमिति न ततः कोऽपि चरिते प्रकाश आधीयते।

ख्रीष्टीयषोडशशतकभवो मानवेदनामको दाक्षिणात्यो भारतचम्पूग्रन्थस्य व्याख्यां प्रणीतवान्। एतेनास्य, षोडशशतकपूर्वपर्तित्वमायातम्। भागवतचम्पूनामकः सम्प्रत्यप्राप्य-श्चम्पूग्रन्थोऽनेनानन्तभट्टेन ख्रीष्टीयैकादशशतके प्रसिद्धेन अभिनवकालिदासेन सह स्पर्द्धायां लिखित इति दन्तकथा, ततोऽस्य

ख्रीष्टीयैकादशशतकवर्तित्वं प्रतीयते। तदित्थमयं ख्रीष्टैकादशशतकषोडशशतकयोरन्तरालेऽजायतेति वक्तव्यं भवति।

अत्र ग्रन्थे प्रयुक्ताया भाषाया विचारेण शैल्याश्च परिशीलनेनास्य षोडशशताब्दीतः किञ्चित्पूर्वकालिकत्वमिव प्रतिपन्नं भवति।

भारतचम्पूग्रन्थे द्वादशस्तबकाः सन्ति। अत्र संहत्य उपसहस्र श्लोकाः सन्ति। परिमाणे ततः किञ्चिदेव न्यूनं गद्यमपि विद्यते।

भारतचम्पूः काव्यदृष्ट्या श्लाघनीया विद्यते। अत्र पद्यानां बन्धो यथैव दृढो गद्यानां माधुर्यं स्फुटश्लेषपूर्णत्वञ्च तथैव हृदयावर्जकम्। पद्यमेकं दृश्यताम् -

जाग्रत्सोमककीर्तिसोमनिमिषत्पद्मावकाशात्ययात्
प्राप्तेन्दीवरनित्यवासघटितश्यामप्रभा श्रीरिव।
पाञ्चालस्य सुता ततः परिजनैः सार्धं पुरः पश्यतां
राज्ञां बुद्धिमिवाधिरुह्य शिविकां रङ्गस्थलीं प्राविशत्।।

न केवलं गाढबन्धोत्प्रेक्षयोरेव प्रयोगः, अतिशयोक्तिप्रयोगोऽपि सारल्यसहकृतोऽस्य नितान्तहृद्यः। दृश्यताम् -

सकलमपि वपुर्विभूष्य तन्व्याः सपदि सखी विपुलेक्षणाम्बुजाऽपि।
चिरतरमनवेक्ष्य मध्ययष्टिं करधृतकाञ्चनकाञ्चिरेव तस्थौ।।

गद्यमाधुर्यमपि दृश्यताम्, व्यासादेशेन पाण्डवा एकचक्रायां पुर्यां स्थिताः, तस्या एव नगर्या वर्णनमिदम् -

'प्रावृषमिव बकबलाक्रान्ताम्, पातालनगरीमिव प्रत्यहं वर्धमानवलिशोकाम्, अङ्गराज्यसीमामिव सूर्यतनयानुकूलप्रतिष्ठाम् रविरथाक्षधुरमिवैकचक्राम्।'

कीदृशी सरसा सरला च शैली।

अन्ये चम्पूग्रन्थाः।

दक्षिणभारतीयाश्चम्पूग्रन्थान् अधिकसंख्यायां रचितवन्तः। तत्र -

यात्राप्रबन्धः - समुद्रपुङ्गवदीक्षितः षोडशशतकोद्भवः स्वज्येष्ठमात्रा सह कृतां स्वीयां तीर्थयात्रामेव वर्णयन् यात्राप्रबन्धनामकं चम्पूग्रन्थं लिखितवान्। अत्र दक्षिणभारतगततीर्थानां वर्णनं कृतं यद्विषयदृष्ट्या नवीनं व्यापकञ्च सदपि प्रकृतिवर्णने प्राचीनां परम्परामनुहरति।

वरदाम्बिकापरिणयचम्पूः - अयं चम्पूग्रन्थः ऐतिहासिकदृष्ट्या महत्त्वपूर्णः, तिरुमलाम्बाकृतश्च।

नीलकण्ठविजयचम्पूः - नीलकण्ठकविना कृतोऽयं ग्रन्थः समुद्रमन्थनं विषयीकरोति। स चायं नीलकण्ठः शिवलीलार्णवकर्तुरभिन्न एवेति ख्रीष्टसप्तदशशतकपूर्वार्द्धभागोऽस्य निश्चितः समयः।

विश्वगुणादर्शचम्पूः - पौराणिकीभिः कथाभिरुद्वेजिताः कवयो नूतनानि वस्तून्याधारी-कृत्यापि चम्पूग्रन्थप्रणयनं कृतवन्तः। विश्वगुणादर्शचम्पूरेतादृशस्यैव प्रयासस्य फलम्। विश्वगुणादर्शः नामकस्यास्य ग्रन्थस्य रचयिता वेङ्कटाध्वरी। स हि काञ्चीवासी आत्रेयगोत्रोद्भवः रघुनाथसीतयोः पुत्रश्च। अस्य समयः ख्रीष्टसप्तदशशतकम्। अयं ग्रन्थः सर्वथा नूतनया शैल्या निबद्धः। अत्र विश्वावसुः कृशानुश्चेति द्वौ गन्धर्वौ विमानमारूढौ भारतीयानि तानि तानि तीर्थानि पश्यतः, तेषां तीर्थानां गुणान् दोषांश्च वर्णयतः। तदेवमत्र भारतस्य भौगोलिकं वर्णनं तीर्थानां गुणदोषविमर्शश्च कृतो बोध्यः।

वैष्णवमतपोषकाश्चम्पूग्रन्थाः - यथा जैनमतावलम्बिनो निजमतपरिपुष्टये तत्प्रचाराय च तांस्तांश्चम्पूग्रन्थान् यशस्तिलकजीवन्धरचरितादीन् विरचितवन्तस्तथैव माध्वागौडीयशाखाया वैष्णवा विद्वांसः स्वमतप्रचारपुष्टिभ्यां तांस्तान् चम्पूग्रन्थान् निबबन्धुः। तत्र महाप्रभुचैतन्यस्य शिष्यो रघुनाथदासः मुक्ताचरित्रनामकमेकं चारु चम्पूपुस्तकं कृतवान्। अत्र कृष्णद्वारा मुक्ताया वपनं तस्य क्षीरेण सेचनञ्च वर्णितम्। अस्यापि समयः षोडशशताब्दी एव सम्भाव्यते।

कविकर्णपूरकृता आनन्दवृन्दावनचम्पूः विशालतनुरतिहृद्या च। अयं कर्णपूरः षोडशशतकावसानभागवर्ती।

ख्रीष्टसप्तदशशतकोत्पन्नो जीवगोस्वामी गोपालचम्पूनाम्ना प्रथमानं ग्रन्थं कृतवान्, यत्र कृष्णचन्द्रस्य समस्तमपि चरित्रम् आलङ्कारिक्या मार्मिक्या च पद्धत्या वर्णितम्। अत्र चन्पूग्रन्थे गौडीयशाखासम्मतभक्तिप्रकारस्य विवेचनमपि साधूदाहरणादिप्रदर्शनविधया कृतमिव। काव्यग्रन्थेन सहैवायं धर्मग्रन्थोऽपि वक्तुं शक्यते।

सप्तदशशताब्द्याः परतोऽपि चम्पूकाव्यानां प्रणयनं प्रक्रान्तमेवावर्तत। वीरमित्रोदय-नाम्ना प्रसिद्धस्य नानाभागविभक्तस्य धर्मशास्त्रग्रन्थस्य कर्ता मित्रमिश्रनामा विद्वान् आनन्द-कन्दचम्पूनामकं चम्पूग्रन्थमेकं प्रणीतवान्। अत्र ग्रन्थे कविपण्डितमित्रमिश्रेण भगवतः श्रीकृष्णचन्द्रस्य बाललीलानां रुचिरं वर्णनमवसानभागे स्वाश्रयदातुः १६०५ ख्रीष्टीयतः १६२७ ख्रीष्टीयवर्षपर्यन्तम् ओरछानामके स्थाने राज्यं कृतवती वीरसिंहदेवस्य वंशानुकीर्तनमपि कृतम्।

मित्रमिश्रो ग्वालियरवासी शाण्डिल्यगोत्रो हंसमिश्रस्य पौत्रः परशुराममिश्रस्य च पुत्रः सनाढ्यब्राह्मणवंशोद्भवश्चासीत्। अस्य वीरसिंहदेवाश्रितत्वात् समयः ख्रीष्टसप्तदशशतकपूर्वार्द्धभागः सिद्ध एव।

वङ्गदेशोद्भवो बाणेश्वरभट्टाचार्यः अष्टादशशतकोत्पन्नेषु वङ्गीयपण्डितेषु प्रथितकीर्तिरासीत्। अयमेव बाणेश्वरभट्टाचार्यः वारनहेस्टिंग्सनामकेन बङ्गालराज्यालेन नियुक्तो विवादार्णवसेतुं नाम

विधिग्रन्थं कृतवान्। अनेन बाणेश्वरभट्टाचार्यस्य समयः १७७५ ख्रीष्टीयवर्षमितो निर्धारितो भवति।

अयं बाणेश्वरः चित्रचम्पूनामानमेकं वैष्णवभावनायास्तत्वस्य च प्रकाशकं ग्रन्थं निर्मितवान्। प्रेमभक्तिद्वारा भगवत्प्राप्तेरुपायोऽत्र काव्यवर्त्मना प्रकाशितः।

एतावत्पर्यन्तं येषां चम्पूकाव्यानां चर्चा कृता तदन्येऽपि कतिपये चम्पूग्रन्थाः श्रूयन्ते। यथा -

१. सोड्ढलः - कायस्थवंशोत्पन्नः कोङ्कणराज्यस्य मुम्मणिराजनामकस्याश्रित आसीत्, अतोऽस्य समयः १०६० ख्रीष्टीयमितः कथ्यते। अनेन अवन्तिसुन्दरीकथाचम्पूः विरचिता।

२. अनन्तभट्टस्य भागवतचम्पूः। (एकादशशतकम्।)

३. समरपुङ्गवदीक्षितस्य तीर्थयात्राप्रबन्धचम्पूः। (सप्तदशशतकम्।)

भोजराजः।

भोजराजेन धाराधीशेन कृता रामायणचम्पूः किष्किन्धाकाण्डावसाना एव, तस्या युद्धकाण्डं लक्ष्मणभट्टेन कृतम्। अयं भोजराज एकादशशतकोद्भवः प्रसिद्धः साहित्यसेवी।

चम्पूरामायणस्य साहित्यिकं गौरवमतिमहत्त्वपूर्णम्। भोजस्य शब्दगुम्फः स्वभावसरलः अर्थराशिश्च चमत्कारातिशयशाली। अस्य वाल्मीकिकाव्यप्रशंसायां लिखितं पद्यं नितान्त-हृद्यम् -

वाल्मीकिगीतरघुपुङ्गवकीर्तिलेशै-
स्तृप्तिं करोमि कथमप्यधुना बुधानाम्।
गङ्गाजलैर्भुवि भगीरथ यत्नलब्धैः
किं तर्पणं न विदधाति नरः पितृणाम्।।

सीताया अशोकवाटिकायां तिष्ठन्त्या दशां वर्णयति कविः -

उपघ्नवृक्षस्य परोक्षभावादाश्रित्य भूमिं सुचिरं लुठन्त्याः।
नक्तञ्चरस्त्रीमुखकर्शितायाः सीतालतायास्त्रिजटा जटाऽभूत्।।

तदिदमतिचमत्कारि चम्पूकाव्यम्।

चम्पूरामायणस्य प्रणेता भोजः परमारवंशीयः क्षत्रिय आसीत्। अस्मिन् वंशे सर्वप्रथमः उपेन्द्रनामको राजा बभूव, यस्य कालः ८०० ईस्वीतः ८३५ ईस्वीं यावदासीत्। अयं मालवाप्रदेशस्य शासक आसीत्। स्ववंशस्य प्रशंसायां सरस्वतीकण्ठाभरणनामके ग्रन्थे भोजराजः स्वयमेव लिखति -

वासिष्ठैः सुकृतोद्भवोऽध्वरशतैरस्त्यग्निकुण्डोद्भवो
भूपालः परमार इत्यधिपतिः सप्ताब्धिकाञ्चेर्भुवः।
अद्याप्यद्भुतहर्षगद्गदगिरो गायन्ति यस्योद्भटं
विश्वामित्रजयोर्जितस्य भुजयोर्विस्फूर्जितं गुर्जराः।। इति।

क्षत्रियाणां चत्वारो भेदाः सन्ति - परमारः, प्रतिहारः, चालूक्यः, चाहमानश्च। इमे चत्वारः स्ववंशम् अग्नेरुद्भूतं स्वीकुर्वन्ति। अस्मिन् परमारवंशे एव भोजः स्वजनिं लेभे। राज्ञो भोजस्य कालः १०१९ ई. स्वीक्रियते।

भोजस्य तृतीयं ताम्रपत्रं 'एपिग्राफिया इण्डिका' निबन्धे च प्रकाशितं निम्नं वर्तते -

'श्रीमतो भोजदेवस्य ताम्रपत्रम् -

ओं जयति व्योमकेशोऽसौ यः सर्गाय विभर्ति ताम्।<br>
ऐन्दवीं शिरसा लेखां जगद्बीजाङ्कुराकृतिम्।।

तन्वन्तु वः स्मराराते: कल्याणमनिशं जटाः।<br>
कल्पान्तसमयोद्दामतटिद्विलयपिङ्गलाः।।

परमभट्टारकमहाराजाधिराजपरमेश्वरश्रीसीयकदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरश्रीवाक्पतिराजदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरश्री-सिन्धुराजदेपादानुध्यातपरमभट्टारकमहाराजाधीराजपरमेश्वरश्रीभोजदेवः कुशलीस्थली-मण्डलेघाघ्रदोरभोगान्तःपातिवटपद्रके समुपगतान् समस्तराजपुरुषान् ब्राह्मणोत्तरान् प्रति-निवासिजपदादींश्च समादिशत्यस्तु वः संविदितं यथाऽस्माभिः कोङ्कणविजयपर्वणि स्नात्वा चराचरगुरुं भगवन्तं भवानीपतिं समभ्यर्च्य संसारस्यासारतां दृष्ट्वा -

वाताभ्रविभ्रममिदं वसुधाधिपत्य-<br>
मापातमात्रमधुरो विषयोपभोगः।<br>
प्राणास्तृणाग्रजलबिन्दुसमा नराणां<br>
धर्मः सखा परमहो परलोकयाने।।

भ्रमत्संसारचक्राग्रधाराधारामिमां श्रियम्।<br>
प्राप्य ये न ददुस्तेषां पश्चात्तापः परं फलम्।।

इति जगतो विनश्वरं स्वरूपमाकलय्य लिखितग्रामात् भूनिवर्तनशतैकानि १०० स्वसीमातृणगोचरयूतिपर्यन्तं हिरण्यादायसमेतं सभागभोगं सपरिकरं सर्वादायसमेतं ब्राह्मणभाईलाय वामनसुताय वसिष्ठसगोत्राय वाजिमाध्यन्दिनशाखायैकप्रवणाय छिच्छा-स्थानविनिर्गतपूर्वजाया मातापित्रोरात्मनश्च पुण्ययशोऽभिवृद्धये अदृष्टफलमङ्गीकृत्य चन्द्रार्कार्णवक्षितिसमकालं यावत्परया भक्त्या शासनेनोदकपूर्वं प्रतिपादनमिति मत्वा तन्निवासिजनपदैर्यथादीयमानभागभोगकरहिरण्यादिकमाज्ञावणविधये भूत्वा सर्वमस्मै समुपनेतव्यमिति। सामान्यं चैतत्पुण्यफलं बुद्ध्वा अस्मद्वंशजैरन्यैरपि भाविभोक्तृभिरस्म-त्प्रदत्तधर्मादायोऽयमनुमन्तव्यः पालनीयश्च। उक्तं च -

बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः।<br>
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्।।

यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि।
निर्माल्यवान्तप्रतिमानि तानि को नाम साधुः पुनराददीत॥

अस्मत्कुलक्रममुदारमुदाहरद्भिरन्यैश्च दानमिदमभ्यनुमोदनीयम्।
लक्ष्म्यास्तडित्सलिलबुद्बुदचञ्चलाया दानं फलं परयशः परिपालनं च॥

सर्वानेतान् भाविनः पार्थिवेन्द्रान् भूयो भूयो याचते रामभद्रः।
सामान्योऽयं धर्मसेतुर्नराणां काले काले पालनीयो भवद्भिः॥

इति कमलदलाम्बुबिन्दुलोलां श्रियमनुचिन्त्य मनुष्यजीवितञ्च।
सकलमिदमुदाहृतञ्च बुद्ध्वा नहि पुरुषैः परकीर्तयो विलोप्याः॥

सं १०७६ माधशुदि ५ स्वयमाज्ञामङ्गलं महाश्रीः स्वहस्तोऽयं श्रीभोजदेवस्य॥ इति।

भोजराजप्रणीताः ग्रन्थाः निम्नाङ्किता एकविंशतिसंख्याकाः सन्ति -

| | ग्रन्थनामानि | विषयः |
|---|---|---|
| १. | आदित्यप्रतापसिद्धान्तः। | ज्योतिषम्। |
| २. | राजमार्ताण्डः। | ज्योतिषम्। |
| ३. | राजमृगाङ्कः। | ज्योतिषम्। |
| ४. | विद्वज्जनवल्लभः। | ज्योतिषम्। |
| ५. | आयुर्वेदसर्वस्वम्। | वैद्यकम्। |
| ६. | विश्रान्तविद्याविनोदः। | वैद्यकम्। |
| ७. | चाणक्यनीतिः। | नीतिशास्त्रम्। |
| ८. | नामतालिका। | कोषः। |
| ९. | तत्त्वप्रकाशः। | शैवदर्शनम्। |
| १०. | शिवतत्त्वरत्नमालिका। | शैवदर्शनम्। |
| ११. | युक्तिकल्पतरूः। | शैवदर्शनम्। |
| १२. | सिद्धान्तसङ्ग्रहः। | शैवदर्शनम्। |
| १३. | राजमार्त्तण्डः। | पातञ्जलयोगसूत्रव्याख्या। |
| १४. | व्यवहारसमुच्चयः। | धर्मशास्त्रः। |
| १५. | चारुचर्या। | धर्मशास्त्रः। |

| | |
|---|---|
| १६. शालिहोत्रम्। | अश्ववैद्यकम्। |
| १७. शब्दानुशासनम्। | व्याकरणम्। |
| १८. समराङ्गणसूत्रधारः। | शिल्पशास्त्रम्। |
| १९. सुभाषितप्रबन्धः। | सुभाषितम्। |
| २०. सरस्वतीकण्ठाभरणम्। | अलङ्कारशास्त्रम्। |
| २१. चम्पूरामायणम्। | चम्पूकाव्यम्। |

चम्पूरामायणस्य बालकाण्डस्य सारांशः।

चम्पूरामायणाभिधं काव्यमिदं कविसार्वभौमेन भोजराजेन कृतं वर्तते। अस्मिन् काव्ये कविः वाल्मीकिवर्णितामेव रामकथां नवीनया चम्पूकाव्यस्य शैल्या वर्णयति। नूनम् अस्मिन् काव्ये कविः कवित्वस्य प्राधान्यमदात्।

देवर्षिः नारदः प्रश्रितं वाल्मीकिमहर्षिं मूलरामायणस्य माध्यमेन श्रीरामकथां श्रावयामास। श्रुत्वा तां कथा मुनिः मध्याह्निक्रियां निवर्तयितुं शिष्येण याज्ञवल्क्येन महर्षिणा साकं पुण्यसलिलायाः तमसायाः नद्यास्तीरे समागात्। तत्र क्रौञ्चमिथुनस्यैकं व्याधेन हतं, अपरं च करुणं विलपन्तं विलोक्य कारुण्यविगलितस्य मुनेर्मुखात् सहसा निम्नाङ्किता सरस्वती निस्सृताऽभूत् -

मा निषाद प्रतिष्ठां त्वमगमः शाश्वती समाः।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम्।। इति।

ततः माध्यन्दिनं कृत्यं समाप्य यदा महर्षिः स्वाश्रमं जगाम तदा तत्र सर्वलोकपितामहो ब्रह्मा आविर्बभूव। तमाविर्भूतं विलोक्य वाल्मीकिः परमेण हर्षेण तं विधिवदभ्यर्चितवान्। तदा ब्रह्मा तं रामचरितं श्रीरामायणस्य माध्यमेन वर्णयितुमादिशत्। ब्रह्मण आज्ञां प्राप्य वाल्मीकिः श्रीरामचरितस्य प्रत्यक्षमिव साक्षात्कारं कृत्वा श्रीरामायणाख्यं काव्यं निर्मितवान्। अस्य रामचरितस्य धारणं कः करिष्यतीति चिन्तिते जाते महर्षौ -

उपगतौ मिलितपरस्परोपमौ बहुश्रुतौ श्रुतिमधुरस्वरान्वितौ।
विचक्षणौ विविधनरेन्द्रलक्षणौ कुशीलवौ कुशलवनामधारिणौ।।

तौ मुनिः रामायणं पाठयामास। तौ रामचरितं गायमानौ विलोक्य श्रीरामः स्वभवनमानीय रामचरितं गातुमन्वयुङ्क्त। तौ कुमारौ रामचरितं गातुमुपाक्रमेताम्।

राज्ञा दशरथेन निवासिता अयोध्या नाम नगरी रघूणाम्। यदा अनपत्यदोषकषायितमनां राजा दशरथो बभूव तथा तस्य मन्त्रिष्वन्यतमो सुमन्तः श्रावयामास यत् - आचार्येण सनत्कुमारेण पूर्वमेवोदीरितं यत् ऋष्यश्रृङ्गस्य प्रसादेन दशरथस्य कुमाराः भविष्यन्तीति। तच्छ्रुत्वा शान्तमनाः राजा शान्ताकुटुम्बिनं

ऋष्यशृङ्गं कृत्वा सनय्वास्तटे अश्वमेधयागे पुत्रीयामिष्टिं विधिवदकार्षीत्। तस्मिन्नेव काले रावणस्यात्याचारेण विषण्णाः सर्वे देवाः भगवतो नारायणस्य स्तुतिं चक्रुः। क्षीराम्बुधौ तेषां समक्षमाविष्कृतदिव्यदेहो भगवान् तान् देवान् स्वाभयप्रदानया वाण्यानुग्राह्. तिरोबभूव। भगवतो नारायणस्याभिप्रायविशेषं ज्ञात्वा ब्रह्मा देवान् प्राह यत् - भवन्तः भगवन्तुं सेवितुम् अप्सरस्सु कप्यादिरूपेण पृथिव्यामवतरन्तु। पुरैव किल मम जृम्भारम्भे सम्भूतवाञ्जाम्बवानिति। ततस्ते समे देवाः तथैवाकुर्वन्।

अथ तस्या पुत्रेष्ट्यां सहेमपात्रं कुण्डान्निःसृतोऽग्निः राज्ञे दशरथायामृतं पायसमदात्। प्रीतमनाः राजा पायसस्यार्धं कौसल्यायै अर्धं च केकयनन्दिन्यै प्रादात्। तौ च राज्ञोऽभिप्रायं ज्ञात्वा स्वांशस्यार्धमर्धं सुमित्रायै प्रादाताम्। पुनः अन्तर्वत्न्यः ताः तिस्रो दशरथपत्न्यः सञ्जाताः ततः -

उच्चस्थे ग्रहपञ्चके सुरगुरौ सेन्दौ नवम्यां तिथौ  
लग्ने कर्किटके पुनर्वसुयुते मेषं गते पूषणि।  
निर्दग्धुं निखिलाः पलाशसमिधो मेध्यादयोऽध्यारणे-  
राविर्भूतमभूतपूर्वमपरं यत्किञ्चिदेकं महः।।

राममनु तदनुजाः भरतलक्ष्मणशत्रुघ्नाः दशरथतनयाः सञ्जाताः। एतेषु चतुर्षु दशरथस्याज्ञायां वर्द्धमानेषु कदाचिन्महर्षिः विश्वामित्रः दशरथसभायामागत्य राक्षसानां नियमविघ्नकराणां निहन्तुं रामं ययाचे। यदा राजा नैच्छत् रामं दातुं तदा भगवान् वसिष्ठः प्राह तम् -

पर्याप्तभाग्याय भवानमुष्मै कुर्यात् सपर्यां कुशिकात्मजाय।

निर्यातुधानां वशुधां विधातुं निर्यातु रामः सह लक्ष्मणेन।।

रामलक्ष्मणौ साकं नयन् महर्षिः विश्वामित्रः मध्येमार्गं ताभ्यां बलातिबले विद्ये प्रादात्। पुनः सः ताटकावनमागत्य, तस्याः राक्षस्याः मारीचमातुः गर्हितं चरित्रं श्रावयित्वा तां हन्तुं राममादिदेश। रामस्य धनुषो रवेण तत्र सहसा समागतां भीरुजनभयङ्करीं ताटकां जघान श्रीरामः। ताटकावधेन प्रसन्नो मुनिः रामाय सकलान् मन्त्रमूर्तीनस्त्रग्रामान् प्रायच्छत्। पुनः सिद्धाश्रमं प्रविश्य श्रीरामं रक्षकत्वेन नियुज्य मुनिर्विश्वामित्रः सत्रमारभत्। सर्वविघ्नकारिषु राक्षसेषु श्रीरामः सुबाहुं हत्त्वा मारीचं समुद्रमध्ये प्राक्षिपत्।

यज्ञे समाप्ते वीरलक्ष्म्या समलङ्कृते श्रीरामे महर्षिः विश्वामित्रः श्रीरामलक्ष्मणाभ्यां साकं मिथिलीपुरीमगात्। तत्र श्रीरामः ऐशं धनुः भङ्क्त्वा सीतामुपयेमे। लक्ष्मणस्य विवाहः ऊर्मिलया साकमभूत्। पुनः -

ततो भरतशत्रुघ्नौ कुशध्वजनियोगतः।  
माण्डवीश्रुतकीर्तिभ्यामभूतां गृहमेधिनौ।।

अथ राजा दशरथः यदा चतुर्भिः स्वतनयैः चतसृभिः वधूभिश्च साकम् अयोध्यां प्रति निवर्तमानः आसीत् तदा मध्येमार्दं भयानकाकृतिं क्रुद्धं परशुरामं महर्षिं ददर्श। विश्वामित्रस्याज्ञया राजा दशरथः

तस्य सविधिं सपर्यामकरोत्। तदनन्तरं भार्गवः श्रीराम-मवोचत् -

अवजिगमिषुरासं जीर्णचापात्तकीर्ते-
रविदितपरशोस्ते दोर्मदं कार्मुकेऽस्मिन्।।

तच्छ्रुत्वा श्रीरामः परशुरामधनुरादाय तत् सज्यं सबाणं कृत्वाऽपि श्रीपरशुरामं तपस्विनं मत्त्वा, तस्य प्राणेषु दयमानमनाः युद्धाद्विरराम। पुनः राजा दशरथः स्वराजधानीं प्राविशत् सकुशलम्। तत्र

लज्जावशादविशदस्मरविक्रियाभि-
स्ताभिर्वधूभिरतिवेलमवाप्तसौख्यान्।
इक्ष्वाकुनाथतनयान् प्रथमो रसानां
तारुण्ययोगचतुरश्चतुरः सिषेवे।। इति।

चम्पूरामायणस्य बालकाण्डानुसारेण क्षीरसागरे देवैर्दृष्टस्य भगवतो विष्णोः वर्णनम्।

रावणकृतात्याचारसन्तप्ता देवाः भगवन्तं नारायणं स्तोतुं क्षीरसागरे गत्वा शार्ङ्ग-धनुर्धारिणम्, सर्वेषां जगति जनिमतां जीवानां सन्तापापहारकारिणम्, अतसीगुच्छसच्छाय-दिव्यशरीरधरम्, सर्वेषां मुनिजनानां प्रधानसंरक्षकम्, कारुण्यजलपरिपूर्णकालमेघप्रख्यं भगवन्तं विष्णुं ददृशुः। तथा चाह चम्पूरामायणकारो भोजराजः -

सन्तापघ्नं सकलजगतां शार्ङ्गचापाभिरामम्,
लक्ष्मीविद्युल्लसितमतसीगुच्छसच्छायकायम्।
वैकुण्ठाख्यं मुनिजनमनश्चातकानां शरण्यम्,
कारुण्यापं त्रिदशपरिषत्कालमेघं ददर्श।। इति।

तदात्वे भगवानाकलितयोगनिद्र आसीत्। भगवतो योगनिद्राया विषये दुर्गासप्तशत्यामप्यभिहितम् -

योगनिद्रां यदा विष्णुर्जगत्येकार्णवे कृते।
आस्तीर्यशेषमभजत् कल्पान्ते भगवान् प्रभुः।। इति।

भगवान् विष्णुः शेषशय्यायां कृतशयन आसीत्। भगवतः शरीरकान्त्या समलङ्कृतः क्षीरसागरस्यान्तर्भागः विकसितस्य कुवलयदलस्य शोभामभजत। तथा चाह चम्पूरामा-यणकारः -

क्षीराम्भोधेर्जठरमभितो देहभासां प्ररोहैः,
कालोन्मीलत्कुवलयदलद्वैतमापादयन्तम्।
आतन्वानं भुजगशयने कामपि क्षौमगौरे,
निद्रामुद्रां निखिलजगतीरक्षणे जागरूकम्।। इति।

स एव भगवान् वात्सल्यं नैजं प्रकाशयितुं नरसिंहरूपेणावतरत्। भोजराजानुसारेण स भगवान् विष्णुः समकालमेव प्रह्लादस्यापरिमितं कष्टम्, दैत्यानामपरिमितं गर्वं स्तम्भं हिरण्यकशिपोर्वक्षःस्थलं च विदारयितुं नृसिंहरूपेणावतरत्। तथाहि -

प्रह्लादस्य व्यसनमभितं दैत्यवर्गस्य दम्भं,
स्तम्भं वक्षःस्थलमपि रिपोर्यौगपद्येन भेत्तुम्।
बद्धश्रद्धं पुरुषवपुषा मिश्रिते विश्वदृष्टे
दंष्ट्रारोचिविशदभुवने रंहसा सिंहवेषे।। इति।

श्रीमद्भागवतकारानुसारेण तु भगवान् -

भक्तप्रतिज्ञापरिपालनाय, सर्वात्मना व्याप्तिविवर्तनाय।
दैत्येन्द्रवक्षोदलनाय विष्णुः स्तम्भान्नृसिंहाकृतिराविरासीत्।।

इत्थम्भूतं भगवन्तं विलोक्य देवाः तं प्रार्थयामासुः -

नारायणाय नलिनायतलोचनाय
नामावशेषितमहाबलिवैभवाय।
नानाचराचरविधायकजन्मदेश
नाभीपुटाय पुरुषाय नमः परस्मै।। इति।

चम्पूरामायणस्य बालकाण्डमाश्रित्य दैवैः वर्णितं रावणस्यैश्वर्यमत्याचारं च।

यदा देवाः रावणास्यात्याचारेण सन्त्रस्ताः क्षीराब्धौ गत्वा भगवन्तं प्रार्थयामासुस्तदा भगवता विष्णुना पृष्टास्ते देवाः स्वदुःखस्य कारणं रक्षोऽधिपतेः अत्याचारं वर्णयामासुः। ते कथितवन्तो यत् -

अस्ति विविधसम्पत्सम्पन्ना रक्षोऽधिपतेः रावणस्य राजधानी समुद्रेण शतयोजनविस्तरेण परिगता लङ्का नाम स्वर्णमयी। यस्याः अट्टालिकानां स्वर्गनिर्मितानां प्रकाशेन त्रैलोक्यस्य प्रकाशकः मरीचिमाल्यपि दीपवदाभाति। तद्यथा -

अस्ति प्रशस्तिविभवैर्विबुधैरलङ्घ्या
लङ्केति नाम रजनीचरराजधानी।
माणिक्यमन्दिरभुवां महसां प्ररोहै-
स्तेजस्त्रयाय दिनदीपदशां दिशन्ती।। इति।

सोऽयं रक्षोऽधिपतिः यक्षाणां राजानां स्वप्रबलैः बाहुभिः अतिदीर्घैः विजित्य चिरादवति लङ्का नाम नगरीम्। तथा च -

एनां पुराणनगरीं नगरीतिसालां
सालाभिरामभुजनिर्जितयक्षराजः।
हेलाभिभूतजगतां रजनीचराणां
राजा चिरादवति रावणनामधेयः।। इति।

सोऽयं रक्षोऽधिपतिः हस्ते शास्त्राण्यादाय दिक्पालान् स्ववशीचकार। रावणस्य वैरी म्रियते एव,

न तु रावणं मारयितुं कश्चनापि तस्य वैरी प्रभवति। सोऽयं राजा रावणः दुश्चरं तपश्चरित्वा सर्वलोकपितामहे पितामहमाराध्य अन्यदेवैः दुरापं वरमवाप। अत एव सोऽयं रावणः सम्पूर्णं भुवनं स्वायत्तं करोति। तथा चाह भोजराजः -

अम्भोजसम्भवममुं बहुभिस्तपोभि-
राराधयन् वरमवाप परैर्दुरापम्।
तस्मादशेषभुवनं निजशासनस्य
लक्ष्यीकरोति रजनीचरचक्रवर्ती।।

इत्थम्भूतो रावणो यदा स्वान्तःपुरस्थाभिः रमणीभिः साकं स्वक्रीडापर्वतशिखरेषु सलिलं सञ्चरणं करोति तदा सहस्रभानुर्भानुरपि शङ्कते यत् राक्षसाधिपतिर्मम किरणैः कष्टं नानुभवेत्, अत एव सः तदा सङ्कुचितकिरणे भवति भीत्यतिशयेन।

अखेटं कृत्वा रावणो यदा स्वगृहाभिमुखं भवति यातुं तदा मध्येमार्गं समुपलब्धास्तस्य समेऽनुचराः अनेकधातं सश्रद्धं नमन्ति तेषां साकं प्रचलन्ति च। इत्थं सः स्वस्नानगृहमायाति सानन्दम्। तस्य स्नानगृहं सुवर्णस्तम्भेषु चन्द्रकान्तमणिनिर्मितललनाललामप्रतिमाभि-र्विराजतमप्रतिमं विराजते। तत्र चन्द्रकान्तमणिघटैः स्वयमेव समुपस्थितश्चन्द्रः रावणं स्नापयति सहस्रैः जलधारैः। तदात्वे प्रसन्नो रावणः चन्द्रमसं स्वविंशतिनेत्रैः पश्यति।

देवाङ्गनाभिः साकं रावणेन कृतमत्याचरं वर्णयन्तो देवाः प्राहुः -

'तेन पुलस्त्यनन्दनेन सङ्क्रन्दननन्दनात् स्वमन्दिरोद्यानमानीतस्य मन्दारप्रमुखस्य वृन्दारकतरुवृन्दस्य बन्दीकृतसुरसुन्दरीनयनेन्दीवरद्वन्द्वाच्च करारविन्दकलितकनककलशाच्च मन्दोष्णं स्यन्दमानैरम्बुभिर्जम्बालितालवालस्य पचेलिमानामपि कुसुमानां पतनभयमाशङ्कमानाः पवमानाः परिस्पन्दितुमपि प्रभवो न भवन्ति'। इति।

किञ्च - 'एतेऽपि पावका रूढिशङ्कावहां हुतवहाख्यां वहन्तस्तद्गृहे गार्हपत्यपुरोगाः पौरोगवधुरं दधत्ते'। इति।

देवैः पुनरभिहितं यत् - रावणेनेदं ज्ञातं यत् मानवा मम किमपि अपकर्तुमसमर्थाः अत एव तेन मानवेतरो मां हन्तुं न प्रभवेदिति ब्रह्माणं प्रति वरं याचितम्। ब्रह्मणो लब्धवरस्सः दिग्गानस्मांश्च तिरस्करोति बलोन्नद्धः सन् यतो वयं तु भवदायत्ताः स्मः। इति।

चम्पूरामायणमाश्रित्य ताटकावृत्तान्तः।

नियमविघ्नकरान् राक्षसान् निहन्तुं महर्षिः विश्वामित्रः रामलक्ष्मणौ साकमेव नयन् मलदकरूशनाम्नोर्जनपदयोः सीम्नि समागतस्सन् तौ प्रावोचत् -

'आसीत् सुकेतुनामको यक्षः कश्चित्। सः ब्रह्माणं प्रसाद्य ताटकाख्यां कामपि सुतां लेभे। सुन्दः तां परिणीय तस्यां मारीचाख्यं राक्षसं जनयामास। सुन्दे मृते मारीचः अगस्त्यमृषिमभिभृत्य तस्य शापादवाप कौणवताम्। ताटका च पुरुषादिनी बभूव।'

ब्रह्मवरदानेन हस्तिसहस्रसदृशलब्धबला स्वात्मजेन मारीचेन साकम् अस्मिन् देशे उपद्रवं विदधाति। अत एवेयं ताटका त्वया व्यापादनीया। तच्छ्रुत्वा श्रीरामः स्त्री न वधं हन्तव्या भवति। तदा महर्षिणा विश्वामित्रेण नानदृष्टान्तैः स्त्रीवधिन्यां पापशङ्कामुत्सादयामास। तथा चाह चम्पूरामायणकारः-

'किञ्च वैरोचनीं मन्थरां वसुन्धरापराधधुरन्धरां पुरन्दरेण निहतां जनार्दनकृतमर्दनां च भार्गवजननीं प्रदर्श्य दाशरथेरमन्दां सुन्दवधूवधविचिकित्सामुत्सारयामास'। इति।

महर्षेः विश्वामित्रस्योपदेशं श्रुत्वा ताटकावधाय कृतनिश्चयः श्रीरामः स्वधनुषः टङ्कार-मकरोत्। तेन च क्रुद्धा ताटकाऽतीवभयङ्कराकृतिस्तत्रोपस्थिता बभूव। तथाहि -

तत्काले पिशिताशनाशपिशुना सन्ध्येव काचिन्मुने-  
रध्वानं तरसा रुरोध रुधिरक्षोदारुणा दारुणा।  
स्वाधीने हनने पुरीं विदधती मृत्योः स्वकृत्यात्यय-  
क्रीडत्किङ्करसङ्घसङ्कटमहाशृङ्गाटका ताटका।। इति।

श्रुतताटकोपद्रवं विस्तरेण श्रीरामः तज्जिघांसया धनुषः प्रत्यञ्चायाः आकर्षणम् आ-कर्णमकरोत्। तदनन्तरं श्रीरामः ताटकायाः वधमकरोत्। तथा चाह चम्पूरामायणकारः -

ततो भाविनि सङ्ग्रामे बद्धश्रद्धस्य ताटका।  
स्वप्राणान् रामबाणस्य वीरपाणमकल्पयत्।। इति।

चम्पूरामायणमाश्रित्य भागीरथीकथा।

रामलक्ष्मणाभ्यां साकं मिथिलानगर्यै प्रस्थितो विश्वामित्रः -

आजानपावनक्षीरां वृषानन्दविधायिनीम्।  
श्रुतिप्रणयिनीं सोऽयमापगामाप गामिव।।

तत्र भागीरथीकथां श्रोतुकामाय श्रीरामाय विश्वामित्रोऽभाषत -

पुरा मनोरमा नाम सुमेरोरभवत् सुता।  
गृहमेधी तयैवासीत् चक्रवर्ती धराभृताम्।।

तस्य मनोरमा जानेः द्वे कन्येऽजायताम् - पार्वती मन्दाकिनी च। तां मन्दाकिनीं नदीं लब्ध्वा देवा स्वर्गलोकमनयत्, पार्वती च भगवता शङ्करेण साकमुद्वाहिता बभूव। तत्र मन्दाकिन्याः त्रीणि स्रोतांस्यभूवन्। तत्र गङ्गायाः अवतरणमभूत्।

सागरो नामकः कश्चनैक्ष्वाकुवंशीयो राजा बभूव। तस्य द्वे पत्न्यावभूताम् - केशिनी सुमती च। तृतीयाश्रमातीतेऽपि यदा सगरस्य पुत्रो नाऽभूत् तदा पुत्रीयन् स राजा सपत्नीकः शतं समाः तपस्तेपे। तेन प्रसन्नो महर्षिर्भृगुः पुत्रोत्पत्तिवरदानेनानुजग्राह। तत्र केशिन्यां सगरस्य तु असमञ्जनामकः पुत्रो बभूव किन्तु सुमत्यां तस्य षष्ठिसहस्रसंख्याकाः पुत्रा अभूवन्। तत्र दुष्टस्वभावमसमञ्जं राजा स्वराज्यान्निष्कासयामास। पुनः अश्यमेधयागे राजा स्वाश्वं प्रस्थापयामास तदा -

क्रव्यादवपुषा सोऽयमहारि हरिणा हयः।
ततस्तं नष्टमन्वेष्टुं सौमतेयाः प्रतस्थिरे।।

तस्याश्वमेधीयाश्वान्वेषणप्रसङ्गे पृथ्वीं नखैरवदारयन्तः सगरपुत्राः स्वनखप्रभां पातालेऽपि प्रसार्य तत्रत्यं तमो दूरीकृतवन्तः। पुनः -

त एते तपसा दीप्ते तमःस्तोमप्रमाथिनि।
कपिले ज्वलने वीराः लेभिरे शलभोपमाम्।।

ततो राजा सगरः असमञ्जसुतं स्वपौत्रञ्चांशुमन्तम् अश्वमेधीयमश्वमन्वेष्टुं प्राहिणोत् स्वयागपूर्त्यै। अंशुमानपि अश्वमन्विष्यन् पातालं गत्वा तत्र कपिलतेजसा दग्धान् स्वपितृनवलोक्य तेभ्यो जलाञ्जलिं दित्सुर्जलमन्विष्यन् तत्र चरन्तमश्वमवलोकयामासः। पुनः -

मातुलो गरुडस्तेषामेनं तत्रैवमब्रवीत्।
गङ्गामिहानयायुष्मन्नेषामेषा गतिः परा।।

अंशुमान् मुखेन स्वपुत्राणां वृत्तान्तं श्रुत्वा राजा सगरः सत्रं समाप्यपुत्रशोकाद् दिवमगात्। पुनः-

अथांशुमानयं राज्यं चिराय परिपालयन्।
दिलीपे न्यस्तभूमारस्तपस्तेपे हिमालये।।
दिलीपेऽपि दिवं याते श्रुत्वा वृत्तं भगीरथः।
अमर्त्यसरितं कर्तुं मेने मर्त्यतरङ्गिणीम्।।

पुनः गोकर्णतीर्थे तपश्चरणं कुर्वते भगीरथाय प्रसन्नो भगवान् शङ्करः गङ्गां वोढुमन्वमंस्त। ततो आकाशादवतरन्त्याः गङ्गायाः श्लोकचतुष्टयेन वर्णनमकरो-दलङ्कारिकशैल्या भोजराजश्चम्पूरामायणे। तथा च श्लोकाः -

अथ वीचीचयच्छन्नदिगन्तगगनान्तरा।
शशाङ्कशङ्खसम्भिन्नतारामौक्तिकदन्तुरा।।

तरङ्गाकृष्टमार्तण्डतुरङ्गायासितारुणा।
फेनच्छन्नस्वमातङ्गमार्गणव्यग्रवासवा।।

आविः शाखाशिखोन्नेयनन्दनद्रुमकर्षणा।
एकोदकनभोमार्गदिङ्मूढदिवसेश्वरा।।

आवर्तगर्तसम्भ्रान्तविमानप्लवविप्लवा।
नीलजीमूतशैवालकृतरेखा हरित्तटा।। इति।

इत्थम्भूता गङ्गा अवलेपभराक्रान्ता भागीरथी भगवतः शङ्करस्य जटाकान्तारगह्वरे पपात। भगवतः शङ्करस्य जटारण्यात् निर्गन्तुमक्षमा गङ्गा तथै शोभते स्म यथा दुर्वाशिखायां तुषारकणिका राजते। गङ्गास्तां दशां दृष्ट्वा भगीरथो भगवन्तं शङ्करं तुष्टाव। तेन प्रसन्नेन भगवता शङ्करेण परित्यक्ता भागीरथी सप्तधारावती सती हिमालये पपात। ततः सा विन्दसरस्यागात्। तासां सप्तधारासु तिस्रः तिस्रः प्राच्यां दिशायां तिस्रश्च प्रतीच्यां धाराः गताः। सप्तमी च धारा राजानं भगीरथमनुससार।

सैषा भागीरथी जह्नोः सत्रक्षेत्रं समावृणोत्।
तां स पीत्वा ततः शान्तो जहौ श्रोत्रेण वर्त्मना।।

तयैव भागीरथ्या राजा भगीरथः स्वपितॄणां जलक्रियां सम्पादयामास, पुनः परिपूर्णमनोरथः सः स्वराजधानीमगमत्।

चम्पूरामायणमाश्रित्य कार्तिकेयजन्मकथा।

सुमेरुपुत्री मेनाऽऽसीत्। तस्याः द्वे पुत्र्यौ आस्ताम् - गङ्गा पार्वती च। पार्वत्याः विवाहो महादेवेन शङ्करेण सहाभवत्। एकदा पार्वतीपरमेश्वरौ ग्राम्यधर्मान्वितावभूताम्। तदा दैवदैः प्रार्थितो भगवान् रतिकर्मणि बाधितो बभूव। तस्यं शुक्रं पृथिव्यामपतत्। तच्च वीर्यम् अग्निः उत्थापयामास। तथा चाह चम्पूरामायणकारः -

शिवयोर्युञ्जतोर्वीर्यं दृष्ट्वा धात्र्यां समर्पितम्।
पावकः प्रतिजग्राह दैवतैरनुनाथितः।।

देवानामिदं कार्यं दृष्ट्वा पार्वती सङ्क्रुधा बभूव। सा च तान् अनपत्यतायै पृथिवीं चानेकपुरुषभार्यात्वाय शशाप। तथा चोक्तं भोजराजेन -

अनपत्यानथामर्त्यान् बहुभार्यां च मेदिनीम्।
अकरोदम्बिकाक्रोधः पुत्रालाभसमुद्भवः।। इति।

अथ शीघ्रं सेनान्यं काङ्क्षमाणैर्देवैरभिहितो वह्निः तत्तेजः जाह्नव्यां प्राक्षिपत्।

सापि सप्तार्चिषा क्षिप्तं तेजस्तद्वोढुमक्षमा।
हिमवत्प्रान्तकान्तारे श्रान्ता शरवणे जहौ।।

तदा तत्तेजः स्तन्यं पाययितुं षट्संख्याकाः कृत्तिकास्तत्रागुः। तासां प्रीत्यै सः बालकः षड्भिः मुखैः संयुक्तो बभूव। तथा चोक्तमपि -

तत्राभूत् कृतिकाप्रीत्यै षोढारूढमुखाम्बुजम्।
तारकध्वान्तविध्वंसि सद्यः षाण्मातुरं महः।।

अयमाशयः - जाह्नव्या शरवणे क्षिप्तं तद् हरवीर्यं कार्तवीर्यात्मना प्रकटीभूतं यद्देवप्रेषितकृत्तिकानामकवनिताषट्कानुरोधेनेव षडात्मविभक्तमुक्तम्, एकेनैकेन मुखेनैकस्याः स्तनपाने सर्वासां सन्तोषसम्भवात्।

चम्पूरामायणस्य बालकाण्डे शतानन्दवर्णितं विश्वामित्रचरित्रम्।

यदा विश्वामित्रेण महर्षिणा साकं जनकनगरीमागच्छन् भगवान् रामः मध्येमार्गमहल्योद्धारं कृत्वा जनकयजनभवनमतिष्ठत् रात्रौ तदा भगवन्तं श्रीरामचन्द्रं विश्वामित्रवृत्तान्तं वर्णयामास जनकपुरोधाः शतानन्दः। तथाहि -

तिष्ठन् क्षत्रार्हवृत्तौ मुनिरगमदसावाश्रमं ब्रह्मसूनो-
रातिथ्यं तत्र लब्ध्वा निरवधि सुरभेः प्राभवादित्यवेत्य।
सा तेन प्रार्थिताऽभूत् तदनु मुनिवरे नाभ्युपेते चकर्ष,
क्रोशन्तीं तां तयैव प्रचुरबलजुषा कान्दिशीको बभूव।।

कामधेनोर्बलेनानेकधा पराजितो राजा विश्वामित्रः चकितचकितः सन् तपश्चकार सुरभेरवाप्त्यै वसिष्ठेन च साकं समरमकार्षीत्। किन्तु एकेनैव ब्रह्मदण्डेन सर्वाणि विश्वामित्रस्य दिव्यान्यस्त्राणि ब्रह्मर्षिः वसिष्ठः नाशयामास। ब्रह्मदण्डप्रभावातिशयमवलोक्य राजा विश्वामित्रः ब्रह्मर्षित्वमवाप्तुं तपश्चचार।

तदा कदाचित् क्षत्रियो राजा त्रिशङ्कुः सशरीरं स्वर्गं यातुं कामयमानः वसिष्ठेन प्रत्याख्यातो बभूव। पुनः वसिष्ठपुत्राणां सविधे याजयितुं गतः सन् तैः शप्तः चाण्डालतां गतः सन् विश्वामित्रस्य शरणं जगाम। विश्वामित्रः त्रिशङ्कुमनोरथपूर्तये क्रतुमेकं प्राक्रमत। तस्मिन् यागे सर्वे ब्राह्मणास्त्वगुः किन्तु वसिष्ठपुत्राः नागच्छन्। विश्वामित्रः तान् शप्त्वा श्वभक्षकानकरोत्। पुनः देवता अपि तस्मिन् यागे स्वभागान् ग्रहीतुं नागच्छन्। ततः -

अयं महात्मा तपसः प्रभावादारोपयामास दिवं त्रिशङ्कुम्।
नीलाम्बरं निह्नुतराजवेषं वर्षानिशीथादविशेषवेषम्।। इति।

त्रिशङ्कोः अयाज्ययाजनेनानधिकृतस्वर्गप्रवेशेणाप्रसन्नः इन्द्रः स्वर्गात् त्रिशङ्कुं पातयामास। पुनः विश्वामित्रेणादिष्टः त्रिशङ्कुः आकाश एवातिष्ठत्। विश्वामित्रश्च त्रिशङ्कवे अपरस्य स्वर्गस्य निर्माणं प्रारब्धवान्। पुनः देवैः प्रार्थितः सः तस्मात् कर्मणो विरराम। तत्र स्वतपसि जायमानं विघ्नं विलोक्य विश्वामित्रः पुष्करक्षेत्रे तपश्चरणमारभत। तत्राम्बरीषयज्ञे पशौ विनष्टे नरबलिरपेक्षितो बभूव। अम्बरीषः शतगोभ्यः ऋचीकस्य मध्यमपुत्रं शुनःशेपं क्रीतवान्। प्राणसङ्कटापन्नः शुनःशेपः विश्वामित्रस्य शरणं ययौ। विश्वामित्रः स्वपुत्रं दत्त्वा शुनःशेपस्य रक्षां कर्तुमुद्यतो बभूव, किन्तु तस्य हविष्यन्दादिकाः पुत्रा एतदर्थम् उद्यता नाभुवन्। तेन क्रुद्धो विश्वामित्रः तेषां चाण्डालत्वाय शप्तवान्। पुनः द्वाभ्यां गाथाभ्याम् इन्द्रोपेन्द्रौ तोषयित्वा शुनशेपाम्बरीषयोः रक्षां व्यधात्।

ततस्तपस्यन्तमेनं मेनकासङ्गतः तपोभङ्गः चिरमङ्गीचकार। पश्चात् तापाभिभूतोऽयमुत्तरे भूभृति कौशिकीतीरे घोरं तपश्चचार।

तत्रापि विश्वामित्रं तपश्च्युतं कर्तुं रम्भां प्रेषयामास इन्द्रः। विश्वामित्रस्तां शैलीं भवितुं शप्तवान्। पुनः पूर्वस्यामाशायां गत्वा निरुच्छ्वसन् तपश्चकार। विश्वामित्रस्य तेजसा देवा अपि उद्विग्ना अभूवन्। ततो ब्रह्मा तस्य सविधे आगत्य कथितवान् यत् भवान् ब्रह्मर्षिः वसिष्ठोऽपि त्वां ब्रह्मर्षिशब्देन अभिधास्यति।

असौ वसिष्ठनिर्देशाद् ब्रह्मर्षित्वमविन्दत।
यथोपनयसंस्काराद् द्विजन्मा ब्रह्मवर्चसम्।।

*****

चम्पूरामायणम्।

बालकाण्डम्।

लक्ष्मीं तनोतु नितरामितरानपेक्ष-
मङ्घ्रिद्वयं निगमशाखिशिखाप्रवालम्।
हैरम्बमम्बुरुहडम्बरचौर्यनिघ्नं
विघ्नाद्रिभेदशतधारधुरन्धरं नः।। १।।

उच्चैर्गतिर्जगति सिद्ध्यति धर्मतश्चे-
त्तस्य प्रमा च वचनैः कृतकेतरैश्चेत्।
तेषां प्रकाशनदशा च महीसुरैश्चे-
त्तानन्तरेण निपतेत् क्व नु मत्प्रणामः।। २।।

गद्यानुबन्धरसमिश्रितपद्यसूक्ति-
र्हृद्या हि वाद्यकलया कलितेव गीतिः।
तस्माद्दधातु कविमार्गजुषां सुखाय
चम्पूप्रबन्धरचनां रसना मदीया।। ३।।

वाल्मीकिगीतरघुपुंगवकीर्तिलेशै-
स्तृप्तिं करोमि कथमप्यधुना बुधानाम्।
गङ्गाजलैर्भुवि भगीरथयत्नलब्धैः
किं तर्पणं न विदधाति नरःपितॄणाम्।। ४।।

वाचं निशम्य भगवान् स तु नारदस्य
प्राचेतसः प्रवचसां प्रथमः कवीनाम्।
माध्यन्दिनाय नियमाय महर्षिसेव्यां
पुण्यामवाप तमसां तमसां निहन्त्रीम्।। ५।।

तत्र कंचन क्रौञ्चमिथुनादेकं पञ्चशरविद्धमपि व्याधेनानुविद्धं निध्यायते बद्धानुकम्पस्य भगवतो वाल्मीकेर्वदनारविन्दाच्छन्दोमयी काचिदेवं निःससार सरस्वती।

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्।। ६।।

तदनु समयोचितकृत्यं निर्वर्त्य स्वाश्रमं प्रति गतमति भगवति वाल्मीकौ।

वाणीविलासमपरत्र कृतोपलम्भ-
मम्भोजभूरसहमान इवाविरासीत्।
आभाति यत्कृतिरनेकविधप्रपञ्च-
व्याजेन्द्रजालविधिसाधकपिच्छिकेव।। ७।।

ततः परमहर्षेण महर्षिणा विधिवदभ्यर्चितः परमेष्ठी मध्यलोकेऽपि स्ववृत्तं प्रकाशयितुं किल भवन्तमेवोपतिष्ठमानयानया भारत्या रामचरितं यथाश्रुतं व्याक्रियतामिति व्याहृत्यान्तरधात्।

अथ सरसिजयोनेराज्ञया रामवृत्तं
करबदरसमानं प्रेक्ष्य दृष्ट्या प्रतीच्या।
शुभमतनुत काव्यं स्वादु रामायणाख्यं
मधुमयभणितीनां मार्गदर्शी महर्षिः।। ८।।

एनं प्रबन्धं प्रयोक्तुं कः समर्थ इति चिन्तामुपगतवति सति भगवति वाल्मीकौ।

उपगतौ मिलितपरस्परोपमौ
बहुश्रुतौ श्रुतिमधुरस्वरान्वितौ।
विचक्षणौ विविधनरेन्द्रलक्षणौ
कुशीलवौ कुशलवनामधारिणौ।। ९।।

एतौ मुनिः परिगृह्य स्वां कृतिमपाठयत्।

तौ पुनरितस्ततो गायमानौ दृष्ट्वा रामः प्रहृष्टमनाः स्वभवनमानीय भ्रातृभिः परिवृत्तो निजचरितं गातुमन्वयुङ्क्त।

छन्दोमयीनां निलयस्य वाचामन्ते वसन्तौ मुनिपुङ्गवस्य।
एतौ कुमारौ रघुवीरवृत्तं यथाक्रमं गातुमुपाक्रमेताम्।। १०।।

अस्ति प्रशस्ता जनलोचनानामानन्दसन्दायिषु कोसलेषु।
आज्ञासमुत्सारितदानवानां राज्ञामयोध्येति पुरी रघूणाम्।। ११।

तामावसद्दशरथः सुरवन्दितेन
सक्रन्दनेन विहितासनसंविभागः।
वृन्दारकारिविजये सुरलोकलब्ध-
मन्दारमाल्यमधुवासितवासभूमिः।। १२।।

अथस्मिन्ननपत्यतया दूयमानमानसे पुत्रार्थं क्रतुमश्वमेधं विधातुं मन्त्रिभिः समं मन्त्रयमाणे दशरथे सुमन्त्रः प्रहृष्टमना महर्षेरङ्गदेश सङ्गतावग्रहनिग्रहशौण्डस्य विभाण्डकसूनोरवश्यमृष्यशृंगस्य प्रसादात्प्रभवो

भविता कुमाराणामिति सनत्कुमारोदीरितं पुरावृत्तमस्मै दशरथाय कथयामास।

सोऽपि सुमन्त्रवचनाच्छान्ताधिः शान्ताकुटुम्बिनं सम्बन्धिनं मुनिमानीय वसिष्ठादिष्टमश्वमेधाध्वरं सरयूरोधसि विधाय तत्र पुत्रीयमिष्टिं विधिवत्कर्तुमारभत!

तदनु हविराहरणाय धरणौ कृतावतरणाः सर्वे गीर्वाणगणाः शतमखप्रमुखाश्चतुर्मुखाय दशमुखप्रतापग्रीष्मोष्मसंप्लोषणमावेद्य तेन सह शरणमिति शाङ्र्गधन्वानं मन्वाना नानाविधप्रस्तुतस्तुतयः क्षीराम्बुराशिमासेदुः।

सन्तापघ्नं सकलजगतां शाङ्र्गचापाभिरामं
लक्ष्मीविद्युल्लसितमतसीगुच्छसच्छायकायम्।
वौकुण्ठाख्यं मुनिजनमनश्चातकानां शरण्यं
कारुण्याप त्रिदशपरिषत्कालमेघं ददर्श।। १३ ।।

क्षीराम्बोधेर्जठरमभितो देहभासा प्ररोहैः
कालोन्मीलत्कुवलयदलाद्धैतमापादयन्तम्।
आतन्वानं भुजगशयने कामपि क्षौमगौरे
निद्रामुद्रांनिखिलजगतीरक्षणे जागरूकाम्।। १४ ।।
प्रह्लादस्य व्यसनममितं दैत्यवर्गस्य दम्भं
स्तम्भं वक्षःस्थलमपि रिपोर्यौगपद्येन भेत्तुम्।
बद्धश्रद्धं पुरुषवपुषा मिश्रिते विश्वदृष्टे
दंष्ट्रारोचिर्विशदभुवने रंहसा सिंहवेषे।। १५ ।।

नारायणाय नलिनायतलोचनाय
नामावशेषितमहाबलिवैभवाय।
नानाचराचरविधायकजन्मदेश-
नाभीपुटाय पुरुषाय नामः परस्मै।। १६ ।।

इति प्रणम्योत्थितानेतान् स्तुतिरवमुखरितहरिन्मुखान् हरिहयप्रमुखानखिलान् मरानरुणारुणतामरसविलासचोरैर्लोचनमरीचिसन्तानैरान्दयन्नरविन्दलोचनः स्फुटमभाषत।

अपि कुशलममर्त्याः स्वागतं सांप्रतं वः
शमितदनुजदम्भा किं नु दम्भोलिकेलिः।
अपि धिषणमनीषानिर्मिता नीतिमार्गा-
स्त्रिदशनगरयोगक्षेमकृत्ये क्षमन्ते।। १७ ।।

एवं भगवतःकुशलानुयोगपुरस्सरीममृतासारसरसा सरस्वतीमाकर्ण्य सम्पूर्णमनोरथानां सुमनसां संसत् पुंसे परस्मै विज्ञापयामास।

देव, कथमकुशलमाविर्भवेद्भवता कृतावलम्बानामस्माकम्। किन्तु

अस्ति प्रशस्तविभवैर्विबुधैरलङ्घ्या
लङ्केति नाम रजनीचरराजधानी।
माणिक्यमन्दिरभुवां महसां प्ररोहै-
स्तेजस्त्रयाय दिनदीपदशा दिशन्ती।। १८।।

एनां पुराणनगरीं नगरीतिसालां
सालाभिरामभुजनिर्जितयक्षराजः।
हेलाभिभूतजगतां रजनीचराणां
राजा चिरादवति रावणनामधेयः।। १९।।

यद्बाहुराहुरसनायितशस्त्रधारा
दिक्पालकीर्तिमयचन्द्रमसं ग्रसन्ति।
यद्वैरिणां रणमुखे शरणप्रदायी
नैवास्ति कश्चिदमुमन्तकमन्तरेण।। २०।।

अम्भोजसम्भवममुं बहुभिस्तपोभि-
राराधयन् वरमवाप परैर्दुरापम्।
तस्मादशेषभुवनं निजशासनस्य
लक्षीकरोति रजनीचरचक्रवर्ती।। २१।।

तेन वयं पराधीना इव भवामः।

तथा हि। सोऽयं कदाचित्क्रीडाधराधरमारुह्य सावरोधवधूजनश्चरणाभ्यां सञ्चरेत चेदागमिष्यत्याग इत्यनाविष्कृतातपो भयेन भगवान्सहस्रभानुरपि सङ्कुचितभानुरेव तत्सानूनि नूनं संश्रयते।

एष मृगाङ्कोऽपि मृगयायासपरिश्रान्तिविश्रान्त्यै ससंभ्रमं नमज्जनपरिवृत्ते मज्जनगृहाभिमुखे दशमुखे तत्रत्यविचित्रतर शातकुम्भस्तम्भाग्रप्रत्यग्रप्रत्युप्तास्फटिक-शिलाशालभञ्जिकापुञ्चकरतलकलितनिजोपलमयकलशमुखादच्छाच्छामविच्छिन्नधारा-मम्बुधारां निजकराभिमर्शादापादयंस्तस्य प्रसादपिशुनानां सुनासीरचिरकाङ्क्षितानां विंशतिविधवीक्षणानां क्षणमात्रं पात्रं भवति।

तेन पुलस्त्यनन्दनेन सङ्क्रन्दननन्दनात्स्वमन्दिरोद्यानमानीतस्य मन्दारप्रमुखस्य वृन्दारकतरुवृन्दस्य बन्दीकृतसुरसुन्दरीनयनेन्दीवरद्वन्द्वाच्च करारविन्दकलितकनककलशाच्च मन्दोष्णं स्यन्दमानैरम्बुभिर्जम्बालितालवालस्य प्रचेलिमानामपि कुसुमानां पतनभयमाशङ्कमानाः पवमानाः परिस्पन्दितुमपि प्रभवो न भवन्ति।

एतेऽपि पावका रूढिशङ्कावहां हुतवहाख्यां वहन्तस्तद्गेहे गार्हपत्यपुरोगाः पौरोगवधुरं दधते।

किं बहुना।

स एष मानुषादवमाननमागमिष्यतीत्यमन्वानस्तदितरैरवध्यत्वं चतुराननवराल्लब्ध्वा समुद्धतः सम्प्रति सम्प्रहारसमाक्रान्तदिगन्तदन्तावलदन्तकुन्तव्रणकिणस्थपुटितवक्षःस्थलः स्थलकमलिनीं वनावरण

इव रावणस्त्रिलोकीमभिभवन्भवदीयानित्यस्मान्न जातु किञ्चिदपि जानातीति।

अथ भगवानाकर्ण्य गीर्वाणगणवाणीम्।

इन्द्रनीलाचलोदञ्चच्चन्द्रिकाधवलस्मितः।
वाचमूचे सुधाधारां मधुरां मधुसूदनः।। २२।।

भवतामपराधविधायिनस्तस्य यातुधानस्य निधनमधुनैव विधातुं शक्यम्।

किन्तु सरसिजासनशासनमप्यमोघीकुर्वन्नुर्वीतले पुत्रीयतः सुत्राममित्रस्य दशरथस्य मनोरथमपि पूरयितुमादतमानुषवेषः सन्नहमेव तं हनिष्यामीति व्याहृत्यान्तरधात्।

ततःसा परिषदनिमिषाणामुन्मिषितहर्षा हृषीकेशादेशात्प्रशमितदुर्दशानि निदर्शननानि चतुर्दशभुवनानि बुद्ध्वा दुग्धसागरान्निरगात्।

ततस्तानमरान् प्राह स्म पितामहः।

भवन्तस्तावदवतरिष्यतो लक्ष्मीसहायस्य साहाय्यार्थमप्सरःप्रभृतिषु युवतिषु वानराच्छभल्लगोपुच्छनीलमुखवेषभृतः प्रथितप्रभावाः प्रजाः प्रजनयेयुरिति।

पुरैव किल मम जृम्भारम्भे सम्भूतवाञ्चाम्बवानिति।

ततस्ते गीर्वाणास्तथाकुर्वन्।

अथ वैतानाद्वैश्वानरान्नरःप्राजापत्यः सहेमपात्रः कश्चिदुत्थाय पुत्रीयते दशरथाय पायसममृतप्रायं प्रायच्छत्। ततः -

कौसल्यायै प्रथममदिशद्भूपतिः पायसार्धं
प्रादादर्धं प्रणयमधुरं केकयेन्द्रस्य पुत्र्यै।
एते देव्यौ तरलमनसः पत्युरालोच्य भावं
स्वार्धाशाभ्यां स्वयमकुरुतां पूर्णकामां सुमित्राम्।। २३।।

अवभृथेऽवसिते सरयूतटादथ यथायथमुच्चलिते जने।
दशरथ परिपूर्णमनोरथः पुरमगात्पुरुहूतपुरोपमाम्।। २४।।

अपाटवात्केवलमङ्गकानां मनोज्ञकान्तेर्महिषोजनस्य।
शनैः शनैः प्रोज्झितभूषणानि चकाशिरे दौहृदलक्षणानि।। २५।।

मन्दमन्दमपयद्वलित्रया गाधताविषयनाभिगह्वरा।
कोसलेनद्रदुहितुः शनैरभून्मध्ययष्टिरपि दृष्टिगोचरा।। २६।।

न्यग्रोधपत्रसमतां क्रमशः प्रयाता-
मङ्गीचकार पुनरप्यदरं कृशाङ्ग्याः।
जीवातवे दशमुखोरगपीडितानां
गर्भच्छलेन वसता प्रथमेन पुंसा।। २७।।

अपि च -

मध्यं तनुत्वादविभाव्यमानमाकाशमासीदसितायताक्ष्याः ।
गर्भोदये विष्णुपदापदेशात्कार्श्यं विहायापि विहाय एव ।। २८ ।।

ततः -

उच्चस्थे ग्रहपञ्चके सुरगुरौ सेन्दौ नवम्यां तिथौ
लग्ने कर्कटके पुनर्वसुयुते मेषं गते पूषणि ।
निर्दग्धुं निखिलाः पलाशसमिधो मेध्यादयोध्यारणे-
राविर्भूतमभूत पूर्वमपरं यत्किंचिदेकं महः ।। २९ ।।

अपि च -

अथ रामाभिधानेन कवेःसुरभयन् गिरः ।
अलंचकार कारुण्याद्रघूणायन्वयं हरिः ।। ३० ।।

तमेनमन्वजायन्त त्रयस्त्रेताग्नितेजस्यः ।
उग्रजस्यानुकुर्वन्तस्तैस्तैर्लोकोत्तरैर्गुणैः ।। ३१ ।।

भरतस्तेषु कैकेय्यास्तनयो विनयोज्ज्वलः ।
अन्यौ लक्ष्मणशत्रुघ्नौ सुमित्रायां कृतोदयौ ।। ३२ ।।

एते ववृधिरे वीरा ब्रह्मक्षेमाय दीक्षिताः ।
लोकानन्दमुकुन्दस्य चत्वार इव बाहवः ।। ३३ ।।

अथ कदाचिदपरिमेयमायाभयानकयुद्धसमुद्धतदैत्यबलावस्कन्दकांदिशीक-वृन्दारकानीकपरिवार्यमाणरथः पङ्क्तिरथस्तपश्चर्याजातानामाश्चर्याणामायतनं त्रिशङ्कु-याजिनं भगवन्तं पद्यप्रबन्धमिव दर्शितसर्गभेदं प्राकृतव्याकरणमिव प्रकटितवर्णव्यत्यासं बुधमिव सोससुतं कुशिकसुतमद्राक्षीत् ।

तदनु तथाविधि कृतसपर्येण मर्यादातीतमहिम्ना महितेन गाधेतर हृदयेन गाधिनन्दनेन सत्रपरित्राणार्थमित्थमभ्यर्थितोऽभूत् ।

राजन् भवतस्तनयेन विनयाभिरामेण रामेण शरासनमित्रेण सौमित्रिमात्रपरिजनेन क्रियमाणक्रतुरक्षो रक्षोदुरितमुत्तीर्य कृतावभृथो भवितुमभिलषामीति ।

एतदाकर्ण्य कर्णपरुषं महर्षिभाषितमतिमात्रपुत्रवात्सल्यात्कौसल्याजानिः सशल्यान्तःकरणोऽभूत् ।

ततस्तस्मिन्बहुप्रकारैरवार्यनिश्चये भगवति विश्वामित्रे दशरथस्तपनकुलहितेन पुरोहितेनैवमभिहितोऽभूत् ।

पर्याप्तभाग्याय भवानमुष्मै कुर्यात्सपर्यां कुशिकात्मजाय ।
निर्यातुधानं वसुधां विधातुं निर्यातु रामः सह लक्ष्मणेन ।। ३४ ।।

एवं वसिष्ठेन प्रतिष्ठापितधृतिर्दशरथः सुतप्रदानेन कुशिकसुतमनोरथमेव पूरयामास ।

योगेन लभ्यो यः पुंसां संसारापेतचेतसाम्।
नियोगेन पितुः सोऽयं रामः कौशिकमन्वगात्।। ३५।।

तत्र सत्रं परित्रातुं विश्वामित्रो महामुनिः।
सौमित्रिसहितं रामं नयन्नयमवोचत।। ३६।।

बलेन तपसा लब्धे बलेत्यतिबलेति च।
विद्येते मयि काकुत्स्थ विद्ये ते वितरामि ते।। ३७।।

ततो गृहीतविद्यस्य दशरथेः प्रदेशमेकं प्रदर्श्य भगवानित्थमकथयत् -

अस्मिन् पुरा पुरभिदः परमेश्वरस्य
भालान्तरालनयनज्वलने मनोभूः।
सद्यः प्रपद्य शलभत्वममुञ्चदङ्गं
तस्मादमुं जनपदं विदुरङ्गसंज्ञम्।। ३८।।

तदनु मानससरःप्रसृतां सरयूमतिक्रम्य वृत्रवधप्रवृद्धवृद्धश्रवः पङ्कक्षालनलब्धमलयोर्मलदकरूशनाम्नोर्जनपदयोः सीम्नि कृतपदयोर्दशरथ्योः पुनरप्येवमब्रवीत्।

यक्षः सुकेतुर्द्रुहिणप्रसादाल्लेभे सुतां कामपि ताटकाख्याम्।
सुन्दः किलैनां परिणीय तस्यां मारीचनीचं जनयांबभूव।। ३९।।

एकदा सुन्दे निहते मारीचः कुम्भसम्भवमभिभूय तस्य शापादवाप कौणपताम्। ताटकाप्यभूत्पुरुषादिनी।

सेयमब्जासनसिद्धसिन्धुरसहस्रप्राणात्मजेन सह जनपदविपदं विदधाना व्यापादनीया त्वयेति।

रामस्तमाकर्ण्य स्त्रीवधशङ्कामकरोत्।

किञ्च, वैरोचनीं मन्थरां वसुन्धरापराधधुरन्धरां पुरन्दरेण निहतां जनार्दनकृतमर्दनां च भार्गवजननीं प्रदर्श्य दाशरथेरमन्दां सुन्दवधूवधविचिकित्सामुत्सारयामास।

आश्रुतः श्रुतवृत्तेन तेन सुन्दप्रियावधः।
तमेवान्ववदत्तस्य चापः शिञ्जारवच्छलात्।। ४०।।

तत्काले पिशिताशनाशपिशुना सन्ध्येव काचिन्मुने-
रध्वानं तरसा रुरोध रुधिरक्षोदारुणा दारुणा।
स्वाधीने हनने पुरीं विदधती मृत्योः स्वकृत्यात्यय-
क्रीडत्किंकरसंघसंकटमहाशृङ्गाटकां ताटका।। ४१।।

अथ दशरथेः कर्णमविशत्ताटकागुणः।
तथा धनुर्गुणस्तूर्णं प्राविशत्तज्जिघांसया।। ४२।।

ततो भाविनि संग्रामे बद्धश्रद्धस्य ताटका।
स्वप्राणान् रामबाणस्य वीरपाणमकल्पयत्।। ४३।।

मुनिर्भृशाश्वोपज्ञानि ताटकामाथिने ददौ।
अस्त्राणि जृम्भकादीनि जम्भशासनशासनात्।। ४४।।

तत्र कञ्चन विरञ्चिलोकप्रत्यादेशं प्रदेशं प्रदर्शयन्नवोचत।

प्रतिदिनमवदातैर्ब्रह्मभिर्ब्रह्मनिष्ठैः
प्रशमितभवखेदैः सादरं सेव्यमाने।
बलिनियमनहेतोर्वामनः कानने‌ऽस्मिन्
बलिनियमपरः सन् ब्रह्मचारी चचार।। ४५।।

अपहृतविबुधार्तेर्वामनस्याजमूर्ते-
रखिलभुवनभिक्षोराश्रमानोकहानाम्।
ततिरियमतिनीला व्याप्तदिग्व्योमसीमा
स्वयमपि परिमातुं लोकमभ्युद्यतेव।। ४६।।

इति विविधरसाभिः कौशिकव्याहृताभिः
श्रुतिपथमधुराभिः पावनीभिः कथाभिः।
गलितगहनकृच्छ्रं गच्छतोर्दाशरथ्योः
समकुचदिव सद्यस्तादृशं मार्गदैर्घ्यम्।। ४७।।

ततः सिद्धाश्रमं प्रविश्य विश्वामित्रः सत्रमारभत।

तदनन्तरमन्तरिक्षान्तरालादापन्तमन्तकानीकभयानकं तं पलाशगणमवलोक्य पलायमानाः करगलितसमित्कुशाः कुशिकनन्दनान्तेवासिनः ससम्भ्रममभिलषिताहवाय राघवाय न्यवेदयत्।

हृत्वाद्रेः शिखराणि तानि परितः क्षिप्त्वा हसित्वा क्रुधा
कृत्वा हस्तविघट्टनं तत इतः स्थित्वा नटित्वा भुहुः।
सिक्त्वा क्ष्मामसृजा स्रजान्त्रकृतया बद्ध्वा कचान्खेचरान्
दग्ध्वाग्नेः सदृशा दृशा निशिचरा रुन्धन्ति रन्ध्रं दिवः।। ४८।।

तत्र,

संक्रान्तवर्णान्तरगाधिसूनोः सम्पर्कपुण्यादिव रामभद्रः।
क्षात्रक्रमात्पिप्पलदण्डयोग्यः पलाशदण्डादृतपाणिरासीत्।। ४९।।

मारीचनीचमतिराहवमारचय्य
क्षिप्तः क्षणेन रघुनायकसायकेन।
मध्येपयोनिधि भयेन निमग्नमूर्ति-
र्वेषं पुपोष जलमानुषनिर्विशेषम्।। ५०।।

सुबाहुराहवोन्मत्तः कृत्तः काकुत्स्थपत्रिणा।
मुनीनामनभिप्रेतः प्रेतनाथातिथिः कृतः।। ५१।।

वंशस्पृशा हृदयहारिफलान्वितेन
रामेरितेन सहसा सहसायकेन।
स्नेहार्द्रितेन निरगादनुरागिणीव
प्राणावलिर्हृदयतः पिशिताशनानाम्।। ५२।।

अथ निशिचरमाथाद्वीतवैतानविघ्नो
मुनिरवभृथकृत्यं विश्वहृद्यं समाप्य।
अमनुत् जयलक्ष्म्या राममाजौ समेतं
यजनजनितमूर्त्या योक्तुमव्याजलक्ष्म्या।। ५३।।

अथ मिथिलां प्रति प्रस्थितः कौशिकः काकुत्स्थमित्थमकथयत।

पुरा खलु कुशेसयासनजन्मा कुशाभिधानो राजर्षिः कुशाम्बप्रमुखैश्चतुर्भिः कौशाम्बी-महोदय-धर्मारण्य-गिरिव्रजाख्यानां पुरीणां कर्तृभिः पुत्री बभूव।

कुशनाभस्तु घृताच्यां कन्याशतमजनयत्।

कन्यास्ताः सन्नद्धयौवनाः कामयमानः पवमानः प्रत्याख्यानात्प्रत्यापन्नमन्युरासा-मवयवेष्वनार्जवमतनुत।

अथ विदितवृत्तान्तेन कुशनाभेन तेन क्षमामेव प्रतिक्रियां मन्यामानेन चलिसूनवे सौमदेयाय राज्ञे ब्रह्मदत्ताय दत्तास्ताः प्रकृतिस्था बभूवुः।

पुनरपि कुशनाभस्तु पुत्रीयन्पितुः प्रसादादगाधसत्त्वान्गाधिसंज्ञानस्मत्तात-पादानुदपादयत्।

इत्थं दाशरथिः कौशिकोत्पत्तिकथानिशमननिरायामयामिनीयामानुबन्धोबन्धूस्तवक-सुन्दरबन्धुरेण संध्यारागेण प्राचीमुखेन शोणीकृतेन शोणाभिधानं दधानेन नदेन प्रवर्तितप्रत्यूषकृत्यः कृतनियमेन मुनिना सह गङ्गामुपतिष्ठमानेन पथा प्रातिष्ठत।

आजानपावनक्षीरां वृषानन्दविधायिनीम्।
श्रुतिप्रणयिनीं सोऽयमापगमाप गामिव।। ५४।।

अथ भागीरथीकथां श्रोतुकामाय रामाय भगवानिदमभाषत।

पुरा मनोरमा नाम सुमेरोरभवत्सुता।
गृहमेधी तयैवासीच्चक्रवर्ती धराभृताम्।। ५५।।

कन्याद्वयममुष्यासीदेका मन्दाकिनी तयोः।
अन्या भगवती साक्षाच्चन्द्रचूडकुटुम्बिनी।। ५६।।

तां नदीं विबुधा लब्ध्वा नाकलोकमनीनयन्।
तपस्यन्तीं गिरिर्गौरीं देवाय महते ददौ।। ५७।।

शिवयोर्युञ्जतोर्वीर्य दृष्ट्वा धात्र्यां समर्पितम्।
पावकः प्रतिजग्राह दैवतैरनुनाथितः।। ५८।।

अनपत्यानथामत्र्यान्बहुभार्यां च मेदिनीम्।
अकरोदम्बिकाक्रोधः पुत्रालाभसमुद्भवः।। ५९ ।।

अथ सेनान्यमिच्छद्भिरुक्तः सब्रह्मभिः सुरैः।
वह्निरह्नाय जाह्नव्यां न्यषिञ्चद्वीर्यमैश्वरम्।। ६० ।।

सापि सप्तार्चिषा क्षिप्तं तेजस्त द्रोढुमक्षमा।
हिमवत्प्रान्तकान्तारे श्रान्ता शरवणे जहौ।। ६१ ।।

तत्राभूत्कृत्तिकाप्रीत्यै षोढारूढमुखाम्बुजम्।
तारकध्वान्तविध्वंसि सद्यः षाण्मातुरं महः।। ६२ ।।

त्रैविध्यं श्रूयतां वत्स सरितस्त्रिदिवौकसाम्।
यथोक्तं हव्यमश्नत्या देवताया इवाध्वरे।। ६३ ।।

पुरीमयोध्यामध्यास्त सावित्रः सगरो नृप।
केशिनीसुमतिभ्यां च लङ्घितप्रथमाश्रमः।। ६४ ।।

स पुत्रीयन् सपत्नीकस्तपस्तेपे समा शतम्।
भृगुः प्रीतमनास्तस्मै ददौ दायादसम्पदम्।। ६५ ।।

असमञ्जं सुतं लेभे वैदर्भी केशिनी तयोः।
षष्टिं पुत्रसहस्राणां सुमतिश्च यवीयसी।। ६६ ।।

असमञ्जसचारित्रमसमञ्जमपोह्य सः।
आरब्धहयमेधः सन्नमुञ्चत तुरङ्गमम्।। ६७ ।।

क्रव्यादवपुषा सोऽयमहारि हरिणा हयः।
ततस्तं नष्टमन्वेष्टुं सौमतेयाः प्रतस्थिरे।। ६८ ।।

सर्वे सपर्वतामुर्वीं खनन्तः सगरात्मजाः।
चक्रुर्झर्झरितध्वान्तं नागलोकं नखांशुभिः।। ६९ ।।

त एते तपसा दीप्ते तमःस्तोमप्रमाथिनी।
कापिले ज्वलने वीरा लेभिरे शलभोपमाम्।। ७० ।।

असमञ्जसुतं पौत्रमंशुमन्तमथाब्रवीत्।
सप्तिं हृत्वा समाधत्तां सप्ततन्तुं भवानिति।। ७१ ।।

सोऽपि गत्वा बिलं तत्र दृष्ट्वा भस्मीकृतान्पितॄन्।
साश्रुस्तेभ्योऽञ्जलिं दित्सुश्चरँल्लेभे तुरङ्गमम्।। ७२ ।।

मातुलो गरुजस्तेषामेव तत्रैवमब्रवीत्।
गङ्गामिहानयायुष्मन्नेषामेषा गतिः परा।। ७३ ।।

ततस्तनयवृत्तान्तं श्रुत्वा लब्धतुरङ्गमः ।
समाप्य सगरः सत्रं पुत्रशोकाद्दिवं गतः ।। ७४ ।।

अथांशुमानयं राज्यं चिराय परिपालयन् ।
दिलीपे न्यस्तभूभारस्तपस्तेपे हिमालये ।। ७५ ।।

दिलीपेऽपि दिवं याते श्रुत्वा वृत्तं भगीरथः ।
अमर्त्यसरितं कर्तुं मेने मर्त्यतरङ्गिणीम् ।। ७६ ।।

ततो गोकर्णमासाद्य तपस्यति भगीरथे ।
देवो देवापगां वोढुमन्वमंस्त दयानिधिः ।। ७७ ।।

अथवीचीचयच्छन्नदिगन्तगगनान्तरा ।
शशाङ्कशङ्खसंभिन्नतारामौक्तिकदन्तुरा ।। ७८ ।।

तरङ्गाकृष्टमार्तण्डतुरङ्गायासितारुणा ।
फेनच्छन्नस्वमातङ्गमार्गणव्यग्रवासवा ।। ७९ ।।

आविः शाखाशिखोन्नेयनन्दनद्रुमकर्षणा ।
एकोदकनभोमार्गदिङ्मूढदिवसेश्वरा ।। ८० ।।

आवर्तगर्तसम्भ्रान्तविमानप्लवविप्लवा ।
नीलजीमूतशैवालकृतरेखा हरित्तटा ।। ८१ ।।

अवलेपभराक्रान्ता सुरलोकतरङ्गिणी ।
पपात पार्वतीकान्तजटाकान्तारगह्वरे ।। ८२ ।।

अलब्धनिर्गमा शम्भोः कपर्दादमरापगा ।
दधौ दुर्वाशिखालग्नतुषारकणिकोपमाम् ।। ८३ ।।

अदृष्ट्वा तां नदीं तत्र तुष्टाव परमेश्वरम् ।
भगीरथो विधेः क्रौर्यात्परिक्षीणमनोरथः ।। ८४ ।।

गङ्गा सप्ताकृतिर्जाता न्यपतद्धरमूर्धनि ।
तेन स्तुत्या प्रसन्नेन क्षिप्ता बिन्दुसरस्यपि ।। ८५ ।।

तासु प्राचीं गतास्तिस्रस्तिस्रः प्राचेतसीं दिशम् ।
अन्या पितृक्रियोद्युक्तभगीरथपथानुगा ।। ८६ ।।

सैषा भागीरथी जह्नोः सत्रक्षेत्रं समावृणोत् ।
तां स पीत्वा ततः शान्तो जहौ श्रोत्रेण वर्त्मना ।। ८७ ।।

तया तटिन्या जाह्नव्या प्रापयत्रिदिवं पितॄन् ।
भगीरथः पुरं प्राप परिपूर्णमनोरथः ।। ८८ ।।

अथ दाशरथिराकर्णितभागीरथीकथस्तां सरितं विलङ्घ्य विशालां विलोक्य पुरीं कस्येयमिति गाधिनन्दनमपृच्छत्। सोऽप्येवमवोचत्।

पुरा खलु सुरासुराणां सुधानिमित्तं मिथोविरोधे प्रवृत्ते मायां विश्वमोहिनीं विश्वरूपः प्रदर्श्य दैतेयनिधनं शतधारपाणिना कारयामास।

तेषां जननी दितिरतिवेलमन्युः शतमन्युशासनं कमपि पुत्रं लब्धुकामा पत्युर्मारीचस्य वचनात्कुशप्लवे सुचिरं तपश्चचार।

तां कैतवेन शुश्रूषमाणः शतधारपाणिः पादकलितकचकलापामापन्ननिद्रामपवित्रेति निर्वर्ण्यावगाहिततदीयजठरः सप्तधा गर्भं निर्भिद्य निर्जगाम।

दितिरपि विदिततनयवृत्तान्ता तान्यपि खण्डान्याखण्डलेन सप्तमरुतः कारयित्वा त्रिविष्टपं प्रविष्टा।

ततः -

अलम्बुषायामिक्ष्वाकोर्जातः कश्चिन्महीपतिः।
विशालेति स्वनाम्नात्र विशालां विधधे पुरीम्।। ८९ ।।

तदनु तद्वास्तव्येन सुमतिनाम्ना नृपतिना कृतातिथ्यः सराजपुत्रो भगवान् विश्वामित्रस्तत्र निशीथिनीं नीत्वा मिथिलां प्रति प्रस्थितः प्रतपसामुत्तमस्य गौतमस्याश्रमं प्रदर्श्य तद्दारानुषक्तां कथामित्थमकथयत्।

अत्रागमद्गौतमधर्मदारानन्नार्यजुष्टेन पथा महेन्द्रः।
स च क्रुधा निर्वृषणं वृषाणं भार्यामदृश्यां च मुनिश्चकार।। ९० ।।

वनमेतद्गते रामे शापान्मुक्ता भविष्यसि।
इत्युक्त्वा गौतमः पत्नीं हिमाद्रिं तपसे ययौ।। ९१ ।।

इत्थं विदितवृत्तान्ते देवतानां गणे तदा।
पितॄणां प्राभवाल्लेभे मेषस्य वृषणं वृषा।। ९२ ।।

तदेनामेतसो मुक्तां प्रतिगृह्णातु गौतमः।
इति तस्याश्रमं भेजे साकं रामेण कौशिकः।। ९३ ।।

दुःखे सुखे च रज एव बभूव हेतु-
स्तादृग्विधे महति गौतमधर्मपत्न्याः।
यस्माद् गुणेन रजसा विकृतिं गता सा
रामस्य पादरजसा प्रकृतिं प्रपेदे।। ९४ ।।

तस्मिन्नहल्यया गौतमेन च कृतमातिथ्यं विश्वामित्रः सराजपुत्रः प्रतिगृह्य मिथिलोपकण्ठभुवि जनकयजनभवनमभजत।

तदनु जनकेन विधिवदभ्यर्चिते तस्मिन्निमिकुलपुरोधाः शतानन्दो रघुनन्दनमेवमभाषत।

तिष्ठन् क्षत्रार्हवृत्तौ मुनिरगमदसावाश्रमं ब्रह्मसूनो-
रातिथ्यं तत्र लब्ध्वा निरवधिसुरभेः प्राभवादित्यवेत्य।
सा तेन प्रार्थिताभूत्तदनु मुनिवरे नाभ्युपेते चकर्ष
क्रोशन्तीं तां तयैव प्रचुरवलजुषा कान्दिशीको बभूव।। ९५।।

बहुशस्तद्बलचकितस्य तपोबलाधिगतविविधायुधनिगमस्य भूयोऽपि सुरभिनिमित्तं समारब्धसमरस्य दिव्यास्त्रपरम्परां ब्रह्मदण्डेन निरुन्धन्नरुन्धतीजानिरवतस्थे।

ततोऽयं जातव्यलीकः क्षात्रात्तेजसः परं ब्राह्ममेव महो महीय इति निश्चित्य तत्सिद्धये दक्षिणस्यां दिशि तीव्रतरं तपश्चचार।

अथ सावित्रः क्षत्रियस्त्रिशङ्कुः सशरीरः स्वर्गसिद्धमभ्यर्थयमानो वसिष्ठेन प्रत्याख्यातस्तस्य पुत्रैर्महोदयादिभिर्निर्बन्धकुपितैर्दत्तचण्डालभावस्तमेनं शरणमभजत।

असावपि तन्मनोरथपरिपूर्तये क्रतुमेकं प्राक्रमत।

तत्र समागतेषु ब्राह्मणेषु जुगुप्सया त्रिशङ्कोरनागतान्वसिष्ठपुत्रानयं शापेन श्वभक्षकानकरोत्।

ततः क्रतुभुजां वर्गेऽपि स्वर्गादनवतीर्णे।

अयं महात्मा तपसः प्रभावादारोपयामास दिवं त्रिशङ्कुम्।
निलाम्बरं निह्नुतराजवेषं वर्षानिशीथादविशेषवेषम्।। ९६।।

ततः -

अपातयत्स्वर्गमुपाश्रयन्तं संजातमन्युः शतमन्युरेनम्।
ततोऽवलम्ब्यास्य नियोगशङ्कुं लेभे त्रिशङ्कुर्गगने प्रतिष्ठाम्।। ९७।।

ततो गीर्वाणगणप्रार्थनया परित्यक्तभुवनान्तरनिर्माणकर्माणं तत्र तपःप्रत्यूहः प्रत्युद्भूतः इति पश्चिमायां दिशि पुष्करे पुष्कलं तपश्चरन्तममुम्बरीषयज्ञपशुविनाशप्रायश्चित्तार्थं बह्वीभिर्गोभिः क्रीत्वा नरपशुतां नीयमानस्तावदृचीकस्य मध्यमपुत्रः शुनःशेपः शरणमयाचत।

अयं भगवन्निजतनयविनिमयेन रक्षितुमेनमुन्मुखः पराङ्मुखेभ्यस्तेभ्यो हविष्यन्दादिभ्यः शापेन वसिष्ठपुत्रदशां दत्त्वा गाथाद्वयप्रीताभ्यामिन्द्रोपेन्द्राभ्याममम्बरीषं शुनःशेपं च परिपूर्णमनोरथौ कारयामास।

ततस्तपस्यन्तमेनं मेनकासङ्गतस्तपोभङ्गश्चिरमङ्गीचकार।

पश्चात्पश्चात्तापाभिभूतोऽयमुत्तरे भूभृति कौशिकीतीरे घोरं तपश्चचार।

तत्र जम्भारिप्रहितां रम्भां शैली भवेति शप्त्वा पूर्वस्यां दिशि निरस्तनिःश्वासं तपश्चरत्यमुष्मिन्नूष्मणा तपोग्नेरुद्विग्नितामरसखस्तामरसासनः सन्निधाय जितेन्द्रियत्वाद् ब्रह्मर्षिरसि, वसिष्ठोऽप्येवं व्याहरतु भवन्तमित्यभाषत।

असौ वसिष्ठनिर्देशाद् ब्रह्मर्षित्वमविन्दत।
यथोपनयसंस्काराद् द्विजन्मा ब्रह्मवर्चसम्।। ९८।।

इति जनकपुरोधःश्लाघितो गाधिसूनुः
सह नृपतनयाभ्यां शर्वरीं तत्र नीत्वा।
विधिवददिशदर्घ्यं पुष्पदर्भाग्रगर्भ
सरसिजदयिताय ज्योतिषे छान्दसाय।। ९९।।

तदनु जनकराजधानीं रामलक्ष्मणनिरीक्षणकौतुकादनवरतपतितेन विकचकुवलय-निचयोपचीयमानमेचकमरीचिमलिम्लुचेन पौरनारीलोचनरोचिषा कवचितनरपतिपथां विश्वामित्रः प्रविश्य दशरथतनयाविदमभाषत।

अस्यां खलु नगर्यामारब्धयज्ञस्य जनकस्य भागधेयात्सीता नामधेयभाजन-मजीजनत्कन्यारत्नं रत्नगर्भा भगवती।

अस्याः पुनः किमपरं माहात्म्यम्।

यतः -

देव्याः यस्या वसनमुदधिः पीठिका हाटकाद्रि-
र्हारः सिन्धुः सगरतनयस्वर्गमार्गैकबन्धुः।
क्रीडाशैलः प्रथमपुरुषक्रोडदंष्ट्रा च तस्याः
सीतामातुर्जगति मिथिलां सूतिकागेहमाहुः।। १००।।

तत्र सीताविवाहार्थममरैरपि दुष्करम्।
जनकः कल्पयामास धनुरारोपणं पणम्।। १०१।।

ततो महर्षिर्जनकस्य राज्ञः सभां सुधर्मासदृशीं प्रपेदे।
तौ चापतुश्चापविलोकलोलौ सचापकौ कोसलराजपुत्रौ।। १०२।।

तत्र विधिवदभ्यर्चितः कथितदशरथतनयवृत्तान्तः कौशिकः कौशिकप्रमुखै-रमरैरस्मत्कुलमहत्तरे देवराते निक्षिप्तं विशेषतः सीताशुल्कार्थं मया रक्षितमिदमिति जनकेन प्रदर्शितस्य चापस्यारोपणाय राममादिदेश। ततः -

रामे बाहुबलं विवृण्वति धनुर्यज्ञे गुणारोपणं
मा भूत्केवलमात्मना तिलकिते वंशेऽपि वैकर्तने।
आकृष्टं नितरां तदेव न परं सीतामनोऽपि द्रुतं
भङ्गस्तस्य न केवलं क्षितिभुजां दोःस्तम्भदम्भस्य च।। १०३।।

रामाकर्षणभग्नकार्मुकभुवा ध्वानेन रोदोरुधा
दृप्तक्षत्रयशःसितच्छदकुले जीमूतनादायितम्।

वीरश्रीप्रथमप्रवेशसमये पुण्याघोषायितं
सीतायाः किल मानसे परिणये माङ्गल्यतूर्यायितम् ।। १०४ ।।

नवःकठिनकर्षणत्रुटितचापजन्मा क्षणा-
द्दिशां द्विरदधीङ्कृतः कृतहरित्पतिस्वागतः ।
जगत्भ्रमणकौतुकोच्चलितरामकीर्त्यङ्गना-
प्रयाणपटहध्वनिं प्रथयति स्म तारध्वनिः ।। १०५ ।।

तत्र दशरथः सीतापरिणयकृतनिश्चयजनकप्रहितदूताहूतः पुरोहिताभ्युपगमा-न्मिथिलामुपागमत् ।

यत्कीर्तिस्तिलकायते सुरवधूसंगीतगोष्ठीमुखे
येनाद्यः पितृमान्मुमान्वसुमती येनैव राजन्वती ।
इन्द्रः संगरसंकटेषु विजहौ वीरस्य यस्योन्मुख-
प्रेङ्खत्स्यन्दनकेतनाम्बरदशासन्दर्शनाद्दुर्दशाम् ।। १०६ ।।

जनकः स्वकनीयांसमाजुहाव कुशध्वजम् ।
हत्वा युधि सुधन्वानं साङ्काश्ये स्थापितं पुरे ।। १०७ ।।

तदनु ताभ्यामभ्यर्चितः सपुरोहितो दशरथस्तत्र पुत्राणां गोदानमङ्गलं निर्वर्तयामास ।

जग्राह जनकात्सीतां तातादेशेन राघवः ।
आम्नायशासनेनार्चां यजमानादिवानलः ।। १०८ ।।

आश्चर्यमेतत् ।

गुणमनिमिषचापे कञ्चिदारोप्य सीतां
कुशिकतनयवाक्यादग्रहीद्रामभद्रः ।
तदनु तदनुजन्मा मैथिलेन्द्रस्य चित्ते
निहितबहुगुणः सन्नूर्मिलां लक्ष्मणोऽपि ।। १०९ ।।

ततो भरतशत्रुघ्नौ कुशध्वजनियोगतः ।
माण्डवीश्रुतकीर्तिभ्यामभूतां गृहमेधिनौ ।। ११० ।।

अथ दशरथः तनयैः सह कृतविवाहैर्विदेहेभ्यः प्रतिनिवर्तमानः संवर्तसमय-समुज्जृम्भितहुतवहदुःसहरोषं भीषणदुर्वारपराक्रमं क्षत्रवर्गगर्वसर्वकषपरश्वधधराधीनरुधिर-धाराकल्पितपितृतर्पणं दर्पवतामग्रेसरमुग्रप्रतापिनं तपःसमुचितवल्कलवसनमपि वासनावशादनतिपरिमुषितयुद्धश्रद्धं मध्येमार्गं भार्गवं मुनिं राममद्राक्षीत् ।

अप्राक्षीच्च तन्निरीक्षणादेव प्रक्षीणहर्षोऽपि महर्षिभिः सहविधाय सपर्यामार्यशील, कुशलमिति ।

अथ दशरथवाणीं तामश्रृण्वन्प्रसन्नां
भृगुपतिरिदमूचे प्रश्रितं रामभद्रम् ।
अवजिगमिषुरामं जीर्णचापात्तकीर्ते-
रविदितपरशोस्ते दोर्मदं कार्मुकेऽस्मिन् ।। १११ ।।

आदाय तत्सगुणमाशु विधाय तत्र
सन्धाय बाणमवधार्य तपोधनत्वम्।
तज्जीवितस्य दयमानमना मनीषी
सम्भूतघोरसमराद्विरराम रामः।। ११२।।

तावुभौ भृगुवंशसम्भवौ चापदण्डजमदग्निसम्भवौ।
प्रह्वभावमथलम्भ्यकेवलं राघवार्पितगुणौ बभूवतु।। ११३।।
युगपत्प्राप्तगुणयोश्चापभार्गवरामयोः।
ऋजुता वक्रतां प्राप वक्रतापि तथार्जवम्।। ११४।।

ततस्तत्क्षणममोघेन राघवः शरेण भार्गवस्य स्वर्गतिं रुरोध।

स्थाने हि तत्।

नूनं जनेन पुरुषे महति प्रयुक्त-
मार्गैः परं तदनुरूपफलं प्रसूते।
कृत्वा गध्रूद्वहगतेः क्षणमन्तरायं
यद्भार्गवः परगतेर्विहतिं प्रपेदे।। ११५।।

अथ सङ्क्रान्तया जामदग्न्यशक्तिसम्पदा सम्पन्नं पन्नगपरिवृढभोगभुजाभिरामं राममविरलमालिङ्ग्य मूर्ध्न्युपाघ्राय दशरथः परिखयेव परिसरे परिसरन्त्या सरयू-सरितानुविद्धामयोध्यां दारकान् सदारान् सादरमवलोकयन्तीनां पौरपुरन्ध्रीणां नीरन्ध्रित-गवाक्षैः कटाक्षैः सौन्दर्यवञ्चिततापिञ्छैः पिञ्छातपत्रायमाणधवलातपत्रः प्रविवेश।

लज्जावशादविशदस्मरविक्रियाभि-
स्ताभिर्वधूभिरतिवेलमवाप्तसौख्यान्।
इक्ष्वाकुनाथतनयान् प्रथमो रसानां
तारुण्ययोगचतुरश्चतुरः सिषेवे।। ११६।।

विद्ययेव त्रयीदृष्ट्या दर्भपत्राग्रधीः सुधीः।
राजपुत्र्या तया रामः प्रपेदे प्रीतिमुत्तमाम्।। ११७।।

इति बालकाण्डः।

प्रधानश्लोकव्याख्यात्मको भागः।

उच्चैर्गतिर्जगति सिद्ध्यति धर्मतश्चेत्
तस्य प्रमा च वचनैः कृतकेतरैश्चेत्।
तेषां प्रकाशनदशा च महीसुरैश्चेत्
तानन्तरेण निपतेत् क्व नु मत्प्रणामः।। १।।

अन्वयः - चेत् जगति उच्चैर्गतिः धर्मतः सिद्ध्यति,तस्य प्रमा च कृतकेतरैः वचनैश्चेत् तेषां च प्रकाशनाय चेत् महीसुरैः तदा मत्प्रणामः तान् अन्तरेण क्व नु निपतेत्?

व्याख्या - चेत् = यदि, जगति = संसारे, उच्चैः गतिः = स्वर्गाद्युत्तमानां फलानामवाप्तिः, धर्मतः वेदविहितैः स्वर्गादि उत्तमफलप्राप्तिकधनत्वेन निर्दिष्टैः ज्योतिष्टोमादिभिः यागैरेव सम्भवति, 'ज्योतिष्टोमेन यजेत स्वर्गकामः' इति हि श्रुतिः। च = किञ्च, तस्य = ज्योतिष्टोमादिकस्य, प्रमा = यथार्थ ज्ञानम्, चेत् कृतकेतरैः = क्रियन्ते इति कृतकानि कार्यभूतानीत्यर्थः, तेभ्यः इतरैः = भिन्नैः, अत एव नित्यः = त्रिकालवर्तिभिः अपौरुषेयैः वेदवाक्यैः सम्भवतीत्यर्थः, तेषाम् = अपौरुषेयाणां नित्यानां वेदवाक्यानाम्, चेत्, प्रकाशनस्य दशा = प्रकटीकरणम्, महीसुरैः = ब्राह्मणैः, सम्भवति तदा, तान् = ब्राह्मणान्, अन्तरेण = विना, मत्प्रणामः = मम नमस्या, क्व नु = कुत्र, निपतेत् = गच्छेत्, ब्राह्मणा एव मम नमस्कारयोग्या इति भावः।

ब्राह्मणानां पूज्यत्वं महाभारतेऽप्युक्तम्। तद्यथा -

दैवाधीनं जगत्सर्वं, मन्त्राधीनं तु दैवतम्।
ते मन्त्रा ब्राह्मणाधीना ब्राह्मणो मम दैवतम्।। इति।

अत्रैकावल्यलङ्कारः। तथा च एकावलीलक्षणम् -

यत्र विशेषणभावः पूर्वं पूर्वं प्रतिक्रमेणैव।
भजति परस्परमेषाऽलङ्कृतिरेकावली कथिता।। इति।

वृत्तञ्चात्र वसन्ततिलकम् 'ज्ञेया वसन्ततिलका तभजा जगौ गः' इति हि तल्लक्षणम्।

गद्यानुबन्धरसमिश्रितपद्यसूक्ति-
र्हृद्या हि वाद्यकलया कलितेव गीतिः।
तस्माद् दधातु कविमार्गजुषां सुखाय
चम्पूप्रबन्धरचनां रसना मदीया।। २ ।।

अन्वयः - गद्यानुबन्धरसमिश्रितपद्यसूक्तिः हि वाद्यकलया कलिता गीतिः इव हृद्या (भवति, यस्मात्), तस्मात् मदीया रसना कविमार्गजुषां सुखाय चम्पूप्रबन्धरचनां दधातु।

व्याख्या - गद्यस्य = वृत्तबन्धोज्झितपदसमूहस्य, यः अनुबन्धः = प्रबन्धगतपद्यसन्निवेशः, तेन यो रसः = सहृदयहृदयाह्लादकास्वादविशेषः, तेन मिश्रिता = मिलिता, या पद्यानाम् = वृत्तबन्धसमलङ्कृतानां पदकदम्बकानाम्, सूक्तिः = सुभाषितम्, हि = निश्चयेन, वाद्यस्य = वीणादिवादनरूपस्य, कलया = शिल्पेन, कलिता = समलङ्कृता, गीतिः इव = गानविधेव, हृद्या = मनोज्ञा, भवति यस्मात् तस्मादेव कारणात्, मदीया = मामकीना, रसना = जिह्वा, कविमार्गजुषाम् = कविमार्गानुयायिनाम्, सुखाय = आनन्दाय, चम्पूप्रबन्धस्य = 'गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते' इति लक्षणसमन्वितस्य काव्यस्य, रचनाम् = निर्मितिम्, दधातु = करोतु।

अस्य श्लोकस्य पूर्वार्द्धे उपमालङ्कारः। 'साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमाद्वयोः' इति उपमायाः लक्षणम्। अत्र वसन्ततिलकावृत्तम्।

समासः - गद्यानुबन्धरसमिश्रितपद्यसूक्तिः - गद्यस्य अनुबन्धः गद्यानुबन्धः, तस्य रसः गद्यानुबन्धरसः,तेन मिश्रइता पद्यसूक्तिः गद्यानुबन्धरसमिश्रितपद्यसूक्तिः। वाद्यकलया - वाद्यस्य कला वाद्यकला, तया वाद्यकलया। कविमार्गजुषाम् - कवीनां मार्गं कविमार्गम्, तं जुषन्ति ये ते, तेषां कविमार्गजुषाम्। चम्पूप्रबन्धरचनाम् - चम्पूनामकं प्रबन्धं चम्पूप्रबन्धम्, तस्य रचनां चम्पूप्रबन्धरचनाम्।

वाल्मीकिगीतरघुपुङ्गवकीर्तिलेशै-
स्तृप्तिं करोमि कथमप्यधुना बुधानाम्।
गङ्गाजलैर्भुवि भगीरथयत्नलब्धैः
किं तर्पणं न विदधाति नरः पितृणाम्।। ३।।

अन्वयः - वाल्मीकिगीतरघुपुङ्गवकीर्तिलेशैः कथमपि अधुना बुधानां तृप्तिं करोमि, किं भुवि भगीरथयत्नलब्धैः गङ्गाजलैः पितृणां तर्पणं न विदधाति?

व्याख्या - वल्मीकस्यापत्यं पुमान् वाल्मीकिः = प्राचेतस इत्यर्थः, तेन गीता = कीर्तिता, या रघुपुङ्गवस्य = रघुवंशधौरेयस्य रामचन्द्रस्य, कीर्तिः = यशः, तस्य लेशैः = तोमैः, कथमपि = महता प्रयासेन काव्यनिर्माणरूपेण, अधुना = इदानीम्, बुधानाम् = पण्डितानाम्, तृप्तिं करोमि = आनन्दं समेधयामि। किमिति प्रश्ने, भुवि = लोके, भगीरथस्य = एतन्नामकस्येक्ष्वाकुवंशीयस्य राज्ञः, यत्ने = प्रयासेन, लब्धैः = प्राप्तैः, गङ्गायाः = भागीरथ्याः, जलैः = उदकैः, मन्दाकिनीजलैरित्यर्थः, नरः = मनुष्यः, पितृणां तर्पणम् = नीलापाञ्जलिदानेन सन्तर्पणम्, न = नहि, करोति? करोत्येवेत्यर्थः। अत्र वसन्ततिलकवृत्तम्। अस्मिञ्छ्लोके वैधर्म्येण दृष्टान्तालङ्कारः -

यत्र वाक्यद्वये बिम्बप्रतिबिम्बतयोच्यते।
सामान्यधर्मो वाक्यज्ञैः स दृष्टान्तो निगद्यते।।

इति दृष्टान्तालङ्कारलक्षणात्।

समासः - वाल्मीकिगीतरघुपुङ्गवकीर्तिलेशैः - वाल्मीकिना गीता या रघुपुङ्गवस्य कीर्तिः तस्याः लेशैः वाल्मीकिहीतरघुपुङ्गवकीर्तिलेशैः। गङ्गाजलैः - गङ्गायाः जलं, तैः गङ्गाजलैः। भगीरथयत्नलब्धैः - भगीरथस्य यत्नेन लब्धैः भगीरथयत्नलब्धैः।

वाचं निशम्य भगवान् स तु नारदस्य,
प्राचेतसः प्रवचसां प्रथमः कवीनाम्।
माध्यन्दिनाय नियमाय महर्षिसेव्यां
पुण्यामवाप तमसां तमसां निहन्त्रीम्।। ४।।

अन्वयः - प्रवचसां कवीनां प्रथमः सः भगवान् प्राचेतसः तु नारदस्य वाचं निशम्य माध्यन्दिनाय

नियमाय महर्षिसेव्यं तमसां पुण्यां तमसाम् अवाप।

व्याख्या - प्रगल्भानि वचांसि येषान्ते तेषां प्रवचसाम् = निपुणकविजनानां व्यासादिकानाम्, कवीनाम् = काव्यकर्मसम्पादकानाम्, प्रथमः = आद्यः, सः = श्रीमद्रामायणस्य प्रणेतृत्वेन प्रख्यातः, भगवान् = 'उत्पत्तिं प्रलयं चैव भूतानामगतिं गतिम्। वेत्ति विद्यामविद्याञ्च स वाच्यो भगवानिति।। इति भगवच्छब्दकलक्षणसम्पन्नः, प्राचेतसः = प्रचेतसोऽपत्यं प्राचेतसः = वाल्मीकिः, तथा चाह विश्वः 'प्राचेतसस्त्वादिकविः स्यान्मैत्रावरुणिश्च सः। वाल्मीकिश्च।' इति। तु = इत्युत्कर्षार्थः, नारदः = देवर्षिः नारदः, तस्य देवर्षेः, वाचम् = मूलरामायणस्य माध्यमेनोपदिष्टां रामकथामयीं वाणीम्, निशम्य = श्रुत्वा, मध्ये भवः मध्यन्दिनः, मध्यशब्दस्य मध्यन्दिनादेशो भवप्रत्ययश्चेति न्यासकारः, तस्मै माध्यन्दिनाय नियमाय = माध्याह्निकां क्रियां, निर्वर्तयितुम्, महर्षिभिः = 'तपःशौचपरा दान्ताः सत्यवाचो बहुश्रुताः। वेदवेदाङ्गतत्त्वज्ञाः ऋषयः परिकीर्तिताः।। इति ऋषिलक्षणयुक्तेषु प्रवरैः, सेव्याम् = स्नानसन्ध्यावन्दनाद्यनुष्ठानार्थ-माश्रयितुं योग्याम्, पुण्याम् = पावनीम्, तमसाम् = अज्ञानानाम्, निहन्त्रीम् = विनाशकारिणीम्, तमसाम् = एतन्नाम्नीं नदीम्, अवाप = आजगामेत्यर्थः। अत्र वृत्त्यनुप्रासनामकः शब्दालङ्कारः वसन्ततिलकावृत्तञ्च।

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्।। ५।।

अन्वयः - निषाद! त्वं शाश्वतीः समाः प्रतिष्ठां मा अगमः, यत् क्रौञ्चमिथुनात् एकं काममोहितम् अवधीः।

व्याख्या - हे निषाद! = व्याध! त्वम् = भवान्, शाश्वतीः समाः = अनन्तसंवत्सरान्, अत्रात्यन्तसंयोगे द्वितीया, प्रतिष्ठाम् = स्थितिम्, मा गमः = नहि प्राप्नुहि, क्षिप्रमेव म्रियस्वेत्यर्थः। गमेर्लुङि पुषादित्वात् च्लेरङादेशः, 'न माङ्योगे' इत्यडागमप्रतिषेधे वक्तव्येऽप्यार्षत्वात् तदभावप्रतिषेधः। यत् = यस्मात्, क्रौञ्चमिथुनात् = क्रवाकद्वन्द्वात्, एकम् = अनन्यं सहचरम्, कामेन = स्मरेण, मोहितम् = मोहग्रस्तम्, अवधीः = हतवानसि।

किञ्चास्य श्लोकस्य माध्यमेन महर्षेः मुखात् ईश्वरकृपया सम्पूर्णरामायणकाव्यार्थोऽपि निस्सृतः। तथाहि -

मा = लक्ष्मीः, 'इन्दिरा लोकमाता मा' इत्यमरः। निषीदत्यस्मिन्निति निषादः, तत्सम्बुद्धौ मा निषाद = लक्ष्मीनिवास! श्रीराम! त्वम् = भवान्, शाश्वतीः समाः = चिरकालं यावत्, प्रतिष्ठामगमः = मण्डितैश्वर्यानन्दसम्पन्नो विजयी भव। यत् = यस्मात् कारणात्, क्रौञ्चमिथुनात् - क्रुञ्च गतिकौटिल्याल्पीभावयोः इति धातोः क्रुञ्चा = राक्षसी कैकसी, तस्याः अपत्यं क्रौञ्चः, राक्षसो रावणः, तस्य पत्नी क्रौञ्ची = मन्दोदरी, तयोः मिथुनादेकं काममोहितम् = लोकविदिष्टकर्मकारिणं रावणमवधीः।

अथ सरसिजयोनेराज्ञया रामवृत्तं
करबदरसमानं प्रेक्ष्य दृष्ट्या प्रतीच्या।
शुभमतनुत काव्यं स्वादु रामायणाख्यं
मधुमयफणितीनां मार्गदर्शी महर्षिः।। ६।।

अन्वयः - अथ सरसिजयोनेः आज्ञया मधुमयफणितीनां मार्गदर्शी महर्षिः प्रतीच्या दृष्ट्या करबदरसमानं रामवृत्तं प्रेक्ष्य शुभं स्वादु रामायणाख्यं काव्यमतनुत।

व्याख्या - अथ = ब्रह्मणः तिरोधानानन्तररम्, सरसिजम् = कमलम्, भगवतो विष्णोर्नाभेरुद्भूतम्, योनिः = कारणम्, उत्पत्तिस्थानम्, यस्याऽसौ, तस्य सरसिजयोनेः = ब्रह्मणः आज्ञया = आदेशेन, मधुमय्यः = अमृतस्राविण्यः, याः फणितयः = सूक्तयः, तासाम् = रसालङ्कारादिसमलङ्कृतानां कवितानाम्, मार्गम् = पद्धतिम्, दर्शयितुम् = उपदेष्टुम्, शीलं यस्याऽसौ मार्गदर्शी = उपदेष्टा, महर्षिः = ऋषिप्रवरो वाल्मीकिः, प्रतीच्या दृष्ट्या = व्यवहितविप्रकृष्टादीनामपि वस्तूनां साक्षात्कारं कर्तुं समर्थया योगदृष्ट्या, करे = पाणितले, यद् बदरम् = बदरीफलम्, तेन समानम् = सदृशम्, रामस्य = भगवतो रामचन्द्रस्य, वृत्तम् = वृत्तान्तम्, प्रेक्ष्य = अपरोक्ष्य, शुभम् = श्रोतृणां वक्तृणाञ्च कल्याणकरम्, स्वादु = गाने पाठे च मधुरम्, रामस्य = श्रीरामस्य, अयनम् = स्थानम्, वर्णकत्वेनेत्यन्वर्थसंज्ञा, रामायणम् इत्यत्र 'पूर्वपदात् संज्ञायामगः' इति सूत्रेण णत्वम्। रामायणमाख्या यस्याऽसौ तत् रामायणाख्यम्, काव्यम्, अतनुत = निबबन्ध इत्यर्थः।

अत्र मालिनीवृत्तम्। 'ननमययुतेयं मालिनी भोगिलोकैः' इति मालिनीवृत्तलक्षणम्।

छन्दोमयीनां निलयस्य वाचामन्तेवसन्तौ मुनिपुङ्गवस्य।
एतौ कुमारौ रघुवीरवृत्तं यथाक्रमं गातुमुपाक्रमेताम्।। ७।।

अन्वयः - छन्दोमयीनां वाचां निलयस्य मुनिपुङ्गवस्य अन्तेवसन्तौ एतौ कुमारौ यताक्रमं रघुवीरवृत्तं गातुमुपाक्रमेताम्।

व्याख्या - छन्दोमयीनाम् = अनुष्टुबादिलौकिकेषु छन्दस्सु प्रायो निबद्धानाम्, वाचाम् = वाणीनाम्, निलयस्य = पदे पदे स्वादुकाव्यनिबन्धननिकेतनस्य, मुनिषु = तत्त्वमननकर्तृषु, पुङ्गवस्य = श्रेष्ठस्य, मुनिवर्यस्येत्यर्थः, अन्तेवसन्तौ = शिष्यौ, अन्तेवासिनौ, एतौ = इमौ मैथिलेयौ, कुमारौ = कुशलवाख्यौ बालकौ, यथाक्रमम् = श्रीमद्रामायणमहाकाव्ये वर्णितक्रमानुसारेण, रघुवीरस्य = श्रीरामचन्द्रस्य, वृत्तम् = वृत्तान्तम्, गातुम् = गानं कर्तुम्, गानेन पठितुमिति यावत्, उपाक्रमेताम् = उपक्रान्तवन्तौ।

अस्मिञ्छ्लोके इन्द्रवज्रोपेन्द्रवज्रयोः उपजातिवृत्तम्। तथाहि 'स्यादिन्द्रवज्रा यदि तौ जगौ गः' 'उपेन्द्रवज्रा जतजास्ततो गौ' 'अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः' इति उपजातिलक्षणम्।

क्षीराम्भोधेर्जठरमभितो देहभासा प्ररोहैः

कालोन्मीलत्कुवलयदलद्वैतमापादयन्तम्।
आतन्वानं भुजगशयने कामपि क्षौमगौरे
निद्रामुद्रां निखिलजगतीरक्षणे जागरूकाम्।। ८।।

अन्वयः - अभितः देहभासां प्ररोहैः क्षीराम्भोधेः जठरं कालोन्मीलत्कुवललय-दलद्वैतमापादयन्तं क्षौमगौरे भुजगशयने निखिलजगतीरक्षणे जागरूकां निद्रामुद्रां कामपि आतन्वानं ददर्श।

व्याख्या - अभितः = समन्तात्, देहस्य = स्वकीयस्य दिव्यशरीरस्य, भासाम् = कान्तीनाम्, प्ररोहैः = विस्तारैः, क्षीराम्भोधेः = क्षीरसागरस्य, जठरम् = मध्यभागम्, काले = स्वविकाससमये, उन्मीलतः = विकसतः, कुवलयस्य = नीलकमलस्य, दलस्य = पत्रस्य, द्वैतम् = सादृश्यम्, आपादयन्तम् = प्रापयन्तम्, क्षौमगौरे = पीताम्बरदुकूलधवले, भुजगशयने = शेषशय्यायाम्, निखिलायाः = कृत्स्नायाः जगत्याः, रक्षणे = पालने, जागरूकाम् = सततं सावधानाम्, कामपि = अनिर्वचनीयाम्, निद्रामुद्राम् = योगनिद्राम्, आतन्वानम् = आश्रयन्तम्, भगवन्तं ददर्श इति पूर्वोक्तया क्रियया सहान्वयः। तथा चोक्तं दुर्गासप्तशत्याम् -

योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते।
आस्तीर्यशेषमभजत् कल्पान्ते भगवान् प्रभुः।।

अत्र तद्गुणालङ्कारः। तथा च तल्लक्षणम् ‘तद्गुणः स्वगुणत्यागादत्युत्कृष्टगुणग्रहः’ इति। वृत्तञ्चात्र मन्दाक्रान्ता। तल्लक्षणञ्च ‘मन्दाक्रान्ता जलधिषडगैम्भौ नतौ तौ गुरु चेत्’ इति।

प्रह्लादस्य व्यसनममितं दैत्यवर्गस्य दम्भं
स्तम्भं वक्षःस्थलमपि रिपोर्यौगपद्येन भेत्तुम्।
बद्धश्रद्धं पुरुषवपुषा मिश्रिते विश्वदृष्टे
दंष्ट्रारोचिविशदभुवने रंहसा सिंहवेषे।। ९ ।।

अन्वयः - प्रह्लादस्य अमितं व्यसनम्, दैत्यवर्गस्य दम्भम्, स्तम्भम्, रिपोः वक्षःस्थलम्, अपि यौगपद्येन भेत्तुं पुरुषवपुषा मिश्रिते विश्वदृष्टे दंष्ट्रारोचिविशदभुवने सिंहवेषे रंहसा बद्धश्रद्धं ददर्श।

व्याख्या - प्रह्लादस्य = हिरण्यकशिपोः पुत्रस्य, अमितम् = अपरिमितम्, व्यसनम् = दुःखम्, दैत्यानाम् = दितिपुत्राणाम्, वर्गस्य = समूहस्य, दम्भम् = मायाडम्बनम्, स्तम्भम् = प्रह्लादस्य वन्धनस्तम्भम्, रिपोः = हिरण्यकशिपोः, वक्षःस्थलम् = हृदयम्, यौगपद्येन = समकालमेव, भेत्तुम् = विदारयितुम्, पुरुषस्य = मानुषस्य, वपुषा = शरीरेण, मिश्रिते = मिलिते, अत एव तस्मात् पूर्वं कदाचिदप्यदृष्टत्वात् अत्याश्चर्यपूर्वकं जनैरवलोकिते, सिंहवेषे = नारसिंहवेषे, दंष्ट्राणाम् = दन्तविशेषाणाम्, रोचिभिः = कान्तिभिः, विशदानि = शुभ्राणि, भुवनानि = कुक्षिस्थलोकाः, यस्य तस्मिन् सिंहवेषे, रंहसा = वेगेन, बद्धश्रद्धम् = विहितादरं भगवन्तं विष्णुं ददर्श।

यद्यपि स्तम्भादिकानां विदारणं क्रमश एव सञ्जातम्, अथापि तेषां चतुर्णामपि कार्याणां

यौगपद्यवर्णनात् अतिशयोक्तिरलङ्कारः। वृत्तञ्चात्र मन्दाक्रान्ता।

नारायणाय नलिनायतलोचनाय,
नामावशेषितमहाबलिवैभवाय।
नानाचराचरविधायकजन्मदेश-
नाभीपुटाय पुरुषाय नमः परस्मै।। १०।।

अन्वयः - नलिनायतलोचनाय नामावशेषितमहाबलिवैभवाय नानाचराचरविधायक-जन्मदेशनाभीपुटाय परस्मै पुरुषाय नारायणाय नमः।

व्याख्या - नलिने इव = कमले इव, आयते = विस्तृते, लोचने = नेत्रे, यस्याऽसौ, तस्मै नलिनायतलोचनाय = पुण्डरीकविशालाक्षाय, नाम्ना = नाममात्रेण, अवशेषितम् = शेषवत्कृतम्, महद् = भूयिष्ठं, बलेः = वैरोचनेः, वैभवम् = ऐश्वर्यम्, येनाऽसौ, तस्मै नाम्नावशेषितमहाबलिवैभवाय, नाना = बहुविधम्, चराचरम् = जडजङ्गमात्मकं जगत्, तस्य विधायकः = निर्माता, ब्रह्मा, तस्य जन्मनः = उत्पत्तेः, देशः = स्थानम्, नाभीपुटाय = नाभीपद्मकोशम्, यस्याऽसौ, तस्मै नानाचराचरविधायकजन्मदेशनाभीपुटाय, तस्मै परस्मै = सर्वोत्कृष्टाय पुरुषाय = परमपुरुषायेत्यर्थः, इत्थं गुणविशिष्टाय नारायणाय = परमात्मने नमः इत्यर्थः। अस्मिञ्छ्लोके भगवतो नारायणस्य परंपुरुषत्वमभिहितम्। अत्र वसन्ततिलकावृत्तम्।

अपि कुशलममर्त्याः स्वागतं साम्प्रतं वः,
शमितदनुजदम्भा किं नु दम्भोलिकेलिः।
अपि धिषणमनीषानिर्मिता नीतिमार्गा-
स्त्रिदशनगरयोगक्षेमकृत्ये क्षमन्ते।। ११।।

अन्वयः - अमर्त्याः वः कुशलमपि? वः साम्प्रतं स्वागतं किम्? दम्भोलिकेलिः शमितदनुजदम्भा किम्? धिषणमनीषानिर्मिताः नीतिमार्गाः त्रिदशनगरयोगक्षेमकृत्ये क्षमन्ते अपि?

व्याख्या - हे अमर्त्याः = इन्द्रादिकाः देवाः! वः = युष्माकम्, कुशलम् = सर्वविधं क्षेमम्, अपि = किम्? अत्रापि प्रश्नार्थकः। वः = युष्माकम्, साम्प्रतम् = इदानीम्, स्वागतं किम् = सुखपूर्वकम् आगतं किम्? दम्भोलेः = वज्रस्य, केलिः = विलासः, शमितः = विदारितः, दनुजानाम् = दानवानाम्, दम्भः = दर्पः, यया सा एतादृशी,किम्? धिषणस्य = बृहस्पतेः, मनीषया = बुद्ध्या, निर्मिताः = विरचिताः, नीतेः = राजनीतेः, मार्गाः = पद्धतयः, त्रिदशानाम् = देवानाम्, नगरस्य = अमरावत्याः, योगक्षेमयोः कृत्ये = संरक्षणकर्मणि, क्षमन्ते = समर्थाः भवन्ति, अपि = किम्? उपलब्धस्य वस्तुनो लाभो योगः लब्धस्य परिरक्षणं क्षेमः इति योगक्षेमयोर्विवेकः। अस्मिञ्छ्लोके मालिनीवृत्तम्।

एनां पुराणनगरीं नगरीतिसालां
सालाभिराम‌भुजनिर्जितयक्षराजः।
हेलाभिभूतजगतां रजनीचराणां
राजा चिरादवति रावणनामधेयः।। १२।।

अन्वयः - सालाभिरामभुजनिर्जितयक्षराजः रावणनामधेयः हेलाभिभूतजगतां रजनीचराणां राजा

नगरीतिसालाम् एनां पुरनाणनगरीं चिरादवति।

व्याख्या - सालाः = सर्जनवृक्षाः, तद्वदभिरामैः = आयतत्वादिगुणसम्पन्नत्वात् तत्तुल्यैः, भुजैः = विंशतिसंख्याकैः भुजैः, निर्जितः = पराजितः, यक्षराजः = कुबेरः, येनाऽसौ तथाभूतः हेलया = विलासेन अवज्ञया वा, अभिभूतानि = तिरस्कृतानि, जगन्ति यैस्तेषाम् रजनीचराणाम् = रक्षसाम्, राजा = चक्रवर्ती, रावनामधेयः = रावणनामकः, नगस्य = पर्वतस्य, इव रीतिः = आकृतिः, यस्य सः तथाभूतः सालः = प्राकारः, यस्याः सा तां नगरीतिसालाम्, एनाम् = इमां पूर्वोक्तां लङ्काभिधानाम्, पुराणीम् = प्राचीनाम्, नगरीम् = पुरीम्, चिरात् = चिरकालमारभ्य, अवति = रक्षति। अस्मिञ्छ्लोकेऽनुप्रासालङ्कारः। अत्र वसन्ततिलकावृत्तम्।

अम्भोजसम्भवममुं बहुभिस्तपोभि-<br>
राराधयन् वरमवाप परैर्दुरापम्।<br>
तस्मादशेषभुवनं निजशासनस्य,<br>
लक्ष्यीकरोति रजनीचरचक्रवर्ती।। १३ ।।

अन्वयः - यस्मात् सः बहुभिस्तपोभिः अम्भोजसम्भवम् अमुम् आराधयन् परैः दुरापं वरम् अवाप तस्मात् रजनीचरचक्रवर्ती अशेषभुवनं निजशासनस्य लक्ष्यीकरोति।

व्याख्या - यस्मात् कारणात् सः राजा रावणः, बहुभिः = अनेकप्रकारकैः, तपोभिः = तपश्चर्याभिः, अम्भोजात् = कमलात्, सम्भवः = उत्पत्तिः, यस्याऽसौ तम् अम्भोजसम्भवम् = विष्णुनाभिकमलनालसञ्जातं ब्रह्माणम्, आराधयन् = परितोषयन्, परैः = ब्रह्माव्यतिरिक्तैः देवैः, दुरापम् = दुष्प्रापम्, वरम् = वरदानम्, अवाप = प्राप्तवान्, तस्मात् एव हेतोः, रजनीचराणाम् = राक्षसाम्, चक्रवर्ती = राजा रावणः, अशेषभुवनं = सम्पूर्णं जगत्, निजस्य = स्वस्य, शासनस्य = प्रशासनस्य, लक्ष्यीकरोति = विषयीकरोति। चण्डशासनोऽयं निजशासनेनैव अशेषभुवनानि शास्तीत्यर्थः। 'अभूततद्भावे च्विः' 'अस्य च्वौ' इति दीर्घः। अत्र वसन्ततिलकावृत्तम्।

इन्द्रनीलाचलोदञ्चच्चन्द्रिकाधवलस्मितः।<br>
वाचमूचे सुधाधारां मधुरां मधुसूदनः।। १४ ।।

अन्वयः - इन्द्रनीलाचलोदञ्चच्चन्द्रिकाधवलस्मितः मधुसूदनः सुधाधारां मधुरां वाचम् ऊचे।

व्याख्या - इन्द्रनील इव = इन्द्रनीलमणिसदृशः, अचलः = पर्वतः, इन्द्रनीलाचलः, तत्र उदञ्चत् = उल्लसन्ती, या चन्द्रिका = ज्योत्स्ना, तद्वद् धवलम् = अवदातम्, स्मितम् = ईषद्हासं, यस्याऽसौ इन्द्रनीलाचलोदञ्चच्चन्द्रिकाधवलस्मितः, मधुसूदनः = मधुनामकस्य दैत्यस्य निहन्ता भगवान् विष्णुः सुधाधाराम् = अमृतस्यन्दिनीम्, अत एव मधुराम्, वाचम् = वाणीम्, ऊचे = उक्तवान्। श्लोकाख्यमेतदनुष्टुब्वृत्तम्।

कौसल्यायै प्रथममदिशद् भूपतिः पायसार्धं<br>
प्रादादर्धं प्रणयमधुरं कैकयेन्द्रस्य पुत्र्यै।<br>
एते देव्यौ तरलमनसः पत्युरालोच्य भावं,

स्वार्धांशाभ्यां स्वयमकुरुतां पूर्णकामां सुमित्राम्।। १५।।

अन्वयः - भूपतिः पायसार्धं प्रथमं कौसल्यायै प्रणयमधुरम् अदिशत्, प्रणयमधुरम् अर्द्धं केकयेन्द्रस्य पुत्र्यै प्रादात्। एते देव्यौ तरलमनसः पत्युः भावम् आलोच्य स्वयं स्वार्धांशाभ्यां सुमित्रां पूर्णकामाम् अकुरुताम्।

व्याख्या - भूपतिः = राजा दशरथः, कोसलस्य राज्ञोऽपत्यं स्त्री कौसल्या, तस्यै कौसल्यायै = स्वाग्रमहिष्यै, प्रथमम् = सर्वप्रथमम्, पायसस्य = अग्निना यागान्ते दत्तं यत् पायसं दिव्यम्, तस्यार्धम्, ततः अर्द्धम् = अवशिष्टं पायसस्यार्द्धं भागम्, कैकयेन्द्रस्य = केकयदेशाधिपतेः, पुत्र्यै = कैकेय्यै, प्रणयेन = स्नेहेन, मधुरम् = माधुर्यगुणयुक्तम्, प्रादात् = दत्तवान्, राजा दशरथः। कैकेय्याः अतिशयप्रेमास्पदत्वात् तस्यै प्रणयमधुरं प्रादात् राजा दशरथः। तदनन्तरम् एते देव्यौ = कौसल्या कैकेय्यौ, तरलम् = चञ्चलम्, मनः = चित्तम्, यस्य असौ तथाभूतस्य, मया सर्वं पायसं तु आभ्यामेव प्रदत्तम्, मम मध्यमा पत्नी सुमित्रा केन प्रकारेण पायसं प्राप्नुयात् इति मनसि विचारयतः, पत्युः = राज्ञो दशरथस्य, भावम् = अभिप्रायम्, आलोच्य = तस्य मुखाकृतिमेवालोक्य अनुमीय, स्वार्धांशाभ्याम् = स्व-स्व-अर्द्धांशाभ्याम्, स्वयम् = राज्ञः कथनमनपेक्ष्यैव, सुमित्राम् = राज्ञो दशरथस्य मध्यमपत्नीम्, पूर्णकामाम् = परिपूर्णमनोरथाम्, अकुरुताम् = पत्यु प्रसादनस्यैव पत्न्याः परमधर्मत्वात्। अत एव ते स्व-स्व-भागस्य अर्द्धम् अर्द्धं कृत्वा एकम् एकं भागं स्वस्मै कृत्वा अपरं भागं सुमित्रायै ददतुः। अत्र मन्दाक्रान्ता वृत्तम्।

मन्दमन्दमपयद्वलित्रया गाधताविषयनाभिगह्वरा।
कोसलेन्द्रदुहितुः शनैरभून्मध्ययष्टिरपि दृष्टिगोचरा।। १६।।

अन्वयः - कोसलेन्द्रदुहितुः मन्दमन्दमपयद्वलित्रया, गाधताविषयनाभिगह्वरा मध्ययष्टिरपि शनैः दृष्टिगोचरा अभूत्।

व्याख्या - कोसलानाम् इन्द्रस्य = कोसलदेशाधिपतेः, दुहितुः = पुत्र्याः कौसल्यायाः, मन्दमन्दम् = मन्द्प्रकारम् 'प्रकारे गुणवचनस्य' इति द्वित्वम्, अपयत् = अपगच्छत्, वलीनां = मध्यरेखाणां, त्रयं यस्याः सा तथाभूता, किञ्च गाधतायाः = उत्तानत्वस्य, विषयम् = गोचरम्, नाभेः गह्वरम् = कुहरं, यस्याः सा तथाभूता, गाधताविषयनाभिगह्वरा = उत्तानत्वं लभमाननाभिकुहरवती, मध्ययष्टिरपि = मध्यमभागोऽपि, कटिप्रदेशोऽपीत्यर्थः, शनैः = मन्दगत्या, दृष्टिगोचरा = चक्षुविषयतां गताऽभूत् = अभवत्। अत्र रथोद्धता वृत्तम्। 'रान्नराविह रथोद्धता' इति तल्लक्षणम्।

समासः - कोसलेन्द्रदुहितुः - कोसलानाम् इन्द्रः कोसलेन्द्रः, तस्य दुहिता, तस्याः कोसलेन्द्रदुहितुः। मन्दमन्दमपयद्वलित्रया - मन्दमन्दम् अपयत् वलीनां त्रयं यस्याः सा मन्दमन्दमपयद्वलित्रया। गाधताविषयनाभिगह्वरा - गाधतायाः विषयो नाभेः गह्वरं यस्याः सा गाधताविषयनाभिगह्वरा।

मध्यं तनुत्वादविभाव्यमानमाकाशमासीदसितायताक्ष्याः।

गर्भोदये विष्णुपदापदेशात् कार्श्यं विहायापि विहाय एव।। १७।।

अन्वयः - असितायताक्ष्याः (पूर्वम्) मध्यं तनुत्वात अविभाव्यमानम् आकाशम् आसीत्, गर्भोदये (काले) विष्णुपदापदेशात् कार्श्यं विहाय अपि विहाय एव अभूत्।

व्याख्या - असिते = कृष्णवर्णे, आयते = विस्तृते, अक्षिणी यस्याः सा तस्याः असितायताक्ष्याः = कौसल्यायाः, पूर्वं मध्यम् = मध्यमभागः, तनुत्वात् = अत्यन्तकृशत्वात्, अविभाव्यमानम् = अज्ञायमानम्, अदृश्यमानमिति यावत्, आकाशमासीत् = आकाशस्य दृष्टेरविषयत्वात्, तत्सदृशं = चक्षुषोरविषयभूतमासीदित्यर्थः। किन्तु गर्भोदये = गर्भोत्पत्तिः सञ्जाते सति, कार्श्यम् = आकाशभावनिमित्तं सौक्ष्यम्, विहायापि = परित्यापि, विष्णोः = सर्वव्यापकस्य परमात्मनः, गर्भरूपेण विद्यमानस्य, पदं = स्थानम्, तस्य अपदेशात् = व्याजात्, विहाय एव = आकाश एव अभूत्।

अत्र श्लोकस्य पूर्वोत्तरभागयोः अतिशयोक्तेर्विद्यमानत्वात् तयोः सङ्करः। अत्र रथोद्धता वृत्तम् 'रात्परैर्नलगै रथोद्धता इति तल्लक्षणम्।

उच्चस्थे ग्रहपञ्चके सुरगुरौ सेन्दौ नवम्यां तिथौ  
लग्ने कर्कटके पुनर्वसुयुते मेषं गते पूषणि।  
निर्दग्धुं निखिलाः पलाशसमिधौ मेध्यादयोध्यारणे-  
राविर्भूतमभूतपूर्वमपरं यत्किञ्चिदेकं महः।। १८।।

अन्वयः - ग्रहपञ्चके उच्चस्थे सेन्दौ सुरगुरौ नवम्यां तिथौ, पुनर्वसुयुते कर्कटके लग्ने, पूषणि मेषं गते, निखिलाः पलाशसमिधः निर्दग्धुं मेध्यात् अयोध्यारणेः अभूतपूर्वम् अपरं यत्किञ्चित् एकं महः आविर्भूतम्।

व्याख्या - ग्रहाणां पञ्चके = सूर्य भौम-बृहस्पति-शुक्र-शनिनामकानां पञ्चानां ग्रहाणां समूहे, उच्चस्थे = मेषादिषु उत्तुङ्गस्थानस्थिते, सेन्दौ = चन्द्रमसा सहिते, सुरगुरौ = बृहस्पतौ, समानस्थानस्थिते सति, नवम्याम् = नवसंख्याके, तिथौ = दिने, पुनर्वसुयुते = पुनर्वसुनक्षत्रसहिते, कर्कटके = कर्कटकनामके, लग्ने = राशीनामुदये काले, पूषणि = सूर्ये, मेषं गते = मेषमासं प्राप्ते, निखिलाः = सम्पूर्णाः, पलाशसमिधः - पलानि = मांसानि, अश्नन्ति ये ते पलाशाः = राक्षसाः, एव समिधः = काष्ठानि, निर्दग्धुम् = भस्मसात्कर्तुम्, मेध्यात् = पवित्रात्, अयोध्या एव अरणिः = अग्निमन्थनदारुः, तस्मात्, अभूतपूर्वम् = पूर्वोत्पन्नसकलविलक्षणम्, अपरम् = अद्वितीयम्, यत्किञ्चित् अनिर्वचनीयम्, एकं महः = तेजः, आविर्भूतम् = प्रकटीबभूव। अत्र शार्दूलविक्रीडितं वृत्तम्।

अथ रामाभिधानेन कवेः सुरभयन् गिरः।  
अलञ्चकार कारुण्याद्रघूणामन्वयं हरिः।। १९ ।।

अन्वयः - अथ हरिः कारुण्यात् रामाभिधानेन कवेः गिरः सुरभयन् रघूणामन्वयम् अलञ्चकार।

व्याख्या - अथ = अतीवमनोहारकालसमागमानन्तरम्, हरिः = भगवान् विष्णुः, कारुण्यात् = स्वाश्रितजनकारुण्यपरवशात्, रामस्य = श्रीरामचन्द्रस्य, अभिधानेन = नाम्ना, कवेः = श्रीमद्रामायणप्रणेतुः

महर्षेः वाल्मीकेः, गिरः = वचांसि, सुरभयन् = मनोज्ञतां प्रापयन्, रघूणाम् = रघुवंशीयानां राज्ञाम्, अन्वयम् = वंशम्, अलञ्चकार = समलङ्कृतवान्, स्वावतारेणेति भावः। अत्रानुष्टुब्वृत्तम्।

तमेनमन्वजायन्त त्रयस्त्रेताग्नितेजसः।
अग्रजस्यानुकुर्वन्तस्तैस्तैर्लोकोत्तरैर्गुणैः।। २०।।

अन्वयः - तमेनमनु तैः तैः लोकोत्तरैः गुणैः अग्रजस्यानुकुर्वन्तः त्रेताग्नितेजसः त्रयः अजायन्त।

व्याख्या - तम् = तच्छब्द अत्र प्रख्यातार्थकः, एनम् = भगवन्तं श्रीरामचन्द्रम्, अनु = पश्चात्, तैः तैः = सौशील्य-वात्सल्यादिकैः, वर्णयितुमशक्यैः, लोकोत्तरैः = अलौकिकैः दिव्यैरिति यावत्, गुणैः = सर्वलोकोपकारकैः सौशील्यवात्सल्यादिकैः, अग्रजस्य = स्वज्येष्ठभ्रातुः श्रीरामचन्द्रस्य, अनुकुर्वन्तः = अनुकरणं कुर्वन्तः, त्रेताग्नितेजसः = आहवनीय-गार्हपत्य-दक्षिणनाम्नामग्नीनां समुदितं नाम त्रेताग्निरिति, तस्य तेज इव तेजो येषां ते त्रेताग्नितेजसः, त्रयः = भरतलक्ष्मणःशत्रुघ्नाः, अजायन्त = उत्पन्ना अभूवन्।

यक्षः सुकेतुर्द्रुहिणप्रसादाल्लेभे सुतां कामपि ताटकाख्याम्।
सुन्दः किलैनां परिणीय तस्यां मारीचनीचं जनयाम्बभूव।। २१।।

अन्वयः - सुकेतुः यक्षः द्रुहिणप्रसादात् ताटकाख्यां कामपि सुतां लेभे, सुन्दः किल एनां परिणीय तस्यां मारीचनीचं जनयाम्बभूव।

व्याख्या - सुकेतुः = एतन्नामकः, यक्षः = देवयोनिविशेषः, द्रुहिणः = ब्रह्मणः, प्रसादात् = कृपया, कामपि = अतीवबलशक्तित्वात् अवर्णनीयाम्, ताटकाख्याम् = ताटकानाम्नीम्, सुताम् = पुत्रीम्, लेभे = प्राप्तवान् सन्ततिरूपेण, एनाम् = सुकेतुपुत्रीं ताटकाम्, परिणीय = विवाहस्य विधिना परिगृह्य, किल = निश्चयेन, तस्याम् = ताटकायाम्, सुन्दः = एतन्नामको दैत्यविशेषः, मारीचनीचम् = मारीचनामकं नीचप्रकृतिकं यज्ञादिद्रोहकरत्वात्, जनयाम्बभूव = जनयामास। अत्रोपजातिवृत्तम् इन्द्रवज्रोपेन्द्रवज्रयोः।

तत्काले पिशिताशनाशपिशुना सन्ध्येव काचिन्मुने-
रध्वानं तरसा रुरोध रुधिरक्षोदारुणा दारुणा।
स्वाधीने हनने पुरीं विदधती मृत्योः स्वकृत्यात्यय-
क्रीडत्किङ्करसङ्घसङ्कटमहाश्रृङ्गाटका ताटका।। २२।।

अन्वयः - तत्काले मृत्योः पुरीं स्वकृत्यात्ययक्रीडत्किङ्करसङ्घसङ्कटमहा-श्रृङ्गाटका विदधती स्वाधीने हनने दारुणा रुधिरक्षोदारुणा पिशिताशनाशपिशुना सन्ध्येव काचित् ताटका मुनेः अध्वानं तरसा रुरोध।

व्याख्या - तत्काले = धनुर्गुणरवकाले, मृत्योः = यमराजस्य, पुरीम् = नगरीम्, स्वेषाम् = स्वकीयानाम्, यत् कृत्यम् = कार्यम्, तस्य अत्यनेन = विपर्ययेण, क्रीडद्भिः = यथेच्छं विहारं

कुर्वद्भिः, किङ्कराणाम् = यमदूतानाम्, सङ्घैः = समूहैः, सङ्कटम् = सङ्कुलम्, महद् = विपुलं, श्रृङ्गाटकम् = चतुष्पथं, यस्याः ता तथोक्ताम्, विदधती = विदधाना, स्वाधीने = स्वायत्ते, हनने = वधकर्मणि, दारुणा = भयङ्करी, रुधिरस्य = रक्तस्य, क्षोदेन = असृक्पङ्केन, अरुणा = रक्तवर्णा, रक्तरञ्जितेत्यर्थः, पिशितम् = मांसम्, अश्नन्ति ये ते पिशिताशाः, तेषां नाशस्य = विनाशस्य, पिशुना = सूचिका, काचित् = अतीव भयङ्करी, ताटका = मारीचस्य रक्षसो जननी, मुनेः = विश्वामित्रस्य, अध्वानम् = पन्थानम्, तरसा = रंहसा, रुरोध = निरुद्धवती। अत्र शार्दूलविक्रीडितं वृत्तम्। अत्र श्लेषसङ्कीर्णोपमालङ्कारः।

समासः - तत्काले - तस्य काले तत्काले। स्वकृत्यात्ययक्रीडत्किङ्करसङ्घ-सङ्कटमहाश्रृङ्गाटकाम् - स्वेषां यत् कृत्यं तस्य अत्ययेन क्रीडन् यो हि किङ्कराणां सङ्घः तैः सङ्कटं महत् श्रृङ्गाटकं यस्याः सा, तां तथाविधां स्वकृत्यात्ययक्रीडत्किङ्कर-सङ्घसङ्कटमहाश्रृङ्गाटकम। रुधिरक्षोदारुणा - रुधिरस्य क्षोदेन अरुणा या सा रुधिरक्षोदारुणा। पिशिताशनाशपिशुना - पिशितम् अश्नन्ति ये ते पिशिताशाः, तेषां नाशस्य पिशुना पिशिताशनाशपिशुना।

प्रतिदिनमवदातैर्ब्रह्मभिर्ब्रह्मनिष्ठैः,
प्रशमितभवखेदैः सादरं सेव्यमाने।
बलिनियमनहेतोर्वामनः काननेऽस्मिन्
बलिनियमपरः सन् ब्रह्मचारी चचार।। २३ ।।

अन्वयः - अवदातैः ब्रह्मनिष्ठैः प्रशमितभवखेदैः ब्रह्मभिः प्रतिदिनं सादरं सेव्यमाने अस्मिन् कानने बलिनियमनहेतोः बलिनियमपरः ब्रह्मचारी सन् वामनः चचार।

व्याख्या - अवदातैः = प्रसन्नैः, विषयवैराग्ययुक्तत्वात् निर्मलान्तःकरणैः, ब्रह्मनिष्ठैः - ब्रह्मैव निष्ठा = शान्तिपदं, येषां ते तैः, प्रशमिता = शान्तिं गमिताः, भवस्य = जगतः, खेदाः = जन्ममरणरूपसंसरणरूपाध्वश्रमाः, येषां ते तैः तथाभूतैः, ब्रह्मभिः = ब्रह्मर्षिभिः, प्रतिदिनम् = निरन्तरम्, सादरम् = श्रद्धापूर्वकम्, सेव्यमाने = अधिष्ठीयमाने, अस्मिन् = पुरो दृश्यमाने, कानने = अरण्ये, बलेः = वैरोचनेः, नियमनस्य = निग्रहस्य, हेतोः = कारणात्, बलिं निग्रहीतुमिति यावत्, बलीनाम् = इष्टदेवतापूजोपहाररूपाणां बलीनाम्, नियमाः = शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानाख्याः, तत्परः = तदासक्तः, ब्रह्मचारी सन् = प्रथमाश्रमे विद्यमानः सन्, चचार = आवर्तत। अस्मिन् श्लोके मालिनीवृत्तम्।

हत्वाद्रेः शिखराणि तानि परितः क्षिप्त्वा हसित्वा क्रुधा,
कृत्वा हस्तविघट्टनं तत इतः स्थित्वा नटित्वा मुहुः।
सिक्त्वा क्ष्मामसृजा स्रजान्त्रकृतया बद्ध्वा कचान् खेचरान्
दग्ध्वाऽग्नेः सदृशा दृशा निशिचरा रुन्धन्ति रन्ध्रं दिवः।। २४।।

अन्वयः - अद्रेः शिखराणि हत्वा, तानि परितः क्षिप्त्वा, क्रुधा हसित्वा, हस्तविघट्टनं कृत्वा,

तत इतः स्थित्वा, मुहुः नटित्वा, क्ष्माम् असृजा सिक्त्वा, अन्त्रकृतया स्रजा कचान् बद्ध्वा, अग्नेः सदृशा दृशा खेचरान् दग्ध्वा निशिचराः दिवः रन्ध्रं रुन्धन्ति।

व्याख्या - अद्रेः = पर्वतस्य, शिखराणि = श्रृङ्गाटकानि, हृत्वा = आनीय, तानि = आनीतानि शिखराणि, परितः = समन्तात्, क्षिप्त्वा = प्रक्षिप्य, क्रुधा = क्रोधेन, हसित्वा = अट्टहासं चण्डं कृत्वा, हस्तयोः = करयोः, विघट्टनम् = स्फालनं कृत्वा, तत इतः = यत्र तत्र यथेष्टम्, स्थित्वा = सन्तिष्ठ्य, समन्ताद् व्याप्येत्यर्थः, मुहुः नटित्वा = असकृत् उत्साहप्रदर्शनं कृत्वा, क्ष्माम् = पृथिवीम्, असृजा = रक्तेन, सिक्त्वा = सेचयित्वा, अन्त्रकृतया = आन्त्रनिर्मितया, स्रजा = मालया, कचान् = केशान्, बद्ध्वा = संयमयित्वा, खेचरान् = अन्तरिक्षचारिणः, अग्निसदृशा = अग्निकल्पया, दृशा = नेत्रया, दग्ध्वा = सन्ताप्य, दिवः = आकाशस्य, रन्ध्रम् = अन्तरालम्, निशिचराः = रजनीचराः, सन्धन्ति = आवृण्वन्तीत्यर्थः। अत्र शार्दूलविक्रीडितं वृत्तम्।

सङ्क्रान्तवर्णान्तरगाधिसूनोः सम्पर्कपुण्यादिव रामभद्रः।
क्षात्त्रक्रमात् पिप्पलदण्डयोग्यः पलाशदण्डादृतपाणिरासीत्।। २५।।

अन्वयः - सङ्क्रान्तवर्णान्तरगाधिसूनोः सम्पर्कपुण्यादिव क्षात्त्रक्रमात् पिप्पलदण्डयोग्यः रामभद्रः पलाशदण्डादृतपाणिः आसीत्।

व्याख्या - सङ्क्रान्तम् = तपोबलेन सम्प्राप्तम्, वर्णान्तरम् = ब्राह्मण्यं, यस्य सः तथोक्तः तस्य, गाधिसूनोः = विश्वामित्रस्य, गाधिराजात्मजस्य, सम्पर्केण = सहवासेन, यत् पुण्यम् = सुकृतम्, तस्मादिव इति हेतूत्प्रेक्षा, क्षतः = नाशात्, त्रायते इति क्षत्रम् = क्षत्रवर्णम्, तस्य सम्बन्धी क्षात्रः, तस्मात् क्रमात्, क्षत्रियकुलाचारक्रमात् इति भावः, पिप्पलदण्डयोग्यः = उपनयनकालेऽश्वत्थदण्डधारणयोग्यः, क्षत्रियस्योपनयनसमये तथा विधिविहितत्वात्, रामभद्रः = श्रीरामः, पलाशदण्डे = किंशुकदण्डधारणे, आदृतः = आदरवान्, पाणिः = करः, यस्याऽसौ तथाविधः, ब्राह्मणस्योपनयनसमये पलाशदण्डधारणस्य विधिविहितत्वात्। अथवा पलम् = मांसम्, अश्नन्ति = खादन्ति, ये ते पलाशाः, तेषां दण्डे = नियमने, आदृतः = व्यग्रः, पाणिः = हस्तः, यस्याऽसौ तथाविधः, आसीत् = बभूव।

अत्र पूर्वार्धे हेतूत्प्रेक्षा, उत्तरार्धे विरोधाभासालङ्कारश्च, तयो परस्परं निरपेक्षत्वात् संसृष्टिरलङ्कारः। उपेन्द्रवज्रेन्द्रवज्रयोश्च अत्रोपजातिवृत्तम्।

वंशस्पृशा हृदयहारिफलान्वितेन
रामेरितेन सहसा सह सायकेन।
स्नेहार्दितेन निरगादनुरागिणीव,
प्राणावलिर्हृदयतः पिशिताशनानाम्।। २६।।

अन्वयः - वंशस्पृशा हृदयहारिफलान्वितेन रामेरितेन स्नेहार्दितेन सायकेन सह पिशिताशनानां

हृदयतः प्राणावलिः अनुरागिणीव सहसा निरगात्।

व्याख्या - वंशस्पृशा = वेणुसम्भवेन, सद्वंशप्रसूतेन, हृदयहारिफलान्वितेन = हृदयविदलनकारिबाणाग्रयुतेन मनोज्ञलाभसम्पन्नेन च, स्नेहार्दितेन = तैलादिस्नेह-द्रव्यपरिशोधितेन, सौदार्द्रपरिपूर्णेन, रामेण = श्रीरामेण, ईरितेन = प्रेरितेन, प्रक्षिप्तेनेति यावत्, अथवा रामाभिः ईरितेन इत्यर्थः प्रेरितेन, सुन्दरीणां स्वयमभिलषणी येन, सायकेन = बाणेन, सह = साकम्, प्राणनायकेन सह वा, पिशिताशनानाम् = रक्षसाम्, हतशेषाणाम्, प्राणानाम् = पञ्चप्राणानाम्, आवलिः = समूहः, अनुरागिणीव = अनुरागयुक्ता नायिकेव, हृदयतः = हृत्प्रदेशात्, सहसा = झटिति, निरगात् = निर्गताऽभूत्।

अस्मिञ्छ्लोके सहोक्तिसमासोक्त्योः संसृष्टिः, तया सह उपमायाः सङ्करश्च। तथा च सहोक्तिसमासोक्त्योर्लक्षणम् -

'सहार्थेनान्वयो यत्र भवेदतिशयोक्तितः।
कल्पितौपम्यपर्यन्ता सा सहोक्तिरिहेष्यते।। इति सहोक्तिलक्षणम्।
विशेषणानां तौल्येन यत्र प्रस्तुतवर्तिनाम्।
अप्रस्तुतस्य गम्यत्वं सा समासोक्तिरिष्यते। इति समासोक्तिलक्षणम्।

वसन्ततिलकावृत्तम्।

आजानपावनक्षीरां वृषानन्दविधायिनीम्।
श्रुतिप्रणयिनीं सोऽयमापगामाप गामिव।। २७।।

अन्वयः - सोऽयम् आजानपावनक्षीरां वृषानन्दविधायिनीं श्रुतिप्रणयिनीम् आपगां गामिव आप।

व्याख्या - सोऽयम् = राक्षसानां विनाशकः श्रीरामः, आजानपावनम् = स्वभावेन पवित्रम्, क्षीरं यस्याः सा ताम्, आजानशब्दः स्वभावे रूढः, अथवा जनानां समूहो जानम्, आङ् समन्तात्, जानम् = जनसमूहम्, पावयति = स्नानपानाभ्यां पवित्रीकरोति, यत् तथाभूतम्, क्षीरम् = जलम्, यस्याः सा तथाभूताम्, वृषैः = यमनियमादिभिः धर्मैः, य आनन्दस्तं विदधाति या सा ताम् वृषानन्दविधायिनीम्, अथवा वृषाणामानन्दं विदधाति या सा तथाभूताम् = धर्मादिभिर्वृद्धिकारिणीम्, अथवा वृषस्यानन्दप्रदायिनीम्, श्रुतिप्रणयिनीम् = श्रुतिपरिचिताम्, वेदपरिचितामित्यर्थः, 'सितासिते सरिते यत्र सङ्गते' इति श्रुतिः। अथवा तरङ्गोत्थितधूम-धूमध्वनिभिः श्रोत्रानन्दप्रदायिनीम्। अपां समूहः आपम्, तेन गच्छतीति आपगा, ताम्, आप = प्राप्तवान्, गङ्गातटमाजगामेत्यर्थः। कथम्भूतामिति चेत् - गामिव = धेनुमिव, धेन्वपि, आजानम् = स्वभावतः, पावनम् = पवित्रम्, क्षीरम् = दुग्धं, यस्यास्ताम्, वृषस्य = वृषभस्य, आनन्दं = रत्युल्लासम्, विदधाति या सा तथाभूताम्। श्रुतिसखिम् = श्रुतिसखीम्, 'चत्वारि वाक् परिमिता पदानि' इति श्रुत्या श्रुतिधेन्वोः साम्यम्। इत्थम्भूतां कामधेनुमिव गङ्गाम् आप। अत्रोपमाप्रतिमोत्थापितः श्लोषालङ्कारः।

अनपत्यानथासत्यान् बहुभार्यां च मेदिनीम्।

अकरोदम्बिकाक्रोधः पुत्रालाभसमुद्भवः ।। २८ ।।

अन्वयः - अथ पुत्रालाभसमुद्भवः अम्बिकाक्रोधः अमर्त्यान् अनपत्यान् मेदिनीं च बहुभार्याम् अकरोत् ।

व्याख्या - अथ = तदनन्तरम्, पुत्रस्य = आत्मजस्य, अलाभेन = अप्राप्त्या, समुद्भवः = उत्पत्तिर्यस्य तथाभूतः, पुत्राप्राप्तिजनित इत्यर्थः, अम्बिकायाः = पार्वत्याः, क्रोधः = कोपः, अमर्त्यान् = देवान्, अनपत्यान् = निस्सन्तानाम्, पुत्ररहितान्, च = तथा, मेदिनीम् = पृथिवीम्, बहूनाम् = अनेकेषां भोक्तॄणां राज्ञाम्, भार्याम् = पत्नीम्, अकरोत् = अकार्षीत्, क्रोधकलुषा पार्वती तथा शशापेत्यर्थः । देवानां पृथिव्याश्च स्वपुत्रावाप्तिघातकं मत्वा ।

तत्राभूत् कृत्तिकाप्रीत्यै षोढारूढमुखाम्बुजम् ।
तारकध्वान्तविध्वंसि सद्यः षाण्मातुरं महः ।। २९ ।।

अन्वयः - तत्र कृत्तिकाप्रीत्यै तारकध्वान्तविध्वंसि षाण्मातुरं महः सद्यः षोडारूढमुखाम्बुजम् अभूत् ।

व्याख्या - तत्र = शरवर्णे, कृत्तिकानाम् = षट्संख्याकानां कृत्तिकादेवीनाम्, देवैः स्तन्यप्रदानार्थः प्रेरितानाम्, प्रीत्यैः = परितोषार्थम्, षाण्मातुरम् = षण्णां कृत्तिकादेवीनामपत्यम्, महः = तेजः, तारकः = तारकासुरनामको राक्षसविशेषः, स एव ध्वान्तः = अन्धकारः, तं विध्वंसयति = विनाशयति, यः असौ तत्, षोढा = षड्भिः प्रकारैः, आरूढानि = प्रादुर्भूतानि, मुखाम्बुजानि = वक्त्रकमलानि, यस्य तत् तथोक्तम्, षण्णां कृत्तिकादेवीनां समकालमेव समानरूपेण स्तन्यग्रहणार्थं गृहीतमुखषट्कम् इत्यर्थः, अभूत् = सञ्जातम् ।

स पुत्रीयन् सपत्नीकस्तपस्तेपे समाः शतम् ।
भृगुः प्रीतमनास्तस्मै ददौ दायादसम्पदम् ।। ३० ।।

अन्वयः - पुत्रीयन् सः सपत्नीकः समाः शतं तपः तेपे, प्रीतमनाः भृगुः तस्मै दायादसम्पदं ददौ ।

व्याख्या - पुत्रीयन् = आत्मनः, पुत्रान् कामयमानः, सः = अयोध्याधिपतिः सगरः, सपत्नीकः = पत्नीभ्यां साकम्, शतम् = शतसंख्याकान्, समाः = संवत्सरान्, 'कालाध्वनोरत्यन्तसंयोगे' इति सूत्रेणात्र द्वितीया । तपः तेपे = तपश्चरणतत्परोऽभूदित्यर्थः,तेन तपसा प्रीतमनाः = सन्तुष्टः, महर्षिः = भृगुः, तस्मै = सगराय नृपतये, दायादसम्पदम् = सुतसम्पत्तिम्, ददौ = दत्तवान् । दायम् = विभक्तद्रव्यम्, अस्तीति दायादशब्दस्य व्युत्पत्तिः ।

क्रव्यादवपुषा सोऽयमहारि हरिणा हयः ।
ततस्तं नष्टमन्वेष्टुं सौमतेयाः प्रतस्थिरे ।। ३१ ।।

अन्वयः - सोऽयं हयः क्रव्यादवपुषा हरिणा अहारि । ततः नष्टं तम् अन्वेष्टुं सौमतेयाः प्रतस्थिरे ।

व्याख्या - सोऽयम् = अश्वमेधयज्ञीय, हयः = अश्वः, क्रव्यादस्य = राक्षसस्य, वपुषा = शरीरेण, हरिणा = इन्द्रेण, अहारि = अपहृतोऽभूत्, इन्द्रपदाद् भ्रंशभयात्। ततः = तदनन्तरम्, नष्टम् = अपहृतम्, तम् = अश्वम्, अन्वेष्टुम् = गवेषितुम्, सौमतेयाः - सुमतेः अपत्यानि पुमांसः = सगरपुत्राः, प्रतस्थिरे = प्रस्थानं कृतवन्तः, 'समवप्रविभ्यः स्थः' इत्यात्मनेपदम्।

सर्वे सपर्वतामुर्वी खनन्तः सगरात्मजाः।
चक्रुर्झर्झरितध्वान्तं नागलोकं नखांशुभिः।। ३२ ।।

अन्वयः - सर्वे सगरात्मजाः सपर्वतामुर्वीं खनन्तः नखांशुभिः नागलोकं झर्झरितध्वान्तं चक्रुः।

व्याख्या - सर्वे = षष्टिसहस्रसंख्याकाः, सगरात्मजाः = सुमत्यां सञ्जाताः सगरपुत्राः, सपर्वताम् = पर्वतैः समन्विताम्, उर्वीम् = भूमिम्, खनन्तः = अवदारयन्तः, नखांशुभिः = स्वनखकिरणैः, नागलोकम् = पाताललोकम्, झर्झरितध्वान्तम् = विध्वंसितान्धकारम्, चक्रुः = कृतवन्तः। पृथिव्यामखिलायाम् अन्विष्यापि तत्राश्वमनुपलभ्य पाताललोकपर्यन्तं पृथिवीमवदारयन्ति स्म।

अथ वीचीचयच्छन्नदिगन्तगगनान्तरा।
शशाङ्कशङ्खसम्भिन्नतारामौक्तिकदन्तुरा।। ३३ ।।

अन्वयः - अथ वीचीचयच्छन्नदिगन्तगगनान्तरा शशाङ्कशङ्खसम्भिन्नतारामौक्तिक-दन्तुरा। ('पपाते'ति अग्रिमया क्रिययान्वयः)

व्याख्या - अथ = भगवति शङ्करे प्रसन्ने जाते, वीचीनाम् = तरङ्गाणाम्, चयैः = परम्पराभिः, छन्नम् = आच्छादितम्, दिगन्तगगनान्तरा = नभोऽन्तरालं, च यस्याः सा, शशाङ्कः = चन्द्रः, एव शङ्खः, तेन सम्भिन्नानि = सङ्गतानि, यानि तारामौक्तिकानि = तारारूपाणि मुक्तामणयः तैः दन्तुरा = परिगता, गङ्गा भुवोऽभिमुखं पपात इत्यर्थः। अत्र रूपकालङ्कारः उत्तरार्धे।

तरङ्गाकृष्टमार्तण्डतुरङ्गायासितारुणा।
फेनच्छन्नस्वमातङ्गमार्गणव्यग्रवासवा।। ३४ ।।

अन्वयः - तरङ्गाकृष्टमार्तण्डतुरङ्गायासितारुणा फेनच्छन्नस्वमातङ्गमार्गणव्यग्रवासवा गङ्गा भुवोऽभिमुखम् (पपात)।

व्याख्या - तरङ्गैः = वीचिभिः, आकृष्टाः = अमार्गप्रवर्तिताः, ये मार्तण्डस्य = सूर्यस्य, तुरङ्गाः = अश्वाः, तैः आयासितः = स्वमार्गप्रवर्तनेन क्लेशितः, अरुणः = सूर्यस्य सारथिः, यया सा, तथा फेनैः = डिण्डीरसमूहैः, छन्नः = आच्छादितः, यः स्वमातङ्गः = स्वकीयो हस्ती ऐरावतः, तस्य मार्गणे = अन्वेषणे, व्यग्रः वासवः = इन्द्रः, यस्याः सा इत्थम्भूता गङ्गा भुवोऽभिमुखं पपात।

आविः शाखाशिखोन्नेयनन्दनद्रुमकर्षणा।
एकोदकनभोमार्गदिङ्मूढदिवसेश्वराः।। ३५ ।।

अन्वयः - आविः शाखाशिखोन्नेयनन्दनद्रुमकर्षणा एकोदकनभोमार्गदिङ्मूढदिवसेश्वराः पपात।

व्याख्या - आविः = प्रत्यक्षा, याः शाखानाम् = वृक्षशाखानाम्, शिखाः = अग्रभागाः, ताभिः

उन्नेयम् = अनुमातुं शक्यम्, नन्दनस्य = देवानां नन्दनोद्यानस्य, द्रुमाणाम् = वृक्षाणाम्, मन्दारकल्पवृक्षादिकानाम्, कर्षणम् = प्रवारणं यस्याः सा तथाभूता एकोदकम् = केवलं जलाप्लुतम्, यत् नभः = आकाशः, मार्गे = पथि, दिङ्मूढः = दिशाया विषये ज्ञानशून्यः, दिवसेश्वरः = सूर्यः, यया सा तथाभूताः भुवोऽभिमुखं पपात।

गङ्गा सप्ताकृतिर्जाता न्यपतद्धरमूर्धनि।
तेन स्तुत्या प्रसन्नेन क्षिप्ता बिन्दुसरस्यपि।। ३६।।

अन्वयः - सप्ताकृतिः जाता गङ्गा धरमूर्धनि न्यपतत्, स्तुत्या प्रसन्नेन तेन बिन्दुसरस्यपि क्षिप्ता।

व्याख्या - भुवोऽभिमुखमागच्छन्ती गङ्गा = भागीरथी, सप्ताकृतिः = सप्तसु धारासु संविभक्ता, जाता = सञ्जाता, इत्थम्भूता सा धरतीति धरः = पर्वतो हिमवान्, तस्य मूर्धनि = शिखरे, न्यपतत् = पपात। ततः स्तुत्या = भगीरथकृतया स्तुत्या, प्रसन्नेन = प्रसन्नतां गतेन, तेन = शिवेन, सा गङ्गा बिन्दुसरसि = बिन्दुसरोवरे अपि, क्षिप्ता = निक्षिप्ता सञ्जाता।

अत्रागमद् गौतमधर्मदाराननार्यजुष्टेन पथा महेन्द्रः।
स च क्रुधा निर्वृषणं वृषाणां भार्यामदृश्यां च मुनिश्चकार।। ३७।।

अन्वयः - अत्र महेन्द्रः अनार्यजुष्टेन पथा गौतमधर्मदारान् अगमत्। स च मुनिः क्रुधा वृषाणं निर्वृषणं भार्यां च अदृश्यां चकार।

व्याख्या - अत्र = अस्मिन् गौतममहर्षेः आश्रमे महेन्द्रः = देवराज इन्द्रः, अनार्यजुष्टेन = अशिष्टजनसेवितेन, जारभावेनेत्यर्थः, पथा = मार्गेण, गौतमस्य = गौतममहर्षेः, धर्मदारान् = धर्मपत्नीम्, अहल्याम्, अगमत् = ग्राम्यधर्मेण सङ्गतवान्। स मुनिः = प्रख्याततमः तपोवीर्यसमन्वितो मुनिः गौतमश्च, क्रुधा = क्रोधेन, वृषाणम् = इन्द्रम्, निर्वृषणम् = अण्डकोशविहीनम्, भार्याञ्च = स्वपत्नीम् अहल्यामपि, अदृश्याम् = पूर्वरूपपरित्यागेन पाषाणभावसमापन्नाम् चकार = कृतवान्, शापप्रदानेन द्वारा। अत्रोपजातिवृत्तम्। 'अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः।' इति तल्लक्षणम्।

दुःखे सुखे च रज एव बभूव हेतु-
स्तादृग्विधे महति गौतमधर्मपत्न्याः।
यस्माद् गुणेन रजसा विकृतिं गता सा,
रामस्य पादरजसा प्रकृतिं प्रपेदे।। ३८।।

अन्वयः - गौतमधर्मपत्न्याः तादृग्विधे महति दुःखे सुखे च रज एव हेतुर्बभूव, यस्माद् रजसा गुणेन विकृतिं गता सा रामस्य पादरजसा प्रकृतिं प्रपेदे।

व्याख्या - गौतमस्य = महर्षेः, धर्मपत्न्याः = अहल्यायाः, तादृग्विधे = तादृशे, महति = अतिकठिने दुःखे = कष्टावाप्तौ, शिलारूपेण अदृश्या भूत्वा सुचिरम् अदृश्यतया विद्यमानत्वरूपे

कष्टप्राप्तौ, सुखे च = पुनः पूर्वरूपमवाप्य प्रतिष्ठाप्राप्तिरूपे सुखे च, रजः एव हेतुः = कारणम्, बभूव = अभूत्, यस्मात् = रजरूपादेव हेतोः, रजसा गुणेन = रजोनामकेन प्राकृतेन गुणेनासक्ता सा, विकृतिं गता = कामकित्वं गता, इन्द्रेण सह ग्राम्यधर्मेण संयुक्ता सती, महर्षिणा शप्ता खलु शैली भूत्वा दुःखमतिकठिनमवाप, पुनः सा रामस्य = श्रीरामभद्रस्य, पादरजसा = चरणधूलिना, प्रकृतिं प्रपेदे = स्वकीयं पूर्वं रूपम् अवाप्य मानुषीभूता सती प्रतिष्ठामगमत् लोके। अस्मिञ्छ्लोके श्लेषालङ्कारः वसन्ततिलकावृत्तञ्च।

> तिष्ठन् क्षत्रार्हवृत्तौ मुनिरगमदसावाश्रमं ब्रह्मसूनो-
> रातिथ्यं तत्र लब्ध्वा निरवधिसुरभेः प्राभवादित्यवेत्य।
> सा तेन प्रार्थिताऽभूत् तदनु मुनिवरे नाभ्युपेते चकर्ष
> क्रोशन्तीं तां तयैव प्रचुरबलजुषा कान्दिशीको बभूव।। ३९।।

अन्वयः - असौ मुनिः क्षत्रार्हवृत्तौ तिष्ठन् ब्रह्मसूनोः आश्रमम् अगमत्, तत्र तु निरवधि आतिथ्यं लब्ध्वा सुरभेः प्रभावात् इति अवेत्य सा तेन प्रार्थिता अभूत्, तदनु मुनिवरे न अभ्युपेते, क्रोशन्तीं तां चकर्ष, तयैव प्रचुरबलजुषा कान्दिशीकः बभूव।

व्याख्या - असौ इति तर्जन्या निर्देशः, मुनिः = मननशीलो महर्षिः विश्वामित्रः, क्षत्राय = क्षत्रिवर्णाय, अर्हा या वृत्तिः = व्यापारः, तत्र तिष्ठन् = वर्तमानः सन्, कदाचित्, ब्रह्मसूनोः = वसिष्ठस्य, आश्रमम् = तपोवनम्, अगमत् = अगात्। तत्र = वसिष्ठर्षेः आश्रमे, निरवधि = सीमातीतम्, आतिथ्यम् = अतिथिसत्कारम्, लब्ध्वा = प्राप्य, सर्वमेतत्, वसिष्ठेन सुरभेः = कामधेनोः, प्रभावात् = सामर्थ्यात् एव क्रियते, इति = इत्येतत्, अवेत्य = ज्ञात्वा, तेन = राज्ञा विश्वामित्रेण, सा = कामधेनुः, प्रार्थिता = याचिता, अभूत् = बभूव, तदनु = तत्पश्चात्, मुनिवरे = वसिष्ठे, विश्वामित्रस्य, तस्याः प्रार्थनायाः, न = नहि, अभ्युपेते = स्वीकृते, सः राजा विश्वामित्रः, क्रोशन्तीम् = क्रन्दनं कुर्वन्तीम्, ताम् = कामधेनुम्, बलात्, चकर्ष = धर्षयति स्म। ततः, प्रचुरबलजुषा = भूयिष्ठबलयुक्तया, तया = कामधेन्वा, एव चतुरङ्गबलसम्पन्नेऽपि प्रमर्दितः सन्, कान्दिशीकः बभूव = भयात् पलायितोऽभूत्। अस्मिञ्छ्लोके स्रग्धरावृत्तम् - 'म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तनीया।' इति तल्लक्षणम्।

> अयं महात्मा तपसः प्रभावादारोपयामास दिवं त्रिशङ्कुम्।
> नीलाम्बरं निह्नुतराजवेषं वर्षानिशीथादविशेषवेषम्।। ४०।।

अन्वयः - अयं महात्मा तपसः प्रभावात् नीलाम्बरं निह्नुतराजवेषं वर्षानिशीथादविशेषवेषं त्रिशङ्कुं दिवम् आरोपयामास।

व्याख्या - अयम् = एषः, महात्मा = महानुभावः, विश्वामित्रः, तपसः = तपश्चरणस्य, प्रभावात् = सामर्थ्यात्, नीलाम्बरम् - नीलम् अम्बरं यस्याऽसौ = नीलवर्णवस्त्रधरम्, निह्नुतम् = गोपितम्, राज्ञो वेषं येनाऽसौ तथाभूतम्, वर्षायाः = वर्षाकालस्य, निशीथात् = रात्रेः, अविशेषम् =

सदृशम्, वेषं यस्याऽसौ वर्षानिशीथादविशेषवेषम्, वर्षाकाले आकाशं येन प्रकारेण मलिनं भवति, चन्द्रमाः न प्रकाशते, तेनैव प्रकारेण सोऽसौ राजा त्रिशङ्कुरपि नीलाम्बरधरो निह्नुतराजवेषश्चासीत्, तथाविधं त्रिशङ्कुं दिवम् = स्वर्गलोकम्, सशरीरम्, आरोपयामास = स्थापयामास। अत्र श्लेषालङ्कारः इन्द्रवज्रावृत्तञ्च।

इति जनकपुरोधःश्लाघितो गाधिसूनुः,
सह नृपतनयाभ्यां शर्वरीं तत्र नीत्वा।
विधिवददिशदर्घ्यं पुष्पदर्भाग्रगर्भं
सरसिजदयिताय ज्योतिषे छान्दसाय।। ४१ ।।

अन्वयः - इति जनकपुरोधः श्लाघितः गाधिसूनुः नृपतनयाभ्यां तत्र शर्वरीं नीत्वा सरसिजदयिताय छान्दसाय ज्योतिषे पुष्पदर्भाग्रगर्भम् अर्घ्यम् अदिशत्।

व्याख्या - इति = विगतेषु श्लोकेषूक्तप्रकारेण, जनकस्य = मिथिलाधिपतेः, पुरोधसा = पुरोहितेन, शतानन्देन, श्लाघितः = जन्मकर्मविद्यातपश्चर्यादिविषयेषु संस्तुतः, गाधेः = गाधिराजस्य, सूनुः = पुत्रो विश्वामित्रः, नृपस्य = राज्ञो दशरथस्य, तनयाभ्याम् = पुत्राभ्यां श्रीरामलक्ष्मणाभ्यां, सह = साकम्, तत्र = यज्ञशालायाम्, शर्वरीम् = रात्रिम्, नीत्वा = अतिवाह्य, सरसिजानाम् = कमलानाम्, दयिताय = बान्धवे, कमलबान्धवाय सूर्यायेत्यर्थः, छान्दसाय = वेदवर्णिताय, ज्योतिषे = ज्योतिस्स्वरूपाय, भगवते सूर्याय, विधिवत् = विधिपूर्वकम्, पुष्पदर्भाग्रगर्भम् = पुष्पकुशमिश्रितम्, अर्घ्यं = अर्घ्यार्थं जलम्, अदिशत् = दत्तवान्। तथा चात्र श्रुतिः - तदूह वा एते ब्रह्मवादिनः पूर्वाभिमुखाः सन्ध्यायां गायत्र्याभिमन्त्रिता आपः ऊर्ध्वं विक्षिपन्ति। ता एता आपो वज्रीभूत्वा 'तानि रक्षांसि मन्देहारुणे द्वीपे प्रक्षिपन्ति'। अत्र मालिनीवृत्तम्।

देव्या यस्या वसनमुदधिः पीठिका हाटकाद्रि-
र्हारः सिन्धुः सगरतनयस्वर्गमार्गैकबन्धुः।
क्रीडाशैलः प्रथमपुरुषक्रोडदंष्ट्रा च तस्याः
सीतामातुर्जगति मिथिलां सूतिकागेहमाहुः।। ४२ ।।

अन्वयः - यस्या देव्या उदधिः वसनम्, हाटकाद्रिः पीठिका, समरतनयस्वर्गमार्गैकबन्धुः सिन्धुः हारः, प्रथमपुरुषक्रोडदंष्ट्रा च क्रीडाशैलः तस्याः सीतामातुः मिथिलां जगति सूतिकागेहमाहुः।

व्याख्या - यस्याः देव्याः = 'राघवत्वेऽभवत् सीता रुक्मिणी कृष्णजन्मनि। अन्येषु चावतारेषु विष्णोरेषाऽनपायिनी।।' इति विष्णुपुराणसूक्त्यनुसारेण लक्ष्म्याः अवतारस्वरूपायाः सीतायाः जनन्याः पृथिवीदेव्याः, उदधिः - उदकानि, धीयन्ते अस्मिन्नित्युदधिः = समुद्रः 'उदकस्योदः संज्ञायाम्' इति उदकशब्दस्योदादेशः, हाटकस्य = सुवर्णस्य, अद्रिः = पर्वतः, सुमेरुरित्यर्थः, स एव पीठिका = उपवेशनपीठम्, अल्पं पीठं पीठिका, सगरस्य = अयोध्याधिपतेः ऐक्ष्वाकुवंशीयस्य राज्ञः, ये सुमत्यां सञ्जाताः षष्टिसहस्रसंख्याकाः तनयाः = पुत्राः, तेषां स्वर्गमार्गस्य = कपिलमुनेः क्रोधाग्निना

दग्धानाम्, स्वर्गप्राप्तेः एकबन्धुः = मुख्यसुहृत्, स्वर्गप्रापिका, या सिन्धुः = सरित् मन्दाकिनी, सैव हारः = मुक्ताकलापः, प्रथमश्चासौ पुरुषः प्रथमपुरुषः = भगवान् विष्णुः, स एव क्रोडः = वाराहरूपधरः, तस्य दंष्ट्रा = दन्तविशेष एव, यस्याः क्रीडाशैलः = विहाराचलः, तस्याः = एवमैश्वर्यसम्पन्नायाः, सीतामातुः = जानक्याः जनन्याः भूदेव्याः, मिथिलाम् = एतन्नाम्नीं नगरीम्, जगति = लोके, सूतिकागेहम् = सूतिकागृहम्, आहुः = कथयन्तीत्यर्थः। एवमपरिमेयमैश्वर्यं भवति मिथिलानगर्या इत्यर्थः। अत्र साङ्गरूपकालङ्कारः, मन्दाक्रान्ता च वृत्तम्।

> रामे बाहुबलं विवृण्वति धनुर्वंशे गुणारोपणं
> मा भूत् केवलमात्मना तिलकिते वंशेऽपि वैकर्तने।
> आकृष्टं नितरां तदेव न परं सीतामनोऽपि द्रुतं
> भङ्गस्तस्य न केवलं क्षितिभुजां दोःस्तम्भदम्भस्य च।। ४३ ।।

अन्वयः - रामे बाहुबालं विवृण्वति केवलं धनुर्वंशे गुणारोपणं मा भूत् आत्मना तिलकिते वैकर्तने वंशेऽपि तदेव नितरां न आकृष्टं परं द्रुतं सीतामनोऽपि केवलं तस्य भङ्गः न, क्षितिभुजां दोःस्तम्भदम्भस्य च।

व्याख्या - रामे = श्रीरामचन्द्रे, बाहुबलम् = निजभुजपराक्रमम्, विवृण्वति = प्रकटयति सति,केवलम्, धनुर्वंशे = धनूरूपवेणुदण्डे, गुणस्य = प्रत्यञ्चायाः, आरोपणम् = योजनम्, मा भूत् = नहि समभवत्, अपि तु आत्मना = स्वेन, तिलकिते = समलङ्कृते, स्वस्यावतीर्णत्वादिति यावत्, वैकर्तने = सूर्यसम्बन्धिनि, वंशे = कुलेऽपि, गुणारोपणमभूत्, शौर्यादिगुणसमर्पणमभूदिति विरोधपरिहारः। अन्यवंश्यीयैः राजभिः धनुः नारोपितमभूत् अपि तु सूर्यवंशीय एव श्रीरामः धनुषः आरोपणे समर्थोऽभूत् इति सूर्यवंशस्य प्रतिष्ठा सञ्जाता। तदेव = धनुरेव, नितराम् = अतिशयेन, न = नहि, आकृष्टमभूत्, परम् = किन्तु, द्रुतम् = शीघ्रम्, सीतायाः = जानक्याः, मनः = अन्तःकरणमपि, श्रीरामं प्रति आकृष्टमभूत्। केवलम् = मात्रम्, तस्य = धनुषः, एव, भङ्गः = विभेदः, न = नहि, सञ्जातः, अपि तु क्षितिभुजाम् = राज्ञाम्, दोः = हस्तौ, एव स्तम्भौ, तस्य दार्ढ्यविषयको दम्भः = गर्वापरपर्यायोऽभिमानः, अपि भग्नोऽभूत्। अस्मिन् श्लोके विरोधाभासमलङ्कारः। शार्दूलविक्रीडितं वृत्तम्।

> रामाकर्षणभग्नकार्मुकभवा ध्वानेन रोदोरुधा,
> दृप्तक्षत्रयशःसितच्छदकुले जीमूतनादायितम्।
> वीरश्रीप्रथमप्रवेशसमये पुण्याहघोषायितं
> सीतायाः किल मानसे परिणये माङ्गल्यतूर्यायितम्।। ४४।

अन्वयः - रामाकर्षणभग्नकार्मुकभवा रोदोरुधा ध्वानेन दृप्तक्षत्रयशःसितच्छदकुले जीमातनादायितं वीरश्रीप्रथमप्रवेशसमये पुण्याहघोषायितं किल सीतायाः मानसे परिणये माङ्गल्यतुर्यायितम्।

व्याख्या - रामस्य = श्रीरामचन्द्रस्य, कर्षणेन = धनुषः आकर्षणस्य कर्मणा, भग्नम् = विदलितम्, यत् कार्मुकम् = धनुः, तस्माद् भवतीति तथोक्तेन, रोदसी = द्यावाभूमी, रुणद्धि = आवृणोतीति रोदोरुधा, सर्वव्यापकेनेत्यर्थः, ध्वानेन = ध्वनिना कर्त्रा, दृप्ताः = गर्वोन्मत्ताः, ये क्षत्राः

= क्षत्रियाः, तेषां यश एव सितच्छदकुलम् = हंसश्रेणीति रूपकम्, तस्य विषये, जीमूतस्य = मेघस्य, नादेनेवाचरितं जीमूतनादायितम्, तथा वीरस्य = शूरस्य, श्रियः = लक्ष्म्याः, प्रथमप्रवेशसमये = प्रथमप्रवेशकाले, पुण्याहघोषेण = पुण्याहवाचनशब्देन, इवाचरितम् = अनुष्ठितम्, मङ्गलजनकध्वनित्वं गतमित्यर्थः। तथा सीतायाः = जानक्याः, किल = निश्चयेन, मानसे = मनसि प्रवर्तमाने, परिणये = विवाहसंस्कारविषये, माङ्गल्यतूर्येण = माङ्गल्यार्थः यः तूर्यध्वनिः, तेनेव आचरितं माङ्गल्यतूर्यायितम्। अत्र श्लोके शार्दूलविक्रीडितं वृत्तम्। उपमालङ्कारश्चात्रः।

नवः कठिनकर्षणत्रुटितचापजन्मा क्षणाद्
दिशां द्विरदधीङ्कृतैः कृतहरित्पतिस्वागतः।
जगद्भ्रमणकौतुकोच्चलितरामकीर्त्यङ्गना-
प्रयाणपटहध्वनिं प्रथयति स्म तारध्वनिः।। ४५।।

अन्वयः - कठिनकर्षणत्रुटितचापजन्मा क्षणाद् दिशां द्विरदधीङ्कृतैः कृतहरित्पतिस्वागतः नवः तारध्वनिः जगद्भ्रमणकौतुकोच्चलितरामकीर्त्यङ्गनाप्रयाणपटहध्वनि प्रथयति स्म।

व्याख्या - कठिनम् = सुदृढञ्चेदं कर्षणम् = आकर्षणम्, तेन त्रुटितः = भग्नः, यश्चापः = कार्मुकः तस्माद् जन्म यस्य सः तथाभूतः, अत्र व्यधिकरण बहुव्रीहिः, 'अवर्ज्यो बहुव्रीहिः व्यधिकरणो जन्माद्युत्तरपदः' इति वामनः। क्षणात् = अतिशीघ्रम्, दिशाम् = आशानाम्, द्विरदधीङ्कृतैः = दिग्गजानां धीङ्कारशब्दैः, तेषां भयजनितैः शब्दैः इत्यर्थः। कृतः = विहितः, हरित्पतिस्वागतः = दिगीश्वरकर्तृकशोभानागमनप्रश्नः, यस्य स तथोक्तः, अत्यन्तवेगेन दिगन्तव्यापीत्यर्थः। नवः = अभूतपूर्वो नवीनः, तारध्वनिः = उच्चध्वनिः, जगद्भ्रमणकौतुकसञ्चारकौतूहलाद् हेतोः, उच्चलिता = प्रवृत्ता, रामस्य कीर्तिः = यशः, एवाङ्गनेति रूपकम्, तस्याः प्रयाणे = प्रस्थानकाले, यः पटहध्वनिः = तूर्यघोषः, तम्, प्रथयति स्म = प्रकटयति स्म। अत्र रूपकालङ्कारयोः परस्परनिरपेक्षत्वात् संसृष्टिः, पृथ्वीवृत्तञ्च। 'जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः' इति तल्लक्षणम्।

यत्कीर्तिस्तिलकायते सुरवधूसङ्गीतगोष्ठीमुखे
येनाद्यः पितृमान् पुमान् वसुमती येनैव राजन्वती।
इन्द्रः सङ्गरसङ्कटेषु विजहौ वीरस्य यस्योन्मुख-
प्रेङ्खत्स्यन्दनकेतनाम्बरदशासन्दर्शनाद् दुर्दशाम्।। ४६।।

अन्वयः - यत्कीर्तिः सुरवधूसङ्गीतगोष्ठीमुखे तिलकायते, येन आद्यः पुमान् पितृमान् येनैव वसुमती राजन्वती, यस्य वीरस्य उन्मुखप्रेङ्खतस्यन्दनकेतनाम्बरदशासन्दर्शनात् सङ्गरसङ्कटेषु दुर्दशां विजहौ।

व्याख्या - यस्य = राज्ञो दशरथस्य, कीर्तिः = यशः, सुराणाम् = देवानाम्, या वध्वः = पत्न्यः, तासां सङ्गतम् = गायनस्य, गोष्ठ्याः = सभायाः, मुखे = प्रारम्भे, तिलकायते = तिलकबिन्दुरिवाचरति, येन = राज्ञादशरथेन, आद्यः = प्रथमः, पुमान् = पुरुषो भगवान् विष्णुः, पितृमान् = यस्याद्यः पुरुषो

भगवान् विष्णुरपि पुत्रतां गतः, वसुमती = धरित्री, येनैव = राज्ञा दशरथेन, राजन्वती = सुराजशालिनी भवति, यस्य = प्रख्याततमस्य अयोध्याधिपतेः, वीरस्य = योग्यस्य दशरथस्य, उन्मुखम् = अभिमुखम्, यथा स्यात् तथा, प्रेङ्खन्त्यः = वायुवशाच्चलन्त्यः, याः, स्यन्दनकेतनाम्बरदशा = रथध्वजपताकास्थितिः, सन्दर्शनात् = अवलोकनात्, इन्द्रः = परमैश्वर्यशाली देवेन्द्रः, सङ्गरसङ्कटेषु = देवासुरसङ्ग्रामसम्मर्देषु दुर्दशाम् = दुरवस्थाम्, विजहौ = तत्याज। सोऽयं राजा दशरथः मिथिलामगमत् इति पूर्वेणान्वयः। अत्र लुप्तोपमालूपकयोः सङ्करः। शार्दूलविक्रीडितञ्च वृत्तम्।

गुणमनिमिषचापे कञ्चिदारोप्य सीतां
कुशिकतनयवाक्यादग्रहीद्रामभद्रः।
तदनु तदनुजन्मा मैथिलेन्द्रस्य चित्ते,
निहितबहुगुणः सन्नूर्मिलां लक्ष्मणोऽपि।। ४७।।

अन्वयः - रामभद्रः अनिमिषचापे कञ्चिद् गुणम् आरोप्यकुशिकतनयवाक्यात् सीताम् अग्रहीत्, तदनु तदनुजन्मा मैथिलेन्द्रस्य चित्ते निहितबहुगुणः सन् लक्ष्मणोऽपि ऊर्मिलाम्।

व्याख्या - रामभद्रः = श्रीरामचन्द्रः, लोककल्याणकारित्वादेवश्रीरामे सह भद्रशब्दस्यान्वयः, अनिमिषाणाम् = देवानाम्, चापे = धनुषि, कञ्चित् = एकम्, गुणम् = प्रत्यञ्चारूपम्, आरोप्य = योजयित्वा, कुशिकतनयस्य = विश्वामित्रस्य, वाक्यात् = आदेशात्, सीताम् = जानकीम्, मिथिलाधिपतेः पुत्रीम्, अग्रहीत् = पत्नीरूपेण स्वीकृतवान्, तदनु = तत्पश्चात्, तदनु = श्रीरामस्य पश्चात्, जन्म = उत्पत्तिर्यस्याऽसौ, श्रीरामानुजो लक्ष्मणः, मैथिलेन्द्रस्य = मिथिलाधिपतेर्जनकस्य, चित्ते = अन्तःकरणे, निहितः = स्थापितः, बहवः = अनेके, सौशील्य-सौहार्द-शौर्य-वीर्य-पराक्रमादिकाः गुणाः = सद्गुणाः येनाऽसौ तथाभूतः, लक्ष्मणोऽपि = एतन्नामा श्रीरामानुजोऽपि, ऊर्मिलाम् = एतन्नाम्नीं कन्याम्, पत्नीरूपेणाग्रहीत् इत्याश्चर्यमेतत्।

अत्रोपमेयाद्रामादपेक्षया लक्ष्मणस्य गुणानामाधिक्यप्रतीतेः व्यतिरेकालङ्कारः, तस्य च श्लेषानुप्राणितत्वात् सङ्करः। वृत्तं मालिनी।

ततो भरतशत्रुघ्नौ कुशध्वजनियोगतः।
माण्डवीश्रुतकीर्तिभ्यामभूतां गृहमेधिनौ।। ४८।।

अन्वयः - ततः कुशध्वजनियोगतः भरतशत्रुघ्नौ माण्डवीश्रुतकीर्तिभ्यां गृहमेधिनौ अभूताम्।

व्याख्या - ततः = श्रीरामलक्ष्मणयोः सीतोर्मिलाभ्यां सह विवाहे सम्पन्ने सति, कुशध्वजस्य = जनकानुजस्य, नियोगतः = निदेशात्, भरतशत्रुघ्नौ = एतन्नामकौ रामानुजौ, माण्डवीश्रुतकीर्तिभ्याम् = एतन्नाम्नीभ्यां कुशध्वजसुताभ्यां सह, गृहमेधिनौ - गृहैः = दारैः, मेधेते = सङ्गच्छेते, इति गृहमेधिनौ = गृहस्थौ, अभूताम्। तत्र माण्डवी भरतस्य पत्न्यभूत् श्रुतकीर्तिश्च शत्रुघ्नस्य धर्मपत्न्यभवत्।

अथ दशरथवाणीं तामश्रृण्वन् प्रसन्नां

भृगुपतिरिदमूचे प्रश्रितं रामभद्रम्।
अवजिगमिषुरासं जीर्णचापात्तकीर्ते-
रविदितपरशोस्ते दोर्मेदं कार्मुकेऽस्मिन्।। ४९।।

अन्वयः - अथ तां प्रसन्नां दशरथवाणीम् अशृण्वन् भृगुपतिः प्रश्रितं रामभद्रम् इदमूचे - जीर्णचापात्तकीर्तेः अविदितपरशोः ते दोर्मदम् अस्मिन् कार्मुखे अवजिगमिषुः आसम्।

व्याख्या - अथ = दशरथकृता सपर्या सम्पन्ने सति, ताम् = पूर्वोक्ताम्, प्रसन्नाम् = प्रसादगुणसम्पन्नाम्, दशरथस्य = अयोध्याधिपतेः, वाणीम् = वचनम्, अशृण्वन् = अनादृतां कृत्वा, प्रश्रितम् = समागतोऽयं श्रीपरशुरामः, भृगुवंशीयो ब्राह्मणो वर्तते इति समादरणीयः इति मत्त्वा विनयान्वितम्, रामभद्रम् = श्रीरामचन्द्रम्, भृगुपतिः = श्रीपरशुरामः, इदम् = एतत्, ऊचे = कथितवान्। जीर्णचापेन = प्राचीनधनुषः भङ्गकरणेन, आत्ता = प्राप्ता, कीर्तिः = यशः, येनाऽसौ तथाभूतस्य, किञ्चस अविदितः = अज्ञातः, त्रिःसप्तकृत्वम्, अखिलायाः पृथिव्याः क्षत्रियरहितकर्ता, परशुः = मम कुठारः, येनाऽसौ तथाभूतस्य, अस्मिन् = मम हस्ते विद्यमाने, वैष्णवे कार्मुके, कर्मणि प्रभवतीति कार्मुकम्, तस्मिन् धनुषि, ते = तव भवतोरामभद्रस्य, दोर्मदम् = भुजबलम्, अवजिगमिषुः = ज्ञातमिच्छुरहम्, आसम् = अभवम्। किं जीर्णहरधनुर्भङ्गकर्मणा ते यशः? यदि भुजयोर्बलं स्यात् तदा ममास्य धनुषः आरोपणं कुरु। मालिनीवृत्तम्।

आदाय तत्सुगुणमाशु विधाय तत्र
सन्धाय बाणमवधार्य तपोधनत्वम्।
तज्जीवितस्य दयमानमना मनीषी
सम्भूतघोरसमराद् विरराम रामः।। ५०।।

अन्वयः - मनीषी रामः तत् आदाय तत् आशु सगुणं विधाय तत्र बाणं सन्धाय तपोधनत्वम् अवधार्य तत् जीवितस्य दयमानमनाः सम्भूतघोरसमराद् विरराम।

व्याख्या - मनसः ईषी मनीषी = विवेकसम्पन्नः, रामः = श्रीरामचन्द्रः, तत् परशुरामस्य वैष्णवं धनुः, आदाय = हस्ते गृहीत्वा, आशु = शीघ्रमेव, सगुणम् = सज्यं, विधाय = कृत्वा, तत्र = परशुरामस्य धनुषि, बाणम् = शरम्, सन्धाय = आरोप्य, पुनः श्रीपरशुरामस्य, तपोधनत्वम् = तपस्विताम्, अवधार्य = निश्चाय्य, पुनः तस्य = श्रीपरशुरामस्य, जीवितस्य = प्राणानां विषये, दयमानमनाः = दयायुक्तेन मनसा, अयं भृगुवंशीयः, श्रीपरशुरामः प्राणान् सन्धारयेत् इति मत्त्वा, सम्भूतघोरसमरात् = समुपस्थिताद् दारुणाद् रणात्, विरराम = विरतो बभूव। वसन्ततिलकावृत्तम्।

तावुभौ भृगुवंशसम्भवौ चापदण्डजमदग्निसम्भवौ।
प्रह्वभावमवलम्ब्य केवलं राघवार्पितगुणौ बभूवतुः।। ५१।।

अन्वयः - भृगुवंशसम्भवौ चापदम्ढजमदग्निसम्भवौ तौ उभौ केवलं प्रह्वभावमवलम्ब्य राघवार्पितगुणौ बभूवतुः।

व्याख्या - भृगुश्च वंशश्च भृगुवंशौ = भृगुमुनिवेणू, तौ एव सम्भवः = कारणं, ययोः तौ, अथवा भृगुवंशे = शैलप्रपातजवेणौ, भृगुमुनेर्वंशे च सम्भवः = उत्पत्तिर्ययोः, तौ भृगुवंशसम्भवौ, चापदण्डजमदग्निसम्भवौ = धनुर्यष्टिजामदग्न्यौ, तावुभौ = पूर्वोक्तौ, द्वावेव, केवलम् = अत्यन्तम्, प्रह्वभावम् = आरोपणप्रयुक्तं नम्रत्वं, विनयावनतत्वम्, अवलम्ब्य = आश्रित्य, राघवेन = श्रीरामेण, अर्पितः = आरोपितः, गुणः = मौर्वी साधुत्वं च, ययोस्तौ, अथवा राघवे = श्रीरामभद्रे, अर्पितः = समर्पितः, गुणः = पराक्रमः, सत्त्वगुणश्च, याभ्यां तौ बभूवतुः ।

अस्मिञ्छ्लोके तुल्ययोगितालङ्कारः । 'प्रस्तुतानां तथान्येषां केवलं तुल्यधर्मतः । औपम्यं गम्यते यत्र सा मता तुल्ययोगिता ।। इति तल्लक्षणम् । रथोद्धता वृत्तञ्च ।

लज्जावशादविशदस्मरविक्रियाभि-
स्ताभिर्वधूभिरतिवेलमवाप्तसौख्यान् ।
इक्ष्वाकुनाथतनयान् प्रथमो रसानां
तारुण्ययोगचतुरश्चतुरः सिषेवे ।। ५२ ।।

अन्वयः - लज्जावशात् अविशदस्मरविक्रियाभिः ताभिः वधूभिः अतिवेलम् अवाप्तसौख्यान् चतुरः इक्ष्वाकुनाथतनयान् तारुण्ययोगचतुरः रसानां प्रथमः सिषेवे ।

व्याख्या - लज्जावशात् = लज्जायाः अतिशयत्वात्, त्रपापारतन्त्र्यात् इति यावत्, अविशदा = अनभिव्यक्ता, स्मरस्य = कामस्य, विक्रियाः = विकाराः, यासु तथाविधाभिः, एतेन मुग्धावस्था सूच्यते; 'उद्यद्यौवना मुग्धा लज्जाविजितमन्मथा' इति मुग्धानायिकायाः लक्षणम्, ताभिः वधूभिः = सीतादिभिः, नवोढाभिः, अतिवेलम् = अत्यर्थम्, अवाप्तसौख्यान् = प्राप्तानन्दात्, चतुरः = चतुस्संख्याकान्, इक्ष्वाकुनाथस्य = दशरथस्य तनयान् = श्रीरामादीन् कुमारान्, तारुण्यस्य = यौवनावस्थायाः, योगे = सङ्गतिदशायाम्, चतुरः = निपुणः, विनोदकर इत्यर्थः, रसानाम् = नवसंख्याकानां रसानाम्, मध्ये, प्रथमः = श्रृङ्गाररसः, सिषेवे = सेवितवान् । वधूसहितानां चतुर्णां राजकुमाराणां श्रीरामादीनां सम्भोगश्रृङ्गारः प्रवृत्तोऽभूदित्यर्थः ।

प्रधानगद्यव्याख्यात्मको भागः ।

(१) एष मृगाङ्कोऽपि मृगयायासपरिश्रान्तिविश्रान्त्यै ससम्भ्रमं नमज्जनपरिवृते मज्जनगृहाभिमुखे दशमुखे तत्रत्यविचित्रतरशातकुम्भस्तम्भाग्रप्रत्यग्रप्रत्युप्तस्फटिकशिला-शालभञ्जिकापुञ्जकरतलकलितनिजोपलमयकलशमुखादच्छाच्छामविच्छिन्नधारम्बुधारां निजकराभिमर्शादापादयंस्तस्य प्रसादपिशुनानां सुनासीरचिरकाङ्क्षितानां विंशतिविधवीक्षणानां क्षणमात्रं पात्रं भवति ।

सन्दर्भप्रसङ्गौ - भोजराजप्रणीतस्य चम्पूरामायणाभिधस्य काव्यस्य बालकाण्डात् गृहीतेऽस्मिन् गद्यखण्डे कविः देवैः भगवते नारायणाय निवेदितं रावणकृतमत्याचारं वर्णयति । देवैरभिहितं यत् -

यदा रावणो मृगयातः श्रान्तः सन् प्रत्यागच्छति तदा मध्येमार्गं समुपलब्धास्तस्यानुचराः नमन्ति, सहैव तेनायान्ति च। स्नानागारे समुपस्थितं रावणं चन्द्रः स्वयमेव यदा स्नापयति तदा रावणः प्रसन्नैः स्वकीयैः विंशतिनेत्रैः चन्द्रं पश्यति।

व्याख्या - एषः = अयम्, मृगाङ्कोऽपि = चन्द्रोऽपि, मृगया = आखेटः, तत्र यः आयासः = खेदः, तेन या परिश्रान्तिः = खेदातिशय्यानुभवः, परिश्रम इति यावत्, तस्याः विश्रान्त्यै = अपनोदनार्थम्, ससम्भ्रमम् = सत्वरम्, नमद्भिः = नमस्यां कुर्वाणैः, जनैः = अनुचरैः, परिवृते = परिवेष्टिते, दशमुखे = रावणे, मज्जनस्य = स्नानस्य, गृहस्य = मण्डपस्य, अभिमुखे = उन्मुखे सति, तत्रत्याः = मज्जनगृहे विद्यमानाः, विचित्रतराः = अत्यन्ताश्चर्यकराः, ये शातकुम्भस्तम्भाः = सुवर्णनिर्मिताः स्तम्भाः, तेषामपुरि = अग्रप्रदेशेषु, प्रत्यग्रम् = नूतनम्, यथा स्यात् तथा। प्रत्युप्तः = जटितः, यः स्फटिकशिलाशालभञ्जिका-पुञ्जः = चन्द्रकान्तमणिप्रतिभाश्रेणिः, तस्य करतलेषु = पाणितलेषु, कलिताः = सङ्घटिताः, निजोपलमयाः = चन्द्रकान्तमणिमयाः, ये कलशाः = घटाः, तेषां मुखात् = विवरात्, अच्छाच्छाम् = अतिनिर्मलाम्, अविच्छिन्नधाराम् = अखण्डितसम्पातम्, अम्बुधाराम् = जलधाराम्, निजकराभिमर्शात् = स्वरश्मिसम्पर्कात्, आपादयन् = सम्पादयन्, तस्य = रावणस्य, प्रसादपिशुनानाम् = प्रसन्नतासूचकानाम्, सुनासीरेण = इन्द्रेण, चिरात् = दीर्घकालात्, काङ्क्षितानाम् = अभिलषितानाम्, न तु प्राप्तानाम्, विंशतिविधवीक्षणानाम् = विंशतिसंख्याककरुणकटाक्षाणाम्, क्षणमात्रम् = अत्यल्पकालं यावत्, पात्रं भवति = योग्यो भवति।

(२) तेन पुलस्त्यनन्दनेन कङ्क्रन्दननन्दनात् स्वमन्दिरोद्यानमानीतस्य मन्दार-प्रमुखस्य वृन्दारकतरुवृन्दस्य बन्दीकृतसुरसुन्दरीनयनेन्दीवरद्वन्द्वाच्च करारविन्दकलित-कनककलशाच्च मन्दोष्णं स्यन्दमानैरम्बुभिर्जम्बालितालवालस्य पचेलिमानामपि कुसुमानां पतनभयमाशङ्कमानाः पवमानाः परिस्पन्दितुमपि प्रभवो न भवन्ति।

सन्दर्भप्रसङ्गौ - चम्पूरामायणस्य बालकाण्डाद् गृहीतेऽस्मिन् गद्यखण्डे रावणस्यात्याचारं वर्णयन्तो देवताः भगवन्तं नारायणमाहुर्यद् - रावणः स्वर्गीयोद्यान् देववृक्षानादाय स्वीयोद्याने संस्थापयति, नियोजयति च बन्दीकृतसुरसुन्दरीः तेषां वृक्षाणां सेचनकर्मणि। तत्र पक्वान्यपि पुष्पाणि जातु पतितानि न स्युः इति धिया वायुस्तत्र वेगेन नहि वाति।

व्याख्या - तेन = पूर्ववर्णितेन देवेष्वत्याचारकारिणा पुलस्त्यनन्दनेन = रावणेन, सङ्क्रन्दनस्य = इन्द्रस्य, नन्दनात् = नन्दनवनात्, स्वस्य =आत्मनः, मन्दिरस्य = गृहस्य, उद्याने = आरामे, आनीतस्य = प्रापितस्य, मन्दारः = एतन्नामको वृक्षः, प्रमुखः =प्रधानः, यस्य तस्य पारिजातादिकस्येत्यर्थः, वृन्दारकानाम् = देवानाम्, तरूणाम् = वृक्षाणाम्, वृन्दस्य = समूहस्य, बन्दीकृताः = निगडिताः, ये सुराः = देवाः, तेषां याः सुन्दर्यः, तासां सुरसुन्दरीणाम् = देवस्त्रीणाम्, नयनानि = नेत्राणि, एव इन्दीवराणि = नीलकमलानि, तेषाम्, द्वन्द्वाच्च = युगलाच्च, करारविन्देषु = हस्तकमलेषु, कलिताः = गृहीताः, ये कनककलशाः = सुवर्णघटाः, तस्माच्च मन्दोष्णम् = क्वोष्णम्, यथा स्यात् तथा

स्यन्दमानैः = प्रवहमानैः, अम्बुभिः = अश्रुजलैः, कलशोदकैश्च, जम्बालवत् कृतानि जम्बालितानि = पङ्कीकृतानि, तान्यालवालानि = जलाधारमूलवलयानि, यस्य तस्य वृन्दारकतरुवृन्दस्य, पचेलिमानामपि = पतनोन्मुखानामपि, कुसुमानाम् = पुष्पाणां, पतनस्य = अधःपतनस्य, भयमाशङ्कमानाः = उत्प्रेक्षणं कुर्वाणाः, कुसुमपाते सञ्जाते रावणो मां निग्रहिष्यतीति भीतिं गताः, पवमानाः = वायवः, परिस्पन्दितुम् = चलितुमपि, किमुत यथेच्छविहर्तुम्, प्रभवः = समर्थाः, न = नहि, भवन्ति = जायन्ते।

(३) स एष मानुषादवमाननमागमिष्यतीत्यमन्वानः तदितरैरवध्यन्तं चतुराननवरा-ल्लब्ध्वा, समुद्धतः सम्प्रति सम्प्रहारसमाक्रान्तदिगन्तदन्तावलदन्तकुन्तव्रणकिणस्थ-पुटितवक्षःस्थलः स्थलकमलिनीं वनवारण इव रावणः त्रिलोकीमभिभवन् भवदीयानि-त्यस्मान्न जातु किञ्चिदपि जानातीति।

सन्दर्भप्रसङ्गौ - देवताः भगवन्तो नारायणस्य समक्षं रावणकृतात्याचारं समुपवर्ण्य स्वकथ्योपसंहारे कथयन्ति यत् - रावणः ब्रह्मणस्सकाशे नरेतरैरवध्यत्वस्य वरं लब्धवान्। साम्प्रतं सः सर्वप्रकारम् उपद्रवमाचरन् भवदाश्रितान् अस्मान् देवान् ज्ञात्वा न किमपि कदाचिदपि जानाति। तस्य दृष्टौ तुच्छाः वयं सञ्जाताः स्मः।

व्याख्या - स एषः = उपरि समुपवर्णितो रावणः, मानुषात् = मनुष्येभ्यः, जातावेकवचनम्, अवमाननम् = अवज्ञा, परिभवः, आगमिष्यति = समापतिष्यतीति, इति = इत्येतत्, अमन्वान् = अनवगच्छन्, तदितरैः = मानवव्यतिरिक्तैः सुरासुरादिभिः, अवध्यत्वम् = अहिंस्यत्वम्, चतुराननस्य = ब्रह्मणः, वरात् = वरदानात्, लब्ध्वा = सम्प्राप्य, समुद्धतः = दर्पोद्रिक्तः सन्, सम्प्रति = साम्प्रतम्, सम्प्रह्रियतेऽनेनेति सम्प्रहारः = युद्धम्, तत्र सामाक्रान्ताः = समवरुद्धाः, ये दिगन्तदन्तावलाः = दिग्गजाः, तेषां दन्ताः = रदनाः, एव कुन्ताः = भल्लाः, तैर्यानि व्रणानि = क्षतानि, तैर्जाताः ये किणाः = शुष्कग्रन्थयः, तैः स्थपुटितम् = निम्नोन्नतम्, वक्षःस्थलम् = उरःस्थलम्, यस्य तथोक्तः, सन् अत एव वनवारणः = वनगजः, स्थलकमलिनीम् = स्थलप्ररूढपद्मिनीमिव, त्रयाणां लोकानां समाहारस्त्रिलोकी, ताम् = जगत्त्रयीम्, अभिभवन् = अभिक्रमन्, पीडयन्निति यावत्, अस्मान् भवदीयान् = तावकीनान्, जातु = कदाचिदपि, किञ्चिद् = ईषदपि, न जानाति। सकललोककण्टकेन दर्पान्धेन रावणेन त्वन्महिमैव न ज्ञायते, अस्माकं तु का कथेति भावः।

(४) अथ कदाचिदपरिमेयमायाभयानकयुद्धसमुद्धतदैत्यबलावस्कन्द-कान्दिशीक-वृन्दारकानीकपरिवार्यमाणरथः पङ्क्तिःरथस्तपश्चर्याजातानामाश्चर्याणामायतनं त्रि-शङ्कुयाजिनं भगवन्तं पद्यप्रबन्धमिव दर्शितसर्गभेदं प्राकृतव्याकरणमिव प्रकटितवर्णव्यत्यासं बुधमिव सोमसुतं कुशिकसुतमद्राक्षीत्।

सन्दर्भप्रसङ्गौ - बालकाण्डाद् गृहीतेऽस्मिन् गद्यखण्डे राक्षसविनाशनाटकस्य पूर्वरङ्ग-भूतं विश्वामित्रमहर्षेः राज्ञो दशरथस्य सभायामागमनं वर्णयति कविः।

व्याख्या - अथ = अनन्तरम्, कदाचित् = कस्मिंश्चिद्दिवसे, अपरिमेयः = अपरिमिताः, या मायाः = शम्बरीविद्याः, विचित्रकपटवृत्तयः, ताभिर्भयानकानि = भयङ्कराणि, युद्धसमुद्धतानि =

युद्धोद्धतानि, च यानि दैत्यबलानि = दैत्यानां सैन्यानि, तेषाम् अवस्कन्दात् = आक्रमणात्, कान्दिशीकैः = पलायितैः, वृन्दारगणाम् = देवानाम्, अनीकैः = सैन्यैः, परिवार्यमाणः = निरीक्ष्य परिवेष्ट्यमाणः, रथो यस्य तथोक्तः, देवानामपि संरक्षक इत्यर्थः। पङ्क्तिरथः = दशरथः, तपश्चर्याजातानाम् = वसिष्ठस्पर्धया ब्रह्मर्षित्वसम्पादनार्थं विरचितव्रतोपवानादितपोऽनुष्ठानाज्जनितानाम्, आश्चर्याणाम् = अद्भुतानाम्, आयतनम् = आस्पदम्, त्रिशङ्कोः = हरिश्चन्द्रपितुः, याजिनम् = सदेहस्वर्गगमनार्थं यज्ञकर्तारम्, पद्यप्रबन्धमिव = श्लोकनिबद्धकाव्यमिव, दर्शितः = प्रकटितः, सर्गभेदः = कथाविच्छेदरूपः सृष्ट्यन्तरं, च येन तथाविधस्तं प्राकृतव्याकरणमिव, प्रकटितः = प्रकाशितः, वर्णव्यत्यासः = अक्षरव्यत्ययः, क्षत्रियत्वपरित्यागेन ब्रह्मवर्णस्वीकाररूपो व्यत्यासश्च येन तथाभूतं तम्, बुधमिव = सौम्यमिव, सोतसुतम् = चन्द्रपुत्रं सोमयाजिनं च, भगवन्तम् = महदैश्वर्यसम्पन्नम्, पूज्यं च, कुशिकसुतम् = विश्वामित्रम्, अद्राक्षीत् = अवलोकयामास। अत्र श्लेषसङ्कीर्ण-मुपमात्रयमन्योन्यनैरपेक्ष्यात् संसृष्टम्।

(५) बहुशस्तद्बलचकितस्य तपोबलाधिगतविविधायुधनिगमस्य भूयोऽपि सुरभिनिमित्तं समारब्धसमरस्य दिव्यास्त्रपरम्परां ब्रह्मदण्डेन निरुन्धन् अरुन्धतीजानिरवतस्थे।

सन्दर्भप्रसङ्गौ - भोजराजप्रणीतस्य चम्पूरामायणाभिधस्य काव्यस्य बालकाण्डाद् गृहीतेऽस्मिन् गद्यखण्डे विश्वामित्रवृत्तान्तं श्रीरामचन्द्रं श्रावयन् जनकविरोधाः शतानन्दः प्राह यत् - कदाचित् वसिष्ठाश्रमे सबलं समागतस्य विश्वामित्रस्य निरतिशयमातिथ्यं कामधेनुप्रभावेण सम्पादयामास ब्रह्मर्षिः वसिष्ठः। कामधेनोः प्रभावं ज्ञात्वा तां बलात् नेतुं कामयमानः विश्वामित्रः तयैव सृष्टेन बलेन पराजितस्सन् तपस्यया दिव्यान्यस्त्राणि सम्प्राप्य वसिष्ठविरुद्धं समारब्धसङ्ग्रामः ब्रह्मदण्डसहायेन वसिष्ठेन पराजितो बभूव।

व्याख्या - बहुशः = बहुप्रकारम्, तस्याः = कामधेनोः, बलेन = शक्त्या, चकितस्य = भयसम्भ्रान्तस्य, तपसा = तपोबलेन, अधिगताः = प्राप्ताः, विविधाः = बहुप्रकाराः, आयुधनिगमाः = धनुर्वेदाद्यस्त्रविद्याः, येनासौ तस्य, सुरभिनिमित्तम् = कामधेनोः प्राप्त्यर्थम्, भूयोऽपि = पुनरपि, समारब्धसमरस्य = उपक्रान्तयुद्धस्य, विश्वामित्रस्येति शेषः, दिव्यास्त्राणाम् = अमानुषास्त्राणाम्, परम्पराम् = श्रेणितम्, ब्रह्मदण्डेन = ब्रह्मतेजोमयेन, दण्डविशेषेण मन्त्रात्मकेन द्वारा, निरुन्धन् = निवारयन्, मोघीकुर्वन्निति यावत्, अरुन्धत्येव जाया यस्याऽसौ अरन्धतीजानिः = वसिष्ठः, 'जायाया निङ्' इति निङादेशः। अवतस्थे = औन्मुख्येन स्थितवान्। 'समवप्रविभ्यः स्थः' इति सूत्रेणात्मनेपदम्।

(६) अथ सावित्रः क्षत्रियः त्रिशङ्कुः सशरीरः स्वर्गसिद्धिमभ्यर्थयमानो वसिष्ठेन प्रत्याख्यातः तस्य पुत्रैर्महोदयादिभिर्निर्बन्धकुपितैः दत्तचण्डालभावः तमेनं शरणमभजत।

सन्दर्भप्रसङ्गौ - भोजराजसार्वभौमप्रणीतस्य चम्पूरामायणनामकस्य काव्यस्य बालकाण्डाद् गृहीतेऽस्मिन् गद्यखण्डे श्रीरामचन्द्रं विश्वामित्रवृत्तान्तं श्रावयन् जनकपुरोधाः शतानन्दो वक्ति यत् - एकदा सूर्यवंशीयो राजा त्रिशङ्कु सशरीरं स्वर्गं यातुं कामयते स्म। तदर्थं सः महर्षि वसिष्ठं प्रार्थयते

स्म। वसिष्ठः तं प्रत्याख्यातवान्। पुनः सः वसिष्ठं विहाय स्वकार्यं सिसाधयिषय। वसिष्ठपुत्राणां महोदयादिकानां सविधे जगाम। ते च क्रुद्धास्सन्तः तं शप्त्वा चाण्डालत्वं प्रापयामासुः। पुनः सः स्वशरणरूपेण विश्वामित्रस्य वरणमकार्षीत्।

व्याख्या - अथः = अनन्तरम्, एकदा, सावित्रः = सवितृवंशसमुद्भूतः, क्षत्रियः = क्षत्रकुलप्रसूतः, 'क्षत्राद्घ' इति घः घस्येयादेशश्च। त्रिशङ्कुः = एतन्नाम कश्चन अयोध्याधिपतिः, सशरीरः = शरीरेण सहितः, सन्नेव, स्वर्गस्य = स्वर्गलोकस्य, सिद्धिम् = प्राप्तिम्, अभ्यर्थयमानः = कामयमानः, शरीरेण सहित एवाह स्वर्गं यातुं कामये इति प्रार्थयमानो वसिष्ठस्य सविधे वसिष्ठेन = सूर्यवंशपुरोहितेन ब्रह्मर्षिणा, प्रत्याख्यातः = सशरीरिस्वर्गगमनमसम्भवमिति निराकृतः। सन्, तस्य = ब्रह्मर्षेः वसिष्ठस्य, पुत्रैः = तपस्यमानैः आत्मजैः, महोदयादिभिः = महोदयप्रभृतिभिः, निर्बन्धकुपितैः = युष्माभिरपि गुरुपुत्रैः अहं सशरीर एव स्वर्गं प्रापणीयः इति पुनः पुनर्याच्ञानिर्बन्धजनितोपद्रवसञ्जातकोपैः, दत्तः = शापप्रभावेण प्रापितः, चण्डालभावः यस्याऽसौ तथोक्तः, चण्डालो भव इति शप्तः सन्नित्यर्थः। तमेनम् = विश्वामित्रं तपस्यन्तम्, शरणमभजत = वसिष्ठप्रतिपक्षतयाऽयं मां सशरीरमेव स्वर्गं प्रापयिष्यतीति शरणागतोऽभूदित्यर्थः।

(७) ततो गीर्वाणगणप्रार्थनया परित्यक्तभुवनान्तरनिर्माणकर्माणं तत्र तपःप्रत्यूहः प्रत्युद्भूतः इति पश्चिमायां दिशि पुष्कलं तपश्चरन्तममुमम्बरीषयज्ञपशुविनाशप्रायश्चित्तार्थं बह्वीभिर्गोभिः क्रीत्वा नरपशुतां नीयमानस्तावदृचीकस्य मध्यमपुत्रः शुनःशेपः शरणमयाचत।

सन्दर्भप्रसङ्गौ - भोजराजप्रणीतस्य चम्पूरामायणाभिधस्य काव्यस्य बालकाण्डात् गृहीतेऽस्मिन् गद्यखण्डे श्रीरामचन्द्रं विश्वामित्रस्य चरित्रं श्रावयन् शतानन्दः जनकस्य पुरोधाः प्राह - त्रिशङ्कवे अपरस्य स्वर्गस्य निर्माणं कुर्वन् महर्षिः विश्वामित्रः देवैः प्रार्थितः सन् तस्मात् कर्मणा विरराम। पुनः तत्रोपस्थितं तपश्चर्याविघ्नं मत्वा पुष्करक्षेत्रे तपस्यामकरोत्। तत्रापि शुनःशेपस्य रक्षामकरोत्।

व्याख्या - ततः = त्रिशङ्कोः स्वर्गप्रतिष्ठापनसमये महर्षिः विश्वामित्रः, गीर्वाणानां = देवानां, यो हि गणः = समूहः, तस्य प्रार्थनया = अभ्यर्थनया, प्रसन्नः सन्, परित्यक्तम् = विसृष्टम्, भुवनान्तरस्य = लोकान्तरस्य, निर्माणस्य = निर्मितेः, कर्म येनाऽसौ तथाभूतम्, तत्र = दक्षिणस्यामाशायाम्, प्रत्यूहः = विघ्नः प्रत्युद्भूतः = उत्पन्नः, इति = इत्येतत्, पश्चिमायाम् = प्रतीच्याम्, दिशि = आशायाम्, पुष्करे = पुष्करनाम्निक्षेत्रे, पुष्कलम् = विपुलम्, तपः = तपस्याम्, चरन्तम् = कुर्वन्तम्, अमुम् = विश्वामित्रम्, अम्बरीषस्य = महाराजस्य, यज्ञपशुविनाशे निमित्ते, प्रायश्चित्तार्थम् = प्रायश्चित्तं कर्म कर्तुम्, 'प्रायश्चित्तं नाम प्रारब्धकर्मलोपजनितदुरितनिराकरणार्थम् अवश्यकर्त्तव्यकर्मविशेषः, तदर्थम्, बह्वीभिः = अनेकाभिः, शतसंख्याकाभिरित्यर्थः, गोभिः = मूल्यभूताभिः, क्रीत्वा = क्रयं कृत्वा, नरपशुतां नीयमानः = तत्प्रायश्चित्तस्य, नरपशोर्निर्वर्त्यत्वेन विधिबोधितत्वादिति भावः। तावत् = तदानीम्, ऋचीकस्य = ऋचीकनाम्नः, कस्यचिद् दरिद्रब्राह्मणस्य, शुनःशेपः = शुनःशेपनामा, मध्यमपुत्रः = मध्ये भवो मध्यमः आत्मजः, शरणम् अयाचत = प्राणसङ्कटापन्नोऽहम्, मम रक्षां

कुरु इति प्राथितो बभूव।

(८) अथ दशरथस्तनयैः सह कृतविवाहैर्विदेहेभ्यः प्रतिनिवर्तमानः संवर्तसमय-समुज्जृम्भितहुतवहदुःसहरोषं भीषणदुर्वारपराक्रमं क्षत्रवर्गगर्वसर्वङ्कषपरश्वधधाराधीन-रुधिरधाराकल्पितपितृतर्पणं दर्पवतामग्रेसरमुग्रप्रतापिनं तपःसमुचितवल्कलवसनमपि वासनावशादनतिपरिमुषितयुद्धश्रद्धं मध्येमार्गं भार्गवं मुनिं राममद्राक्षीत्।

सन्दर्भप्रसङ्गौ - भोजराजप्रणीतस्य चम्पूरामायणाभिधस्य काव्यस्य बालकाण्डाद् गृहीतेऽस्मिन् गद्यखण्डे कविर्वर्णयति यत् - राजा दशरथः स्वचतुर्णां पुत्राणां विवाहे सञ्जाते सति सुतैः वधूभिश्च साकं विदेहेभ्यः अयोध्यां प्रति निवर्तमानः सन् मध्येमार्गमतिभयङ्कराकारं धनुर्धारिणं श्रीपरशुरामम् अपश्यत्।

व्याख्या - अथ = स्वपुत्राणां चतुर्णां विवाहे सम्पन्ने सति, कृतविवाहैः = विहितपरिणयैः, नवोढासङ्गतैः, तनयैः = स्वात्मजैः, सह = साकम्, विदेहेभ्यः = विदेहनामकजनपदेभ्यः, प्रतिनिवर्तमानः = स्वराजधानीमयोध्यां प्रत्यावर्तमानस्सन्, राजा दशरथः, संवर्तसमये = प्रलयकाले, समुज्जृम्भितः = जाज्वल्यमानः, यो हुतवहः = अनलः, तद्वद् दुःसहः = असह्यः, रोषः = क्रोधः, यस्याऽसौ तम्, अत एव भीषणः = भयङ्करः, दुर्वारः = निवारितुमशक्यश्च, पराक्रमः = भुजबलं, यस्याऽसौ तथाभूतम्, तथा क्षत्रवर्गस्य = क्षत्रियसमूहस्य, गर्वस्य = दर्पस्य, सर्वङ्कषा = निरासका, या परश्वधधारा = कुठारधारा, तदधीना = तदायत्ता, तन्निष्पादितेत्यर्थः, या रुधिरस्य = रक्तस्य, धारा = प्रवाहः, तया कल्पितम् = अनुष्ठितम्, पितृतर्पणं येनाऽसौ तम्, दर्पः = शौर्यादिमदः, तद्वतामग्रेसरम् = अतिमदोद्धतम्, उग्रप्रतापिनम् = आज्ञादण्डप्रतिज्ञादण्डाभ्यां प्रचण्डप्रतापम्, तथा तपःसमुचितम् = तपश्चर्यानुकूलम्, वल्कलम् = वृक्षत्वङ्निर्मितं वस्त्रं, वसनमपि = आच्छादयन्तमपि, वासनावशात् = क्षत्रियक्षेत्रसञ्जननवशात्, अनतिपरिमुषिता = अत्यन्तानपहृता, युद्धश्रद्धा = युद्धादरः, यस्याऽसौ तम्, मुनिम् = तत्त्वमननशीलम्, भार्गवम् = भृगुवंशोद्भूतम्, रामम् = जामदग्न्यम्, मध्येमार्गम्, अद्राक्षीत् = अवलोकितवान्।

(९) अथ सङ्क्रान्तया जामदग्न्यशक्तिसम्पदा सम्पन्नं पन्नगपरिवृढभोगभुजाभिरामं राममविरलमालिङ्ग्य मूर्ध्न्युपाघ्राय दशरथः परिखयेव परिसरे परिसरन्त्या सरयूसरितानुविद्धामयोध्यां दारकान् सदारान् सादरमवलोकयन्तीनां पौरपुरन्ध्रीणां नीरन्ध्रितगवाक्षैः कटाक्षैः सौन्दर्यवञ्चिततापिच्छैः पिच्छातपत्रायमाणधवलातपत्रः प्रविवेश।

सन्दर्भप्रसङ्गौ - भोजराजप्रणीतस्य चम्पूरामायणनामकस्य काव्यस्य बालकाण्डाद् गृहीतेऽस्मिन् गद्यखण्डे कविर्वर्णयति यत् - राजा दशरथः कृतविवाहैः सदारैः चतुर्भिः पुत्रैः सह स्वराजधानीमयोध्यां प्रविवेश इति।

व्याख्या - अथ = श्रीपरशुरामस्य परलोकगतिविहत्यनन्तरम्, दशरथः = अयोध्याधिपतिः,

सङ्क्रान्तया = प्रतिफलितया, जामदग्न्यस्य = श्रीपरशुरामस्य, शक्तिसम्पदा = सामर्थ्यसम्पत्त्या, सम्पन्नम् = समृद्धम्, अवतरादवतारसङ्क्रमणनियमात् वैष्णवतेजसम्पन्नमिति यावत्, पन्नगपरिवृढस्य = भुजगेन्द्रस्य, भोगः = कायः, तत्कल्पाभ्यां भुजाभ्याम्, अभिरामम् = मनोज्ञम्, रामम् = निजतनयं श्रीरामम्, अविरलम् = निरन्तरम्, आलिङ्ग्य = आश्लिष्य, मूर्ध्नि = शिरसि, उपाघ्राय = आघ्राणं कृत्वा, कृच्छ्रान्निर्गतं पुत्रं पिता शिरसि जिघ्रतीति शास्त्राचारप्रसिद्धिः, परिखयेव = पट्टणस्य वलयाकारेण निखातजलदुर्गविशेषेणेव इत्युत्प्रेक्षा, परिसरे = सविधे, परिसरन्त्या = प्रवहन्त्या, सरयूसरिता = सरयूनाम्न्या नद्या, अनुविद्धाम् = आवेष्टिताम्, अयोध्याम् = स्वराजधानीम्, सदारान् = स्वपत्नीभिः सहितान्, दारकान् = स्वात्मजान्, सदारम् = सस्नेहम्, अवलोकयन्तीनाम् = पश्यन्तीनाम्, पौरपुरन्ध्रीणां = नागरिकनारीणाम्, नीरन्ध्रितगवाक्षैः = निरन्तरगवाक्षमार्गैः, कटाक्षैः, सौन्दर्यवञ्चिततापिच्छैः = सौभाग्यनिर्जिततमालपुष्पैः, कटाक्षैः = अपाङ्गावलोकनैः, पिच्छातपत्रम् = बर्हमयच्छत्रम्, तद्वदाचरतीति पिच्छातपत्रायमाणम्, तथाभूतम्, धवलातपत्रम् = श्वेतच्छत्रं, यस्याऽसौ राजा दशरथः, प्रविवेश = प्रविष्टवान्।

अत्रातपत्रस्य स्वधवलिमपरित्यागेन कटाक्षनीलिमस्वीकरणत्वोक्तेः आद्गुणालङ्कारः। तेन चोक्तोपमानिरूढेन धवलातपत्रस्य पिच्छातपत्रत्वमुत्प्रेक्ष्यते इति त्रयाणां सङ्करः।

(१०) तत्र विधिवदभ्यर्चितः कथितदशरथतनयवृत्तान्तः कौशिकः कौशिक-प्रमुखैरमरैरस्मत्कुलमत्तरे देवराते निक्षिप्तं विशेषतः सीताशुल्कार्थं मया रक्षितमिदमिति जनकेन प्रदर्शितस्य चापस्यारोपणाय सममादिदेव।

सन्दर्भप्रसङ्गौ - भोजराजप्रणीतस्य चम्पूरामायणनामकस्य काव्यस्य बालकाण्डाद् गृहीतेऽस्मिन् गद्यखण्डे कविर्वर्णयति यत् - महर्षिर्विश्वामित्रः श्रीरामलक्ष्मणाभ्यां साकं जनकसभायामगमत्, तत्र राजा जनकः तस्य विधिपूर्वकं सपर्यां कृतवान्। पुनर्महर्षिः विश्वामित्रः श्रीरामस्याखिलं वृत्तान्तं श्रावयामास। राजा जनकोऽपि सीताशुल्कभूतम् ऐशं महद्धनुः दर्शयामास। ततो महर्षिः विश्वामित्रः श्रीरामं चापस्यारोपणायादिदेश।

व्याख्या - तत्र = जनकसभायां, कौशिकः = कुशवंशसम्भूतत्वात् कौशिकः, विधिवद् = यथाशास्त्रम्, अभ्यर्चितः = पूजितः, कथितः = उपवर्णितः, दशरथस्य = अयोध्यापतेः, तनयस्य = श्रीरामस्य, वृत्तान्तः = वंशप्रशंसादिवृत्तिर्येन असौ तथाविधः, तथा कौशिकप्रमुखैः = महेन्द्रादिभिः, अस्मत्कुलमहत्तरे = अस्मद्वंशश्रेष्ठे, देवराते = एतन्नाम्नि राज्ञि, निक्षिप्तम् = विन्यस्तम्, विशेषतः = विशेषरूपेण, सीतायाः = मैथिल्याः, शुल्कार्थम् = विवाहमूल्यार्थम्, तस्यारोपणस्यै विवाहमूल्यत्वात्, मया = मया सीरध्वजेन राज्ञा जनकेन, रक्षितम् = गुप्तम्, धनुरिति शेषः। जनकेन = सीरध्वजेन, प्रदर्शितस्य = निर्दिष्टस्य, चापस्य = धनुषः, अवरोपणाय = अवनमनाय, रामम् = रामभद्रम्, आदिदेश = आदिष्टवान्।

(११) तदनु जनकराजधानीं रामलक्ष्मणनिरीक्षणकौतुकादनवरतपतितेन, विकचकुवलयनिचयोपचीयमानमेचकमरीचिमलिम्लुचेन पौरनारीलोचनरोचिषा कवचितनरपतिपथां विश्वामित्रः

प्रविश्य दशरथतनयाविदमभाषत।

सन्दर्भप्रसङ्गौ - भोजराजसार्वभौमविरचितस्य चम्पूरामायणाभिधस्य काव्यस्य बालकाण्डाद् गृहीतेऽस्मिन् गद्यखण्डे कविर्वर्णयति - दशरथतनयाभ्यामतीव मनोज्ञाभ्यां श्रीरामलक्ष्मणाभ्यां मुनिः विश्वामित्रः समागत इति श्रुत्वा तयोरवलोकनार्थं बह्व्यः नार्यः राजमार्गे समागताः तयोर्वाञ्छासिद्ध्यर्थं मुनिर्विश्वामित्रः तस्यां नगर्यां ताभ्यां सह प्रविवेश।

व्याख्या - तदनु = अर्घ्यप्रदानानन्तरम्, विश्वामित्रः, रामलक्ष्मणयोः = दशरथतनययोः, निरीक्षणस्य = अवलोकनस्य, कौतुकात् = कुतूहलात्, हेतोः, अनवरतपतितेन = सततं समागतेन, प्रसृमरेणेति यावत्, विकचकुवलयानाम् = विकसितानां नीलकमलानां, निचयेन = समूहेन, उपचीयमाना = प्रवर्धमाना, या मेचकसरीचिः = श्यामलकान्तिः, तस्याः मलिम्लुचेन = पाटच्चरेण, तिरस्करणेनेति यावत्, तद्वन्नीलवर्णेनेत्यर्थः, अत एवोपमा, पौरनारीणाम् = पुरसुन्दरीणाम्, लोचनरोचिषा = नेत्रकान्त्या, कवचितः = संवलितः, नरपतेः = राज्ञः, पन्थाः = मार्गः, यस्यास्ताम्, जनकराजधानीम् = जनकराजस्य राजधानीं जनकपुरीं, राजानो धीयन्तेऽस्याम् इति राजधानी, तां प्रविश्य, दशरथतनयौ = दशरथपुत्रौ श्रीरामलक्ष्मणौ, इदम् = एतत्, अभाषत = कथितवान्।

(१२) तत्र जम्भारिप्रहितां रम्भां शैली भवेति शप्त्वा पूर्वस्यां दिशि निरस्तनिःश्वासं तपश्चरत्यमुष्मिन्नूष्मणा तपोऽग्नेरुद्विग्निताऽमरसखस्तामरसासनः सन्निधाय जितेन्द्रियत्वाद् ब्रह्मर्षिरसि वसिष्ठोऽपि एवं व्याहरतु भवन्तमित्यभाषत।

सन्दर्भप्रसङ्गौ - भोजराजप्रणीतस्य चम्पूरामायणनामकस्य काव्यस्य बालकाण्डाद् गृहीतेऽस्मिन् गद्यखण्डे विश्वामित्रचरित्रं श्रीरामं श्रावयन् जनकपुरोधाः श्रीरामभद्रमवोचत् यत् - महर्षिः विश्वामित्रः उत्तरस्यामाशायां तपस्तपति स्म। तत्र तं लोभयितुम् इन्द्रः रम्भानाम्नां देवाङ्गनां प्रेषयामास। विश्वामित्रः तया विघ्नितः तां शैलीं भवितुं शप्त्वा पूर्वस्यां दिशि तपश्चचार। तत्र देवैः प्रार्थितो ब्रह्मा आगत्य तस्मै ब्रह्मर्षित्वप्राप्तेः वरमदात्।

व्याख्या - तत्र = उत्तरे, भूभृतिः, जम्भारिणा = जम्भाख्यदैत्यशत्रुनेन्द्रेण, प्रहिता = प्रेषिता, या सा तां तथाभूताम्, रम्भाम् = रम्भानाम्नीम्, देवाङ्गनाम्, शैली = शिलास्वरूपा भवेति, शप्त्वा = शापेन पाषाणावस्थां दत्त्वेति यावत्, पूर्वस्याम् = प्राच्याम्, दिशि = आशायाम्, निरस्तः = परित्यक्तः, निःश्वासो यथा स्यात् तथा कृत्वा = निरुद्धप्राणसञ्चारम्, अमुष्मिन् = विश्वामित्रे, तपश्चरति = महोग्रतपसि वर्तमाने, सति, तपोऽग्नेः = तपश्चर्यारूपाग्नेः, ऊष्मणा = सन्तापेण, अद्विग्निता = विह्वलिता, ये अमराः = देवाः, तेषा सखा = मित्रम्, भयभीताखिलदेवैः समेतः, तामरसम् = कमलम्, आसनं यस्याऽसौ तथाभूतो ब्रह्मा, सन्निधाय = सविधे आगत्य, जितेन्द्रियत्वात् = वशित्वात्, त्वं ब्रह्मर्षिः असि = ब्रह्मर्षित्वं गतोऽसि, त्वत्प्रतिपक्षी वसिष्ठोऽपि, भवन्तम् = त्वाम्, एवम् = ब्रह्मर्षिरसीति, व्याहरतु = वदतु, ममानुग्रहेणेति, अभाषत = अवदत्।

(१३) अयं भगवान् निजतनयविनिमयेन रक्षितुमेनमुन्मुखः पराङ्मुखेभ्यस्तेभ्यो हविष्यन्दादिभ्यः शापेन वसिष्ठपुत्रदशां दत्त्वा गाथाद्वयप्रीताभ्यामिन्द्रोपेन्द्राभ्यामम्बरीषं शुनःशेपं च परिपूर्णमनोरथौ

कारयामास।

सन्दर्भप्रसङ्गौ - भोजराजसार्वभौमप्रणीतस्य चम्पूरामायणनामकस्य काव्यस्य बालकाण्डाद् गृहीतेऽस्मिन् गद्यखण्डे श्रीरामचन्द्रं विश्वामित्रवृत्तान्तं श्रावयन् जनकपुरोधाः शतानन्दो वक्ति यत् - शुनःशेपस्य प्रार्तनां श्रुत्वा तं रक्षितुं स्वपुत्रेष्वन्यतममम्बरीषाय दातुं विश्वामित्रः उद्यतो बभूव। परन्तु विश्वामित्रस्येयं प्रस्तावं विश्वामित्रपुत्राः नहि स्वीचक्रुः। तेन क्रुद्धः सः स्वपुत्रान् शप्त्वा चण्डालान् चकार। द्वाभ्यां गाथाभ्यां चेन्द्रोपेन्द्रो प्रसाद्य अम्बरीषं शुनःशेपं च ररक्ष।

व्याख्या - अयमिति पुरोवर्तिनि निर्देशः, भगवान् = महदैश्वर्यसम्पन्नः विश्वामित्रः, निजस्य = आत्मनः, तनयस्य = पुत्रस्य, विनिमयेन = प्रत्यर्पणेन, एवम् = शुनःशेपम्, रक्षितुम् = अवितुम्, उन्मुखः = उद्यतः, सन्, पराङ्मुखेभ्यः = विनिमयानङ्गीकारेण प्रतिकूलेभ्यः, तेभ्यः = विश्वामित्रपुत्रेभ्यः, हविष्यन्दादिभ्यः = हविष्यन्दः आदिर्येषां ते तेभ्यः = स्वात्मजेभ्यः स्वाज्ञोल्लङ्घनकर्तृभ्यः, शापेन = शापप्रदानेन द्वारा, वसिष्ठपुत्राणाम् = महोदयादीनाम्, दशाम् = चण्डालत्वम्, दत्त्वा = प्रदाय, गाथाद्वयेन = द्वाभ्यां गाथाभ्यां, प्रीताभ्यां = प्रसन्नाभ्याम्, इन्द्रोपेन्द्राभ्याम् = वासवविष्णुभ्याम्, अम्बरीषम् = तन्नामकं महाराजम्, शुनःशेपम् = ऋचीकमध्यमपुत्रं च, परिपूर्णमनोरथौ = सम्प्राप्ताभिलाषौ, कारयामास = सम्पादितवान्।

*****